द्रागर्पयामि तुलसीदलमद्य शुद्धम् ॥ १६ ॥
कूपोपकण्ठमुपतिष्ठति या सदैव
प्रीत्या परोपकरणस्य फलान्यधीते।
एकाङ्घ्रिया घनतपस्कुरुते विविक्ते-
दूर्वां च तामिह ददामि पदोः समग्राम् ॥ १७ ॥

महीयस्ते तेजो जगति विदितं विघ्नकुलिशं
करैरुग्रैर्यस्मादवसि धरणीमीति पतिताम्।
प्रणश्यन्तं सन्तं दिशसि सुकृतं भावविदतं
अबीरं सौभाग्यं भवतु तव पादेष्विन्! शुभम्॥ १८ ॥

सूर्यप्रियासंज्ञायाः

दिनकरकरपरिलालितसंज्ञा संज्ञाधरासुकृतिपूज्या।
आसनमद्य पवित्रं स्वीकुरुते प्रफुल्लास्या ॥ १ ॥

सूर्यप्रिये! प्रतिदिनं चरणोपनम्रे
दीने विदेहि सततं करुणार्द्रदृष्टिम्।
स्वीकृत्य पाद्यमधुना जगदेकवन्द्ये!
त्वन्नाशय प्रतिपलं मम दोषजातम् ॥ २ ॥

मातस्त्वदीययशसः सततं प्रशंसाम्
कुर्वत्सगर्वमधुनार्घ्यमिदं ददामि।
देवाः समस्तजगतीतलमध्यगा मे
तेषां यतोऽसि जननी ननु वन्दनीया ॥ ३ ॥

पेयमम्ब! तव काञ्चनपात्रे स्वर्णमञ्चमधितिष्ठति पूतम्।
चन्द्रभानुनिभशुभ्रतेजसा देहि मे मनसि भावमनिन्द्यम्॥४॥
प्रियदुग्धमिदं मदर्पितं मम चानन्दप्रदं रविप्रिये!।
शिवमद्य भवेत्तदैव मे यदि पानं क्रियते त्वयाऽधुना ॥ ५ ॥
इह घृतं दधि प्रेमसमन्वितं जननि! स्वादुतरं गुडमिश्रितम्।
कुरु कृपां मयि देव! गृहाण किं निजसुतस्य करोषि विलम्बनम् ॥६॥

प्रगुणितहिम किं न हेमपात्रे मधुचैत्रेण प्रदत्तमत्र भाति।
करुणालवमद्य मयि विधाय निजपुत्रेऽपि गृहाण विश्ववन्द्ये॥ ७ ॥

दीने विधाय करुणां शुचिशर्करां किं
प्रस्थापितां पुनरिमामधमाधमे च।
छाये! गृहिष्यसि निलिम्पजनप्रपूज्ये!
सर्वस्य भद्रमभि वाञ्छति भद्रचेता ॥ ८ ॥

संज्ञे! घृतं स्वीकुरु चाग्रपूतं शुद्धोदकं शुद्धधिया प्रदत्तम्।
कल्याणि! कल्याणपरं पराणां कुरुष्व भोक्तारमिमं स्वपुत्रम् ॥ ९॥
सन्ध्याभ्रनीकाशमिदं पुरस्तात् कौशेयवासो निहितं सुमुक्ते।
देवैः सदाराधितपादपद्मे गृहाण मद्दत्तमनन्तभक्त्या ॥ १० ॥
उपवस्त्रमिदं पुरस्थितं निजहस्तेन गृहाण शर्मदे!।
अभितप्तमयोऽपि मार्दवं भजते किं न त्वयापि मोद्यते ॥ ११ ॥

सुराणां रक्षायां दनुजकुलविध्वंसनपरे!
सुगन्धं कल्याणि! प्रियमतितरांस्वीकुरु मम।
विपद्गर्तेव्यग्रं पृथुकमधुना मां प्रियतरं
विहाय त्वां मातर्ननु क इह रक्षेद्भुवितले ॥ १२॥

[illegible]तोऽसि निहितः पुरतो यः प्रसृतोऽयमधिकाञ्चनपात्रम्।
देवि! पाहि भवसागरतो मां स्वीकुरुष्व सुतरामनुमद्य ॥ १३ ॥
[illegible]लिन्दैरधिकं प्रशंसिता मालामला रम्यगुणेन योजिता।
[illegible]ः सुकण्ठे विधिवन्निपातिता करोतु वृद्धिं द्विगुणां सुवासिता ॥ १४॥
तुलसीदलजातमस्ति यत्सुतरां भाति सुदेवि! सज्जितम्।
करुणारुणताप्रकाशमन्मम गात्रं कुरु स्वीकुरुष्व तत् ॥ १५ ॥
अबीरसौभाग्यमिदं मदीयं गृहाण संज्ञे! निहितं पुरस्तात्।
एतेन [illegible]यान्ति मुदं विशोके लोके जना मानधनाः समन्तात् ॥ १६॥

सूर्यप्रियाछायायाः

सूर्यप्रिया नु ब्रह्मानन्दं वन्द्या न शावके स्वीये।
कलयति स्वीयमिहाद्य सञ्जीकृत्यासनं नितराम् ॥ १ ॥

पाद्यं तवातिविमलं वरदे! सदैव प्रस्थापितं विविधगन्धयुतं वरेण्ये।
पूतां निधाय निजदृष्टिमिहस्वकीये पुत्रेऽतिदुःखदलिते कुरु प्रीतिमन्याम् ॥ २ ॥

त्वं पालनाय जगतामतिगर्वशीला दारिद्र्यदुःख-हरणेऽसि जनैकवन्द्या।
किं लालयन्न निजबालकदत्तमर्घ्यै स्वीकृत्य तज्जननि! चाद्य ददासि धैर्यम् ॥ ३ ॥

संस्थापितं तव चिरं तपनीयकुम्भे रम्यं हि गाङ्गजलमाचमनीयमम्ब।
स्वीकार्यमद्य निजपुत्रप्रदत्तमार्पे छाये! निवारय सुतं भवतापदुःखात् ॥ ४ ॥

दुग्धं विभाति विमलं कमनीयपात्रे पानं विधाय तव देवि! दयार्द्रचित्ते।
साहाय्यमर्जयसि किं न विधाय पूर्णम् तूर्णं निजस्य पृथुकस्य च पापनाशे ॥ ५ ॥

जननि! स्वादुतरं दधिसञ्जितं मधुरमद्य गुडेन समन्वितम्।
कुरु कृपां मयि देवि! शुभप्रदे! वितर भद्रमनन्तगुणान्विते ॥ ६ ॥

देहि धैर्यमयि! ज्ञानमनन्तं दुःखसिन्धुब्रुडितस्य कृतेऽपि।
रम्यमद्य मधु भाति चिराय तद् गृहाण परिपाहि जनं स्वयम् ॥ ७ ॥

छाये! गृहाण मधुरां शुचिशर्कराञ्च हर्षैः कुरुष्व करयोश्च प्रियोदयाय।
जाने न मेऽस्तिकिल पुण्यकणोऽपि प्रायः प्रियां तव दया मधुना दधामि ॥ ८ ॥

शुद्धोदकं शुद्धधिया प्रदत्तं छाये! धृतं वातितरां पवित्रम्।
कल्याणि! कल्याणिनि स्वीयमङ्के पुत्रं विधायाति प्रियं गृहाण ॥ ९ ॥

पूजाविधिं तव न वेद्मि निलिम्पपूज्ये नो वा स्मृतं तव कदापि सुनाम वन्द्ये।
पापे मति विदधतोऽपि ममात्र मातर्वस्त्रं गृहाण करुणां मयि मुञ्च छाये ॥ १० ॥

उपवस्त्रमिदं विभाति ते गुणयुक्तं प्रियगन्धवासितम्।
करुणाकरमस्तके निजपुत्रस्य विधाय धारय ॥ ११ ॥

सन्तापमालाकलितोऽपि वालो नवालकस्तेऽद्य ददाति गन्धम्।
स्तनन्धये पोत इव स्वकीये जनेऽपि किं तेन कृपार्द्रदृष्टिः ॥१२॥
अक्षतान किमु सन्ति मदीयाः प्रसृताः प्रियतरा भुवि वन्द्ये।
स्वीकृतिं प्रियतरां ननु कृत्वा पाहि देवि! भवसागरतो माम् ॥१३॥
इयं पुष्पमाला विभात्यन्नपात्रे विपन्नाशिका हर्षदात्री सदैव।
मुदा कुर्वती कण्ठमध्ये न छाया जगत्यत्र छायेव तापातसुगाप्त्री ॥ १४ ॥
तुलसीदलमच्छमर्पितं ननु मञ्चे तपनीयनिर्मिते।
पृथुकस्य विधाय मस्तके करमद्यापि गृहाण शर्मदे ॥१५॥
अबीरसौभाग्यमिदं पुरस्तात् कल्याणि! दीनस्य गृहाण शीघ्रम्।
संसार चक्रेण विदीर्यमाणं मां बालकं तारय लोकशोकात् ॥१६॥

रथस्य

त्वं प्राणदातारमनन्तभानुं दिवादिशं धारयसि स्वमूर्ध्ना।
भारोद्वहेते तृणकल्पमेतत्प्रेम्णासनं स्यन्दन मे गृहाण ॥१॥
दिने दिने पुष्करलङ्घनाय त्वं सप्तकं धारयसे हरीणाम्।
तथापि पादैश्चलसीतिहेतोर्गृहाण पाद्यं सुखदं पदेषु ॥२॥
सुधाम्बुधौमिष्टमनन्तश्रेयो लावण्यमङ्गीकुरुषे च सिन्धौ।
नीतन्न यद्भक्तिरसेन युक्तं त्वयार्घ्यमश्वैः सममद्यपेयम् ॥३॥
त्वया कृतः कालकलाविभागः तथार्तवः प्रीतिपरास्ततैव।
अहं तु प्रीति कलये शताङ्ग! गृह्णासि चेदाचमनीयमेतद् ॥४॥
यद्धेनुभिः शुद्धतृणानि भुक्त्या प्रकल्पितं ह्यद्यमिदं विविक्तम्।
पयोऽमृतं भक्तिपरो नरोऽपं ददाति चक्रिन् सततं गृहाण ॥५॥

न चन्द्ररूपं विमलं स्वरूपे गन्धेन कल्हारसोऽस्ति यस्य।
हृद्येन दुग्धेन विनिर्मितं यत् दधित्वमेतत् रथ सन्निधे हि ॥ ६ ॥
परोपकारामितविग्रहाभिर्विनिर्मितं यन्मधुमक्षिकाभिः।
शताङ्गभानोः सह सप्तवाहैरङ्गीकुरुष्वाद्य मधुत्वमेतत् ॥ ७ ॥
यज्जीवनं विज्ञवरैः प्रमीतं सुस्वादुसर्वैरभिनन्दनीयम्।
दिवाकराश्चैः सहितो रथेश! पिबोदकं वा धृतमेव वा त्वम् ॥ ८ ॥
कौशोयसूत्रैः नितरां पवित्रैर्विनिर्मितं ग्राम्यवधूसमूहैः।
राका निशानाथ विचित्रदेह वस्त्रंमदीयं रथ धारयत्वम् ॥ ९ ॥
यज्ञोपवीतं परमं पवित्रं कौशेयसूत्रैकलितात्मरूपम्।
विशिष्टतेजः परिरक्षणाय तुरङ्गसङ्ग रथ! धारयेदम् ॥ १० ॥
काम्यं मनोज्ञरचनं शुभसूत्रपृक्तं देवैर्महर्षि-प्रवरैरभिनन्दनीयम्।
सुस्पर्शमेवमधुराकृतिलोभनीयं दत्तंमयोपवसनंरथधारयेदम्॥ ११ ॥
त्वञ्चक्रयानास्मद्भाग्यचक्रं शिवस्य मार्गे प्रहितं करोषि।
स्वीकृत्य गन्धं कुरु प्रेम येन स्वर्णे सुगन्धस्य समागमं स्यात् ॥ १२ ॥
रथेश सूर्यस्य साहाय्यमेत्य धान्यस्य वृद्धिं कुरुषे समन्तात्।
तदक्षतीभूय कृतार्थतायां पादाम्बुजे तेऽद्य समर्पयेऽहम् ॥ १३ ॥
पद्मैरकारि कठिनं तप एव वाप्यां प्राप्नोति येन सगुणैः सह प्रीतिवासम्।
पूर्णं तपोऽस्ति कलये यदिपूर्णचक्रिन्! गृहाणासिवाहसहितो नव पद्ममालाम्॥
समीकरणं शुद्धमिदं करोति समूलमुन्मूलयति प्ररोगान्।
प्रीतिं परां कण्ठगतं ददाति गृहाण काष्ठेश दल तुलस्याः ॥ १५ ॥
हरिन्मणेः स्वत्वमिदं गृहीत्वा कच्छेषुवासं विदधाति सद्यः।
रथे शते घोटमुखेषु गत्वा दूर्वातृणं सद्गतिमाप्नुयात्तत् ॥ १६ ॥
गन्धर्वनीतोऽसि दधासि चक्रं गतागतं देवपथे तनोषि।
स्वभक्तसम्पत्तियशो विधातुमवबीरसौभाग्यमिदं गृहाण ॥ १७ ॥

अथावरणदेवता

प्रथमविन्दौ मध्ये—सूर्याय नमः सूर्यमा०।

तद्दक्षिणे—ॐ रत्नादेव्यै नमः रत्नादेवीमा०। ॐ छायायै नमः छाया०। ॐ संज्ञायै नमः संज्ञा०। इति प्रथमावरणार्चनम्।

षट्दले—ॐ गुं गुरुभ्यो नमः गुरुमा०। ॐ पं परमगुरुभ्यो नमः परमगुरु०। ॐ पं. परमेष्ठीगुरुभ्यो नमः परमेष्ठिगुरुमा०। ॐ पं परात्परगुरुभ्यो नमः परात्परगुरुम०। ॐ हराय नमः हरमावा०। ॐ गणेशाय नमः गणेश०। इति द्वितीयावरणार्चनम्।

अष्टदले—ॐ त्रैलोक्यप्रकाशाय नमः त्रैलोक्यप्र०। ॐ विश्वतोमुखाय नमः विश्वतोमु०। ॐ विवस्वते नमः विवस्वतमा०। ॐ सूक्ष्मात्मने नमः सूक्ष्मात्मनमा०। ॐ सर्वतोमुखाय नमः सवतोमुखमा०। ॐ सुवर्णरेतसे नमः सुवर्णरेतसमा०। ॐ मार्तण्डाय नमः मार्तण्डमा०। ॐ सूदमात्मने नमः सूदमा०। इति तृतीयावरणार्चनम्।

पुनः तत्रैव पूर्वादिक्रमेण अष्टदले—ॐ ब्राह्मै नमः ब्राह्मी मा०। ॐ माहेश्वर्यै नमः माहेश्वरीमा०। ॐ कौमार्यै नमः कौमारीमा०। ॐ वैष्णव्यै नमः वैष्णवीमा०। ॐ वाराह्यै नमः वाराहीमा०। ॐ नारसिंह्यै नमः नारसिंहमा०। ॐ ऐन्द्र्यै नमः ऐन्द्रीमा०। ॐ चण्डिकायै नमः चण्डिकामा०। इति चतुर्थावरणार्चनम्।

अष्टदलाग्रेषु—ॐ दिनेशाय नमः दिनेशामा०। ॐ इन्द्राय नमः इन्द्रमा०। ॐ विवस्वते नमः विवस्वतमा०। ॐ पतङ्गाय

नमः पतङ्गमा०। ॐ धात्रे नमः धातारमा०। ॐ अर्यम्णे नमः अर्यम्णमा०। ॐ सवित्रे नमः सवितारमा०। ॐ शङ्करात्मने नमः शङ्करात्मनमा०। इति पञ्चमा-वरणार्चनम्।

अथ द्वादशदलेषु पूर्वा दिक्रमेण—अरुणाय नमः अरुणमा०। ॐ वेदाङ्गाय नमः वेदाङ्गमा०। ॐ भानवे नमः भानुमा०। ॐ रुद्राय नमः रुद्रमा०। ॐ विष्णवे नमः विष्णुमा०। ॐ गभस्तये नमः गभस्तिमा०। ॐ यमाय नमः यममा०। ॐ सुवर्णरेतसे नमः सुवर्णरेतसमा०। ॐ दिवाकराय नमः दिवाकरमा०। ॐ मित्राय नमः मित्रमा०। ॐ ब्रह्मणे नमः ब्रह्माणमा०। ॐ सहस्रकिरणाय नमः सहस्रकिरणमा०।

तत्रैव पूर्वादिक्रमेण—ॐ मित्रायै नमः मित्रामा०। ॐ तीव्रायै नमः तीव्रामा०। ॐ नन्दायै० नन्दामा०। ॐ वज्रहस्तायै नमः वज्रहस्तामा०। ॐ संज्ञायै नमः संज्ञामा०। ॐ भोगदायै नमः भोगदामा०। ॐ कामदायै नमः कादामा०। ॐ सुभगायै नमः सुभगामा०। ॐ स्तुतायै नमः स्तुतामा०। ॐ चिन्तायै नमः चिन्तामा० ॐ अश्विन्यै नमः अश्विनी०। ॐ सकलेश्वर्यै नमः सकलेश्वरीमा०। इति सप्तमावरणार्चनम्।

चतुरस्रेषु पूर्वादिक्रमेण—ॐ इन्द्राय नमः इन्द्रमा०। ॐ अग्नेय नमः अग्निमा०। ॐ यमाय० यममा०। ॐ निर्ऋतये० निर्ऋतिमा०। ॐ वरुणाय० वरुणमा०। ॐ वायवे० वायुमा०। ॐ सोमाय० सोममा०। ॐ ईशानाय० ईशानमा०। ॐ ब्रह्मणे०

ब्रह्माणामा०। ॐ अनन्ताय० अनन्तमा०। इति इत्यष्टमा-वरणार्चनम्।

तत्रैव क्रमेण आयुधानि—ॐ वज्राय० वज्रमा०। ॐ शक्तये० शक्तिमा०। ॐ दण्डाय० दण्डमा०। ॐ खड्गाय० खड्गमा०। ॐ पाशाय० पाशमा०। ॐ अंकुशाय० अंकुशमा०। ॐ गदायै० गदामा०। ॐ त्रिशूलया० त्रिशूलमा०। ॐ पद्माय० पद्ममा०। ॐ चक्राय नमः चक्रमा०। इति नवमावरणार्चनम्।

पूर्वपश्चिमयोः—ॐ अश्विनीकुमाराभ्यां नमः अश्विनीकुमारमा०। ॐ अष्टवसुभ्यो नमः अष्टवसूनावा०। इति दशमावरणार्चनम्।

ॐ ऋग्वेदाय नमः ऋग्वेदमा०। ॐ यजुर्वेदाय नमः यजुर्वेदमा०। ॐ सामवेदाय नमः सामवेदमा०। ॐ अथर्ववेदाय नमः अथर्ववेदमा०। इत्येकादशमा-वरणार्चनम्।

रथाग्रे—ॐ शक्त्यै नमः शक्तिमा०। ॐ धर्माय नमः धर्ममा०। ॐ अधर्माय नमः अधर्ममा०। ॐ त्रयीमयाय नमः त्रयीमयमा०। ॐ छायासूर्याभ्यां नमः छायासूर्यमा०। ॐ रत्नादित्याय नमः रत्नादित्यमा०। ॐ अश्विनीभास्कराभ्यां नमः अश्विनीभास्करमा०। ॐ संज्ञादित्याभ्यां नमः संज्ञादिव्य०। ॐ धर्मराजाय नमः धर्मराजमा०। ॐ शनये नमः शनिमा०। ॐ सावर्णिमन्वन्तराय नमः सावर्णिमन्वन्तरमा०। ॐ यमुनायै नमः यमुनामा०। ॐ तापिन्यै नमः तापिनीमा०। इति द्वादशावरणार्चनम्।

सूर्यस्य:

पुष्टि तनोति विमली कुरुते शरीर
वतादिदोषनिकरानचिरेण हन्ति।
तद्धूपद्रव्यमधुनाकमलैकबन्धो!
दत्तं मया कुरु करे दिश-भक्तिभावम् ॥१९ ॥
त्वच्चण्डभानुनिकरैर्मलिनीकृतेक्ष्णा
दीपनिधाय करयोः पथि यान्ति भक्ताः।
दोषं निवार्य घृतदीपममुं गृहीत्वा
तेजस्विनो कुरु जनानवधामराशै ॥ २० ॥
परयोरगस्तकरयोनिहितं हिंशाय
शिष्यत्वमेत्य गिरिणा मलयेन पूर्वम्।
तद्दीयते सविनयं करयोस्तवार्क!
गन्धानुलेपनमिदं करमर्दनाय ॥ २१ ॥
मधुरं शुभ्रवर्ण भूषितं, अभितः पक्कमिदं रसान्वितम्।
दिननाथ गृहाण मे फलं सफलं मे कुरु कर्म पूषण ॥ २२ ॥
यज्ञस्य साफल्यविधौ विशिष्टां शिष्टैः प्रदत्ता विनयानमद्भिः।
श्रेयस्करी प्रीतिपुरस्कृतां तां समर्पयाम्यर्क सुदक्षिणां ते ॥ २३ ॥
स्वभक्तिभावस्य सुभानि नीत्वा
करौ च विज्ञाप्य हृदा समनत्।
विनिर्मिता या सुमनोऽभिरामा
तामञ्जलि सूर्य कुरुष्व रिक्ताम् ॥ २४ ॥

संज्ञायाः

धूपद्रव्यमधिगम्य चिराय रम्यतां गतमिदं मम सद्म।
स्वागतार्थमधिकं तव छाये! स्वीकुरुष्व प्रहितं प्रियपात्रे ॥ १७ ॥

दया यस्याश्चित्ते प्रवहति सदा भूरिविभवा
बलाद्-दुःखौघान् या ग्लपयति च लुप्तांश्च कुरुते।
प्रदीपं सा संज्ञाभुवनभयनाशं विदधती इमं
स्वीकुर्यान्मे हृदि ननु वसेल्लोकजननी ॥ १८ ॥

ऋतुफलं विमलं पुरतः स्थितं प्रियतरं मम देवि! गृहाण तत्।
निजशिशावपि लोकभयार्णवे निपतिते कुरु चाद्य कृपाकरम् ॥ १९ ॥

गन्धानुलेपनमिदं हि विधाय देहे संज्ञे!
कुरुष्व करुणां मयि देवि! नित्यम्।
शुद्धां विधेहि मम चाद्य धियं वरेण्या
माश्रित्य यामहमपीह भवामि पूतः ॥ २० ॥

दक्षिण्यपूर्णेन सुदक्षिणेयं संस्थापिता देवि! करे त्वदीये।
स्वीकृत्य चेमां मयि सानुरागा भूयाः सदैवातितरां प्रसन्ना ॥ २१ ॥

सफलतां नयकीर्तिलतामिमां गुणिगणप्रिय-कोमलपल्लवाम्।
सुरभितां कमनीयकलेवरां प्रियतरां कुसुमाञ्जलिमद्य मे ॥ २२ ॥

छायायाः

शक्तिस्वरूपे! जगदात्मरूपे! गृहाण छाये! मम धूपद्रव्यम्।
विपत्समूहस्य विनाशहेतुं करं वराङ्गं पृथकस्य कृत्वा ॥ १७ ॥

शोणरुचा शिखयाति महत्या कुण्डलनं कलयन्नति हृष्टः।
स्वागतमद्य विधातुमसौ किं नृत्यति ते च चिराय प्रदीपः ॥ १८ ॥

सफलतां नय मातरिदं स्थितं ऋतुफलं विमल फलदायकम्।
निजकरं करुणायुतमद्य मे कुरु दयामयि! देवि च मस्तके ॥ १९ ॥

मातस्त्वमेव वरदासि निलिम्पपूज्ये
गन्धानुलेपनमिदं पुरतः स्थितं ते।
स्वीकृत्य देवि! सदयं हृदयं मदीयं
पूतं विधाय निजभक्तियुतं विधेहि ॥ २० ॥

सुदक्षिणा ते परितः प्रदत्ता सुदक्षिणेनातिप्रियेण छाये।
स्वीकृत्य पुत्रेण चिराय चेमां कृपाकरं देहि सुमस्तके मे ॥ २१ ॥

कुसुमाञ्जलिरद्य चार्पिता वरदे! कीर्तिलता सुगन्धिता।
अवलम्बनमेत्य ते तरोः करुणायाः फलमत्यपीह नो ॥ २२ ॥

रथस्य

मन्दारपुष्पैर्बहुगन्धयुक्तं पुरामरैः स्वर्गपुरे विधत्तम्।
तदेव ते स्यन्दन! तोषणाय समर्पयेऽहं बहुधूपद्रव्यम् ॥ १८ ॥

न हेमपात्रे मणयो विभान्ति न पुष्पतैलं कलयापि चक्रिन्।
तथापि भक्त्येकपरो नरोऽहं स्वस्नेहदीपं च समर्पयामि ॥ १९ ॥

सुवर्णपात्रे निहितं पवित्रं सुस्वादुकर्पूरपरागगौरम्।
महर्षिवृन्दैरपि नन्दनीयं नैवेद्यमेतद्रथ मे गृहाण ॥ २० ॥

मयाहितं योग्यपदं रथेश! तनुष्व सौख्यं विपुलं विधेहि।
सर्वं विजानासि वदामि किं वा फलं गृहीत्वा सफलं कुरुष्व ॥ २१ ॥

गन्धं ददाम्यद्य करे तवामुं रथेन्द्र! देहे तव लेपनाय।
तवाश्ववृन्दाय तथातिधृष्टं स्वीकृत्य सर्वे शिवमा-दिशन्तु ॥ २२ ॥

यज्ञस्य सिद्धिं सकलं ददाति लोभञ्च दातुर्विदधाति भूयः।
सुखं गृहीतुर्विदधाति तस्माद्ददामि ते स्यनन्दन ! दक्षिणांताम् ॥ २३ ॥

पुष्पैर्विचित्रैर्नवगन्धमिश्रैः प्रपूरितो मेऽञ्जलिरेष साधुः।
भावं विधातुं सुममार्दवं ते पुनर्गृहीतुं रथ ! प्रार्थये त्वाम् ॥ २४ ॥

॥ इति संक्षिप्त सूर्यपूजनम् ॥

महालक्ष्मी नित्यपूजा

ब्राह्ममूहूर्त में शयन से उठकर मस्तिष्क में श्वेतवर्ण सहस्त्रदल कमल पुष्प पर विराजित एवं अभय मुद्रावाले प्रसन्न बदन वाम भाग में स्वशक्ति से विभूषित अपने गुरुदेव का ध्यान कर उन्हें मानसिक विधि से गन्ध, पुष्प, धूप, दीप, नैवेद्य ताम्बूल समर्पित कर अपने गुरुदेव को पूजनकर्ता इस मंत्र से प्रणाम करें-

तत्र मंत्र-

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुः साक्षात् महेश्वरः।
गुरुरेव जगत् सर्वं तस्मै श्री गुरवे नमः॥

उपरोक्त श्लोक से प्रार्थना करने के पश्चात् योनिमुद्रा से अपने गुरुदेव को प्रणाम कर, उनके चरणकमल से निकली हुई अमृतधारा से अपना प्रक्षालन करते हुए निर्मल आनन्द की अनुभूति अर्थात् अनुभव करें।

मूलाधार से कुण्डली एवं षट्चक्र, भेदक्रम से ब्रह्मरंध्र में ले जाकर उस अमृतधारा को उसी में प्राप्त करते हुए नमस्कार करके अपने को मूर्तीभूत मानते हुए मूलाधार में ले जायें, मूल में ब्रह्मरंध्र पर्यन्त तक **'तेजोमय'**-

उपरोक्त मूल मंत्र को विचारते हुए मूलरंध्र से उस तेज से व्याप्त स्वदेह को विचारे। हृदय में अपनी इष्टदेवी का ध्यान कर मानसिक उपचारों से १०८ बार पूजन करे।

तेजोमय-इस मन्त्र का जप पुनः समर्पित करें पश्चात् श्रीदेवी की आज्ञा लेकर अजपाजप संकल्प सहित समर्पित करें।

ॐ षट्शतं तु गणेशस्य षट्सहस्त्रं प्रजापतेः,
षट्शतं तु गदापाणेः षट्सहस्त्रं पिनाकिनः।
जीवात्मनः सहस्त्रन्तु सहस्त्रन्तु गुरोस्तथा।
परमात्मनः सहस्त्रन्तु जपसंख्यां निवेदयेत्॥

इस अजपाजप मन्त्र का उच्चारण करे।

भूम्यै नमः–इस प्रकार ऐसा उच्चारण करके नमस्कार करते हुए श्वास के अनुसार पैर रखकर बाहर जाएं, और मूत्रोसर्ग करके हाथ–पैर धोकर आचमन करें।

श्रीम्–इस बीज मन्त्र से अपने दन्त सफा करें।

मूल–पुनः इस मंत्र से मुख धोकर तीन बार फिर से आचमन करें।

तत्पश्चात् जल में त्रिकोण मण्डल बनाकर उसमें गंगादिक सब तीर्थों का स्मरण कर उस जल को लाक्षारुण देवी का चरणामृत मानकर स्नान कर मूलमन्त्र से पुनः तीन बार आचमन करके तत्पश्चात् शुद्ध वस्त्र पहन कर पुनः तीन बार आचमन कर बांये हाथ में जल लेकर दायें हाथ से ढककर मूल से सात बार अभिमन्त्रित कर मूल से गलित जल बिन्दुओं से सात बार पूजनकर्ता अपने सिर को सम्प्रोक्षित कर शेष जल को दाहिने हाथ में लेकर–

ईड़ा–इस मंत्र से आकृष्ट कर देह के अंतः स्थित सभी पापों को दूर कर उस जल को कृष्ण वर्ण पिंगला से दाहिने हाथ में रखकर अपने सम्मुख जलती हुई वज्रशिला में छोड़कर तथा हाथ एवं पैर धोकर सूर्यमंडल में देवी का ध्यान कर जलांजलि से तीन बार मूलान्त से–**श्री भुवनेश्वर्यै नमः। इदं अर्घं नमः।**

इसी प्रकार–**ह्रां–ह्रों–सः श्री सूर्याय नमः। एषते अर्घ्यो नमः।**

इस प्रकार पूजनकर्ता तीन बार अर्घ्य देकर गायत्री देवी अथवा मूल मन्त्र का दश बार जप करके करें।

तत्र गायत्री मन्त्रः –

श्री महालक्ष्म्यै विद्महे हरिप्रियायै धीमहीः तन्नो लक्ष्मी प्रचोदयात्।

सूर्य मण्डल से देवी को अपने हृदय में स्थापित कर, मूलान्त में-

सांगाय सायुधाय सपरिवाराय श्रीभुवनेश्वरीम् समर्पयामि नमः।

उपरोक्त मन्त्र से तीन बार तर्पण करे।

॥ इति स्नान-सन्ध्या-तर्पण विधिः॥

तत्पश्चात् पूजनकर्ता अपने गृह में आकर द्वार देवताओं का इसी क्रम से पूजन करें-

वामे-गणेशाय नमः, दक्षिणे-धर्मराजाय नमः।

पश्चिमे-वरुणाय नमः, उत्तरे-कुबेराय नमः।

उपरोक्त क्रम से द्वार देवताओं का पूजन करने के पश्चात् पूजनकर्ता बायें पैर को आगे कर इस मन्त्र से ही घर में प्रवेश करे-

वाम पाद पुरुषाय नमः— इस मन्त्र को पढ़कर तीन बार ताली बजाकर समस्त विघ्नों को दूर करके इस मन्त्र से प्रणाम करे-

अपसर्पन्तु ते भूता ये भूता भुमि संस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥ १॥
वामे-गुरुभ्यो नमः, दक्षे-गं गणपतये नमः।
पृष्ठे-क्षेत्रपालाय नमः, अग्रे-भुवनेश्वर्यै नमः।

उपरोक्त क्रम से प्रणाम करके भूतशुद्धि करें, तथा मूलाधार से कुण्डली जगाकर जीवात्मा की ही पूजा करें।

हंसः इस मंत्र द्वारा परमात्मा में विलीन कर दे, तत्पश्चात् वाम कुक्षि में पंचमहापादुकात्मक पापपुरुष का ध्यान करें-

यं-इस वायु बीज से कुम्भ योग से संशोधित कर-

रं-इस अग्नि बीज से कुम्भ पूरक के योग से पाप के संदेह जलाकर-

वं-इस बीज से रेचक योग पापभस्म को बाहर निकालकर-

वं-इस बीज से देह भस्म को प्लावित कर-

लं-इस बीज दृढ़ कर सिर से पैर तक उन अंगों को निष्पादित कर-

हंसः-इस मंत्र के द्वारा जीवात्मा को हृदय में लाकर कुण्डली मूलाधार में स्थापित कर हृदय में हाथ रखकर प्राण प्रतिष्ठा करें-

ॐ आंह्रींक्रोंयंरंलंवंशंषं संलंक्षं मम प्राणाः। एवं मम जीव इह स्थितः एवं मम सर्वेन्द्रिय माणि एवं मम वागमनु चक्षु श्रोत्-जिह्वा घ्राण प्राण इहागत्य सुखं-चिरं तिष्ठन्तु स्वाहा।

॥ इति प्राणप्रतिष्ठा विधिः॥

मूल से प्राणायाम कर अथवा प्रणव से प्राणायाम कर-

पूरकं-सोलह, कुम्भकं-चौसठ, रेचकम्-बत्तीस।

अनुलोम-विलोम तीन बार करके इत्येव इस प्रकार प्राणायाम् करें। तत्पश्चात् पूजनकर्ता इस संकल्प (विनियोग) को करे-

ॐ अस्य श्रीमहा लक्ष्मीमन्त्रराजस्य भृगुऋषिः त्रिष्टुप्छन्दः श्रीमहालक्ष्मीदेवता ऐंबीजं ह्रींशक्तिः क्लींकीलकं मम श्रीधर्मार्थ-काममोक्षार्थे जपे पूजायां विनियोगः।

भृगुऋषये नमः-शिरसि १ त्रिष्टुप्छन्दसे नमो-मुखे २ श्रीमहालक्ष्म्यै देवतायै नमो-हृदये ३ ऐंबीजाय नमो-गुह्ये ४ श्रीशक्तै नमः-पादयोः ५ क्लींकीलकाय नमो-नाभौ ६ मम श्रीधर्मार्थकाममोक्षार्थे जपे विनियोगः। सर्वाङ्गे मूलने व्यापकं कुर्यात्-१ आंअगुष्ठाभ्यां नमः २ श्रींतर्जनीभ्यां नमः ३

श्रूंमध्यमाभ्यां नमः ४ श्रैंअनामिकाभ्यां नमः ५ श्रःकरतलकरपृष्ठाभ्यां नमः १।

इस प्रकार उपरोक्त क्रम से ही करन्यास करे।

षडङ्गन्यास करने का क्रम-

१ श्रांहृदयाय नमः २ श्रींशिरसे स्वाहा ३ श्रंशिखायै वषट् ४ श्रैंकवचाय हुं ५ श्रौंनेत्राभ्यां वौषट् ६ श्रांअस्त्राय फट्।

इस क्रम के अनुसार मातृका न्यास करे-[1]विनियोगः

अस्य श्रीमातृकान्यासस्य ब्रह्माऋषिः गायत्रीछन्दः श्रीमातृकासरस्वती देवता हलोबीजानि स्वराः शक्तयः अव्यक्तं कीलकं मम श्रीलक्ष्म्यङ्गत्वेन न्यासे विनियोगः।

१ अंकंखंगंघंङं आंअंगुष्ठाभ्यां नमः २ इंचंछंजंझंञं ईं तर्जनीभ्यां नमः ३ उंटंठंडंढंणं ऊंमध्यमाभ्यां नमः ४ एंतंथंदंधंनं ऐंनामिकाभ्यां नमः ५ ॐपंफंबंभंमं औंकनिष्ठकाभ्यां नमः ६ अंयंरंवंशंषंसंहंक्षंअः करतलकरपृष्ठाभ्यां नमः।

इस प्रकार करन्यास करें पश्चात् इस प्रकार देह का विन्यास कर स्वयं को काम-कला रूप सोचकर देवी का ध्यान इस क्रम से करे-

ॐ करयुगलगृहीतं पूर्णकुम्भं दधानं,
क्वचिदमलयजस्थं शंखचक्राब्जपाणिम्।
क्वचिदपि दयिताङ्गीं चामरव्यग्रहस्तां,
क्वचिदसृणिपपाशैर्विभ्रतीं हेमकान्तिम्॥

१-प्रातः कालेऽथवा पूजा समये होम कर्मणि।
जप काले समस्ते वा विनियोगः पृथक-पृथक॥

उपरोक्त श्लोक का उच्चारण करके देवी का ध्यान करने के पश्चात् मानसोपचारों से अर्चना करके तथा अपनी शक्ति के अनुसार ही जप-होम आदि करके अपने बायें भाग में षट्कोण के अन्तर्गत त्रिकोण बिन्दू का निर्माण करके उसके अन्तर्गत वृत्त (चतुरस्रमंडल) का निर्माण कर पुनः अपने से दाएँ त्रिकोण वृत्त (बिन्दूमंडल) में करके, भूमि पर ही आधारशक्ति की पूजा करके व उसके आधार की स्थापना करके उसके ऊपर '**अस्त्र**' इस मंत्र के द्वारा शोधित करके तथा 'हत्' इस मंत्र द्वारा पाशादि एवं शाखादि की स्थापना करके तथा गंगा आदि तीर्थों का आवाहन करने के पश्चात् प्रणव 'ॐ' इस मंत्र द्वारा गंधादि को रखकर अग्नि, सूर्य, सोम कलाओं की पूजा करके धेनुमुद्रा प्रदर्शित कर अपने मंत्र द्वारा ही पूजन करें। इस प्रकार सामान्य अर्घ जल देकर अपने बायें भाग में पहले बनाये हुये दशक मंडल के ऊपर आधार की स्थापना करें।

शक्तिभ्यो नमः-इत्यादिसंपूज्य नमः।

इस विधि से आधार का प्रक्षालनकर मंडल के ऊपर संस्थापित करें-

रंवह्निमण्डलदशक मण्डलात्मने नमः-इति प्रपूज्य मण्डलं फडिति कलशं प्रक्षाल्य कारणेन प्रतूल्य रक्तवस्त्रमास्या दिना संपूज्य देवीं संस्थाप्य-

अंअर्कमण्डलाय द्वादश कलात्मने नमः १ इति कलशे संपूज्य।

ओंचन्द्र मण्डलाय षोडशकलात्मने नमः १ इति द्रव्ये संपूज्य॥

फडितिसंरक्ष्य हुमित्यवगुण्ठ्य मूलेन संवीक्ष्य नमः-इत्यभ्युक्ष्य मूलेन गन्धमाघ्राय कुम्भे पुष्पं दत्वा शापमोचनं कुर्यात्।

शापमोचन मन्त्र :-

ॐ एकमेव परब्रह्म स्थूलसूक्ष्ममयध्रुवम्।
कचोद्भवां ब्रह्महत्यान्तेन ते नाशयाम्यहम्॥ १॥
सूर्यमण्डलसंभूते वरुणालयसंभवे।
अमाबीजमये देवि शुक्रशापाद्विमुच्यताम्॥ २॥
वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि।
तेन सत्येन हे! देवि ब्रह्महत्यां व्यपोहतु॥ ३॥

उपरोक्त श्लोकों का तीन बार उच्चारण करें।

ॐ वां वीं वूं वैं वौं नमः ब्रह्मशापमोचितायै सुरादेव्यै नमः।

इसका भी तीन बार उच्चारण करे।

ॐ क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुराकृष्णशापं मोचय-मोचय॥

इसका भी तीन बार उच्चारण करे।

अमृतं श्रावय-श्रावय स्वाहा।

इसका भी तीन बार उच्चारण करे।

ॐ सां सीं सूं सैं सः शुक्रशापं मोचय २ अमृतं श्रावय २ स्वाहा।
इत्येतान्मन्त्रान् वटं धृत्वा आनन्दभैरवभैरव्यौ च तत्र ध्यात्वा-
ॐ ह्रींश्रींहंसंक्षंमंलंवंरं ॐ आनन्दभैरवाय वौषट्।
सहस्त्रक्ष मंलंवंरंयंऊं सुरादेव्यै वौषट् इति॥

देव एवं देवी की तीन बार पूजा करके द्रव्य के मध्य में दाहिने ओर से तीन बार फेरी लगा कर- **अं, कं, थं**

तीन पंक्तियों में लिखकर उसके मध्य-**हं एवं क्षं**

लिखकर उसका समावेश करके द्रव्य के मध्य में अमृत का चिन्तन करके धेनुमुद्रा से अमृतमय होकर-

वं-इस, स्वच्छ बीज को जो मूलमंत्र है, उसको आठ बार धारण करके पुनः मूलमन्त्र का उच्चारण कर आत्म एवं श्रीचक्र के मध्य में त्रिकोण-षटकोणवृत्त को लिखकर चतुस्त्रादि चतुरस्त के लिए-

१. पूर्णगिरिपीठाय नमः २. उद्यानपीठाय नमः

३. कामपीठाय नमः ४. जालन्धरपीठाय नमः।

इस प्रकार पूजन करके षट्कोण में षड्ङ्ग की पूजा करके तथा-

आधार शक्तिः की भी पूजा करके त्रिकोण के (गर्भ) मध्य में यंत्रिका की स्थापना करके नमस्कार करें।

यं धूम्रार्चिषे नमः १ रं ष्ट्रायै २ लं ज्वालिन्यै नमः ३ सं विस्फुलिङ्गिन्यै नमः ४ वं सुश्रियै नमः ५ सं रूपायै नमः ६ हं कपिलायै नमः ७ लं हव्यवाहायै नमः ८ क्षं कव्यवहायै नमः ९ रं वन्हिमण्डलाय दशकलात्मने नमः १०॥

पूजनकर्ता इस प्रकार से ही पूजन करे, तथा पात्र को '**फट्**' मन्त्र से धोकर यंत्र के ऊपर स्थापित करके-

अर्क मण्डलाय द्वादशकलात्मने नमः

जल से एक भाग को भरके वहाँ सुगन्धित द्रव्य छिड़क करके-

ओं इति षोडश कलात्मने सोम मंडलाय नमः।

इस प्रकार पूजा करके पूर्व के मंत्र से द्रव्य लिख करके त्रिकोणात्मक रेखा में-

अं-सोलह, कं-सोलह, थं-सोलह।

ऐसा तीन बार लिख कर उसके मध्य में-**हं, एवं, क्षं** इन बीजों को क्रमानुसार लिखे। तत्पश्चात् गंगादि तीर्थो का आवाहन

करके आनन्दभैरव एवं भैरवी की अपने मंत्र से पूजन करके तथा दूसरे मंत्र से संशोधन करके-**हुं**

उपरोक्त बीज मंत्र से अवगुण्ठन करके धेनुमुद्रा से अमृतमय होकर तीन बार ताली बजा करके, दसों दिशाओं को संबद्ध करके उसके ऊपर मूल मंत्र को सात बार जप करके देवी का आवाहन करके पुनः तीन बार ताली बजा करके दिशाओं को सबद्ध अवगुढ़ित एवं अमृतमय करके योनिमुद्रा को प्रदर्शित करके षडङ्ग से संपूर्ण कार्य करके मत्स्यमुद्रा से पात्र को देवी के संमुख विभावन करे-

तत्पश्चात् देवी की आज्ञा लेकर गृह के समीप गुरुपात्र, शक्तिपात्र, भोगपात्र, स्वपात्र, योगिनीपात्र, वीरपात्र तथा अन्य अर्ध्य के आचमनीय पात्रों की स्थापना करके चर्वणयुक्त कारण में तत्वमुद्रा पात्र से निकाल करके गुरुओं का तर्पण करके-श्री पात्र के अमृतमय इस मूल मंत्र से-

श्रीं देवीं सायुधांसवाहनांसपरिवारां तर्पयामि नमः।

॥ इति कलश पूजा विधिः॥

कलश पूजन के पश्चात पीठ पूजा करें-

मण्डूकाय नमः, कालाग्निरुद्राय नमः, आधारशक्त्यै नमः, कमलाय नमः, प्रकृत्यै नमः, कूर्माय नमः, अनन्ताय नमः, पृथिव्यै नमः, क्षीरसमुद्राय नमः, द्वीपाय नमः, कदम्बवनाय नमः, कल्पवृक्षाय नमः, मणिमण्डलाय नमः, रत्नसिंहासनाय नमः

अग्नियादिकोणे-

धर्म्म-ज्ञान-वैराग्यै-श्वर्येभ्यो नमः

पूर्वादिअधर्मअज्ञान अवैराग्य अनैश्वर्यादिभ्यो नमः।

कर्णिकायाम्-

रं अग्नि मण्डलाय नमः, अं अर्क मण्डलाय नमः, सौः सोममण्डलाय नमः

सं सत्वाय नमः, रं रजसे नमः, वं तमसे नमः

अं अन्तरात्मने नमः, पं परमात्मने नमः, ह्रीं ज्ञानात्मने नमः

तत्पश्चात् केशर के द्वारा पूजनकर्ता इन नौशक्तियों की पूजा करें-

१-अघोरायै नमः, २-मङ्गलायै नमः, ३-ह्यौं सदाशिव महाप्रेत पद्मासनायै नमः, ४-उमायै नमः, ५-जपायै नमः, ६-अजितायै नमः, ७-अपराजितायै नमः, ८-नित्यायै नमः, ९-(विलासित्यै नमः) दोग्ध्यै नमः

इस प्रकार सूर्य की किरण समूहों को प्रणाम कर अपने हृदय में देवी का भाव इस वाक्य का उच्चारण कर के स्थापित करें-

महालक्ष्मीममृतचैतन्य मूर्ति कल्पयामि नमः।

उपर्युक्त कर्म की समाप्ति के पश्चात मूर्ति का संकल्प करने के उपरान्त यन्त्र की स्थापना करके प्राणप्रतिष्ठा करे जिसका क्रम यह है-

ओं आंह्रींक्रोंयंरंलंवंशंषंसंनंलंक्षं श्रीमहालक्ष्म्या प्राणा इह प्राणाः एवं जीव इहस्थितः, एवं सर्वेन्द्रियाणि वाग्मनश्चक्षुश्रोत्रजिह्वाघ्राणप्राणइहागत्यं सुखं चिरं तिष्ठन्तु स्वाहा। श्रीभगवतिमहालक्ष्मि इहा गच्छ २ इह तिष्ठ २ इहसन्निधेहि २ इहसन्निरुद्धा भव २ अत्राधिष्ठानं कुरु मम पूजां गृहाण नमः।

देव्याङ्ग-ह्रां हृदयाय नमः

इस प्रकार पूजनकर्ता तीन बार ताली बजाकर दिग्बन्धनं कर्म करे। इसके बाद निम्न मंत्रों से ध्यान करें-

श्री महालक्ष्मी इंदमासनं नमः। एवमर्घ्यै स्वधा एवं पाद्यं नमः।

एवमाचमनीय नमः। एवं वस्त्रं नमः। एवं गन्धं नमः।

एवं अक्षतपुष्पाणि वौषट् एवं धूपं नमः दीपं नमः।

नैवेद्य को सामने रखकर कर्त्ता अर्घ के जल से '**अस्त्रतायफट्**' यह कहकर धेनुमुद्रा प्रदर्शित करें, तथा मूल मंत्र का आठ बार जाप करें तथा और इस वाक्य का उच्चारण कर के-**श्रीमहालक्ष्म्यै नमः**, कह कर देवी को नैवेद्य समर्पित करें। उपरान्त इस वाक्य का उच्चारण कर-**अमृतोपस्तरण मसि स्वाहा**, कहकर जल को पृथ्वी पर छोड़ दे उसके पश्चात् **पुनराचमनीयं नमः**, कहकर आचमनीय जल छोड़ दे तथा-**ताम्बूलं नमः**, कहकर ताम्बूल लक्ष्मी देवी को समर्पित करें।

उपर्युक्त कर्म के तत्पश्चात् तीन बार पुष्पांजलि के द्वारा पूजा करके मूलमंत्र का जप पूजनकर्ता स्वयं करें।

श्री महालक्ष्मीं तर्पयामि स्वाहेति-तीन बार कहकर **संत्प्यं संत्पर्य इति बिन्दौ आवरणपूजा मारभेत्।**

तत्रादौ-

गुरुपक्तिक्रमेण गुरु श्रीगुरु पादुकां पूजयामितर्पयामि।

एवं परमगुरुः श्री पादुकां पूजयामि तर्पयामि।

एवं परमेष्टिगुरुः श्री पादुकां पूजयामि तर्पयामि।

परापद गुरु श्री पादुकां पूजयामि तर्पयामि।

सिद्धौघ श्रीपादुकां पूजयामि तर्पयामि।

गुरु श्री दिव्यौघगुरु: श्री पादुकां पूजयामि तर्पयामि।

मानवोध गुरु श्री पादुकां पूजयामि तर्पयामि।

विभूतिं श्री पादुकां पूजयामि तर्पयामि।

उन्नति श्री पादुकांति श्री पादुकां पूजयामि तर्पयामि।

सृष्टि श्री पादुकां पूजयामि तर्पयामि।

कीर्ति श्री पादुकां पूजयामि तर्पयामि।

सन्तति श्री पादुकां पूजयामि तर्पयामि।

व्युष्टि श्री पादुकां पूजयामि तर्पयाामि।

उत्कृषि श्री पादुकां पूजयामि तर्पयामि।

वृद्धि श्री पादुकां पूजयामि तर्पयामि।

इतिकोणेषु शक्ति: संपूज्य वामावर्त्तेन दिग्विदिग्दलेषु अष्टपत्रे दिग्दलेषु दक्षिणावर्तेन।

वासुदेव श्री पूजयामि तर्पयामि

सङ्कर्षण श्री०। प्रद्युम्नश्री०। अनिरूद्धश्री०। ततो विदिग्दलेषुदमनकश्री०। सलिलश्री०। गुग्गुल श्रीकुरुण्डकश्री०। इतिद्वितीयावरणम्।देवीदक्षिणपार्श्वे शंखनिधिश्री०।पंकजनिधिश्री०। वमुनिधिश्री०। वसुमतीनिधिश्री०। इतितृतीयवरर्ण ३ ततोदलाग्रेषुवलाकाश्री०।विमलाश्री०।वनमालिकाश्री०।इतिसंपूज्य चतुर्थावरणम्। तद्वहि:इन्द्रश्री० पा०। अग्निश्री०। यमलश्री०। नृतिश्री०।वरुणश्री०।वायुश्री०।कुवेरश्री०।ईशानश्री०।ब्रह्मश्री०। विष्णुश्री०। इतिसंपूज्य तद्वहि:-वज्रश्री०। शक्तिश्री०। दंडश्री०। खड्गश्री०। पादूकाश्री०। पाशश्री०। ध्वजश्री०। गदाश्री०।

त्रिशूलश्री०। पद्मश्री०। चक्रश्री०। इति संपूज्य दद्वहिः भैरवीश्री०। वेतालभैरवश्री०। त्रिपुरान्तकभैरवश्री०। एकपादभैरवश्री०। अग्निजिह्वाभैरवश्री०। रूपभैरवश्री०। कालांतकभैरवश्री०। कपालभैरवश्री०। मलयभैरवश्री०। हाटकेश्वरभैरवश्री० इतिसंपूज्य सप्तमावरणम्। चतुष्कोणेषु-ईशानादिबटुकभैरवश्री०। योगिनीश्रीपादु०। क्षेत्रपालश्री०। गणेशश्री०।

उपर्युक्त क्रमानुसार पूजा करके आवरणों का संतर्पण करके प्राणायाम पूर्वक यथाशक्ति किये हुए जाप को समर्पित कर कवचसहस्त्राम एवं स्तव का पाठ करे।

तथा निम्न श्लोक का उच्चारण पूजनकर्ता करें-

गुह्यातिगुह्यगोप्त्री त्वं गृहाणात्स्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् महेश्वरि ॥

देवी के बायें हाथ में '**तेजोमय**' जप का फल समर्पित कर होम कर्म करे, होम के पश्चात् बलिदान करे तथा निम्नवाक्य का उच्चारण करें-

इतः प्राण बुद्धि देह धर्माधिकारतो जाग्रत् स्वप्न सुषुप्तावस्थासु मन सावा चापद्भ्यामुदरेण शिश्नायत्कृतं यदुक्तं यत्स्मृतं तत्सर्वमदीयं श्रीमहालक्ष्मी चरणकमलार्पण मस्तु स्वाहा श्री भगवति महालक्ष्मी पूजिता क्षमस्वेति।

तत्पश्चात्-संहारमुद्रा से पुष्प लेकर तथा उसे सूंघ कर जिस नाक से श्वास चल रहा हो, उसके द्वारा देवी को हृदयकमल में अर्पित कर अपने को देवी रूप सोच कर निर्माल्य को मस्तक पर धारण कर के नैवेद्य का भक्षण कर सुखपूर्वक विचरण करें।

॥ इति महालक्ष्मी नित्यपूजा समाप्तः ॥

दुर्गा-प्रतिष्ठा

ज्योतिषी के द्वारा दिये गये शुभ समय में तथा शुभदिन में यजमान स्नानादि कार्यो से निवृत हो जाने के उपरान्त आचमन एवं प्राणायाम कर शुभासन पर सपत्नी सहित पूर्वाभिमुख अथवा उत्तराभिमुख बैठ कर स्वयं के ऊपर और समस्त प्रतिष्ठा सामग्री की पवित्रता के हेतु इस श्लोक का उच्चारण करते हुए जल छिड़कें-

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।

यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु।

इसके पश्चात् यजमान के दायें हाथ में पुष्प एवं अक्षत प्रदान करके आचार्य सहित सभी ब्राह्मण शान्ति पाठ करें-

१-हरिः ॐ आ नो भद्राः क्रतवो यन्तु व्विश्वतो ऽदब्धासोऽअपरीतास ऽउद्भिदः। देवा नो यथा सदमिद्वृधे ऽअसन्नप्प्रायुवो रक्षितारो दिवे दिवे॥

२-देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्त्तताम्। देवानाꣳ सख्यमुपसेदिमा व्वयं देवा नऽआयुः प्प्रतिरन्तु जीवसे॥

३-तान्पूर्व्वया निविदा हूमहे व्वयं भगं मित्रमदितिन्दक्षमस्त्रिधम्। अर्यमणं व्वरुणꣳ सोममश्विना सरस्वती नः सुभगामयस्करत्॥

४-तन्नो व्वातो मयोभुव्वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः। तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विनाशृणुतं धिष्ण्या युवम्॥

५- तमीशानं जगतस्तस्थुषस्प्पतिं धियञ्जिन्वमवसे हूमहे व्वयम्। पूषा नो यथा व्वेदसा मसद् वृधे रक्षितापायुरदब्धः स्वस्तये॥

६-स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्प्पतिर्द्दधातु॥

७-पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो व्विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो व्विश्वे नो देवा ऽअवसागमन्निह॥

८-भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्य्यजत्राः। स्थिरै- रङ्गैस्तुष्टुवाꣳस स्तनूभिर्व्यशेमहि देवहितं य्यदायुः॥

९-शतमिन्नु शरदो ऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्यारीरिषतायुर्ग्गन्तोः॥

१०-अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः। व्विश्वे देवा ऽअदितिः पञ्च जना ऽअदितिर्ज्जातमदितिर्ज्जनित्वम्॥

११-द्यौः शान्तिरन्तरिक्षठं० शान्तिः पृथ्वी शान्तिरापः शान्तिरोषधयः शान्तिः। व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व्वठं० शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥

१२-यतो यतः समीहसे ततो नो ऽअभयं कुरु। शन्नः कुरु प्प्रजाब्भ्यो ऽभयं नः पशुब्भ्यः॥ ॐ शान्तिः सुशान्तिः सर्वारिष्टशान्तिर्भवतु॥

शान्तिपाठ के पश्चात् यजमान के हाथ में दिए गये पुष्प एवं अक्षत को भूमि पर अथवा पूर्वनिर्मित गणेश एवं गौरी के ऊपर आचार्य समर्पित करवा दें, पुनः यजमान के दायें हाथ में पुष्पाक्षत् देकर इन नाममन्त्रों का क्रम पूर्वक उच्चारण करते हुए यजमान से ही पुष्प एवं अक्षत का प्रक्षेप करवाये या नाम मंत्र के अंत में प्रक्षेप करवायें-

[1]ॐ लक्ष्मीनारायणाभ्यां नमः। ॐ उमामहेश्वराभ्यां नमः। ॐ वाणीहिरण्यगर्भाभ्यां नमः। ॐ शचीपुरन्दराभ्यां नमः। ॐ मातृपितृचरण कमलेभ्यो नमः। ॐ इष्टदेवताभ्यो नमः। ॐ ग्रामदेवताभ्यो नमः। ॐ कुल देवताभ्यो नमः। ॐ स्थानदेवताभ्यो नमः। ॐ एतत्कर्मप्रधानदेवताभ्यो नमः। ॐ गुरुचरणकमलेभ्यो नमः। ॐ सर्वेभ्यो देवेभ्यो नमः। ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः। ॐ भूर्भुवः स्वः श्रीसिद्धिबुद्धिसहिताय ॐ महागणाधिपतयेनमः।

१: त्रिमात्रः प्रणवो वाच्यः कर्मारम्भे च सर्वदा।

तत्पश्चात् इन श्लोकों का आचार्य उच्चारण करे तथा अपने यजमान से भी इसका उच्चारण करवायें-

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥ १ ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥ २ ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥ ३ ॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥ ४ ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥ ५ ॥
वक्रतुण्ड! महाकाय! कोटिसूर्य समप्रभ!।
अविघ्नं कुरु मे देव! सर्वकार्येषु सर्वदा॥ ६ ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके!।
शरण्ये त्र्यम्बके गौरि नारायणि! नमोऽस्तु ते॥ ७ ॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः॥ ८ ॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ ९ ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ १० ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ११ ॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ १२ ॥
स्मृते सकलकल्याणभाजनं यत्र जायते।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ १३ ॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १४ ॥
विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥ १५ ॥

यजमान के दायें हाथ में जल, अक्षत, पूगीफल यथाशक्ति द्रव्य देकर उससे इस संकल्प को आचार्य करावें–

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे अविमुक्तवाराणसीक्षेत्रेमहाश्मशाने आनन्दवने गौरीमुखे त्रिकण्टकविराजिते भागीरथ्याः पश्चिमे तीरे (इति काश्यामेवविशेषः) अमुकनाम्नि संवत्सरे, अमुकायने अमुकऋतौ, महामाङ्गल्यप्रदमासोत्तमे मासे, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकराशिस्थितेचन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते

देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुक शर्माऽहं (वर्माः, गुप्तः, दासः) मम सपत्नीकस्य शाश्वत ब्रह्मलोकप्राप्तिकामनया दीर्घायुर्लक्ष्मी सर्वकाम समृद्धि- अक्षय्यसुख प्राप्त्यर्थं श्रीदुर्गा देवी प्रीत्यर्थं दुर्गाप्रतिष्ठाख्यं कर्म करिष्ये। तदङ्गत्वेन स्वस्तिपुण्याहवाचनं, मातृकापूजनं, वसोर्धारापूजनम्, आयुष्यमंत्रजपं, नान्दीश्राद्धम्, आचार्यादिवरणं च करिष्ये। तत्रादौ निर्विघ्नता सिद्ध्यर्थं गणेशाम्बिकयोः पूजनं करिष्ये।

संकल्प के उपरान्त गणेश पूजन से नान्दीश्राद्ध तक के कर्म ग्रहशान्तिप्रयोग से करें।

यह संकल्प पुनः करें-

देशकालौ संकीर्त्य-अथाचार्य दुर्गाप्रतिष्ठाख्येकर्मणि अमुकशर्मणः यजमानेन वृतोऽहमाचार्य कर्म करिष्ये।

इन श्लोकों का उच्चारण कर आचार्य पीली सरसों को बिखेर कर पंचगव्य से प्रोक्षण करे, उसके पश्चात् शुद्धोदक जल से पुनः प्रोक्षण करें-

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्।
सर्वेषामविरोधेन प्रतिष्ठाकर्म समारभे॥

आचार्य इस वैदिक मंत्र का उच्चारण कर शुद्धजलसे पुनः प्रोक्षण करें:-

ॐ आपो हि ष्ट्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन। महे रणाय चक्षसे।

प्रोक्षण के उपरान्त नवनिर्मित मंडप में शंकुरोपण व ब्रह्मादि देवताओं की स्थापना व पूजन, बलिदान सूत्रवेष्टन, दुग्धधारा एवं मुदकधारा इत्यादि कर्म आचार्य प्रभुविद्याप्रतिष्ठार्णव से करावें।

उपरोक्त कर्म के समापन के पश्चात यह कहें-

'देवा आयान्तु यातुधाना अपयान्तु विष्णो देवयजनं रक्षस्व।'

इस कर्म की समाप्ति के पश्चात् आचार्य रात्रिमें पंचगव्य-दूर्वाङ्कुर-यव-अवश्वत्थ-पलाश से मिश्रित जल से ही इस मंत्र का उच्चारण कर दुर्गादेवी की मूर्ति का अभिसिंचन करें-

ॐ आपो हि ष्ट्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन। महे रणाय चक्षसे।

इस मंत्र का उच्चारण करते हुए पुष्प-फल-अक्षत और दुर्वाङ्कुरादि यजमान से देवीपर आचार्य चढ़वाये--

ॐ जातवेदसे सुनवाम सोममरातीयतोऽ नि दहाति वेदः। स नः पर्षदति दुर्गाणि विश्वानानेव सिन्धुं दुरितात्यग्निः॥

इस प्रकार स्थापनादि कृत्य करके दुर्गा देवी की मूर्ति के बायें हाथ में इस मंत्र का उच्चारण करके आचार्य प्रतिसरसूत्र यजमान से बधवायें-

ॐ रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहन्तंव्वलगमुत्कि-रामियम्मे निष्ट्यो यममात्यो निचखानेदमहन्तंव्वलग-मुत्किरामियम्मेसमानोयमसमा-नोनिचखाने दमहन्तंव्व-

लगमुत्कि रामियम्मे सबन्धुर्य्यमसबन्धु र्न्निचखाने दमहन्तंव्वलगमुत्किरामियम्मे सजातोयमसजातो निचखा-नोत्कत्यांङ्किरामि॥

इस वाक्य का उच्चारण कर पंचोपचार से पूजन करावें-

ॐ दुर्गा देव्यै नमः

पूजनादि करने के पश्चात् वस्त्रों और कुशा से देवी को ढंक दे। पश्चात् इन दो वैदिक मंत्रों का उच्चारण करते हुए आचार्य जलाधिवास कर्म को करावें-

१-ॐ तत्वा यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः। अहेडमानो व्वरुणेह बोद्धचरुशर्ठ० स मा न ऽआयुः प्रमोषीः॥

२-उदुत्तमं वरुण पाशमस्मदबाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते तवनागासो अदितये स्याम॥

द्वितीय दिन मण्डल के देवताओं की स्थापना और पूजन करके प्रत्येक द्वार पर आठ कलश रखवा कर वरुणदेव का आवाहन करवाके यजमान से विधिवत् उनके पूजनादि कर्म को आचार्य करावें-

इस वैदिक मन्त्र का उच्चारण करके आचार्य यजमान से उत्थापन कर्म करवायें-

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उप प्रयन्तु मरुतः सुदानवऽइन्द्र प्राशूर्भवा सचा॥

इसके पश्चात् आचार्य विधिवत पुण्याहवाचन करावें व इस श्लोक का उच्चारण करवाते हुए, आचार्य अपने यजमान से प्रार्थना करवायें-

ॐ स्वागतं देवि देवेशि नमस्ते विश्वरूपिणि।
शुद्धेऽपि त्वधिष्ठाने शुद्धिं कुर्मः सहस्वताम्॥

उपरान्त वल्मीक और कषाय का लेपन देवी की मूर्ति पर करें और स्थिर हृदय से शुद्धोदक जल से मूर्ति को स्नान करवायें-

ॐ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्त ऽआश्विनाः श्येतः श्येताक्षोऽरुणस्ते रुद्द्राय पशुपतये कर्ण्णा यामा ऽअवलिप्ता रौद्द्रा नभोरूपाः पार्ज्जन्न्याः।

शुद्धोदक जल से स्नान करवाने के पश्चात् इन श्रीसूक्त के श्लोकों का उच्चारण करते हुए मूर्ति को पंचगव्य से स्नान करवाये-

हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्।
चन्द्रां हिरणमयीं लक्ष्मीं जातवेदो म आ वह॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणं प्र पद्ये ऽअलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥

शमी, खदिर, पलाश, बिल्व अश्वथादि, वृक्षों के कसायोदक के द्वारा ही इस मंत्र का उच्चारण करते हुए आचार्य अभिसिंञ्चन कर्म करवायें-

ॐ अश्वत्थे वो निषदनं पर्ण्णे वो व्वसतिष्कृता। गोभाज ऽइत्किलासथयत्सनवथ पूरुषम्॥

आचार्य मणि, मुक्ता, प्रवाल और स्वर्ण के जल से तथा पूर्व स्थापित चार कलशों के जल से इस मन्त्र का उच्चारण कर अभिसिंचन कर्म करावें-

ॐ आपो हि ष्ठा मयो भुवस्ता न ऽऊर्ज्जे दधातन। महे रणाय चक्षसे॥

ब्राह्मणों के साथ आचार्य भी अष्टसहस्त्र, अष्टसत् अथवा आठ बार मात्र ही पढ़ कर जल गिरा देवें। देवी के पीठानन्तर में प्रवेश करके वस्त्रयुग्म, गन्ध, अक्षत, पुष्प, दीप, नैवेद्यादि से पूजन करवाने के उपरान्त किसी तेजसपात्र में स्थित मधु को स्वर्ण की शलाका से ग्रहण करके नेत्रोन्मीलन कर्म को आचार्य विधिवत् निम्न क्रमानुसार करवायें-

आचार्य दुर्गा की मूर्ति के मुख तथा नेत्र में स्वर्ण की शलाका के द्वारा सहत-घृत मिश्रित कर इस आधे मंत्र का उच्चारण करके चिह्न करें-

ॐ चित्रं देवानामुदगादनीकं चक्षुर्म्मित्रस्य वरुणस्याग्नेः।

इस मंत्र का आचार्य उच्चारण करके पायस, भक्ष्य, भोज्य, दर्पणादि मूर्ति को दिखा दें-

ॐ आ कृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतं मर्त्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥

इस प्रकार से नेत्रोन्मीलन कर्म करवाने के उपरान्त दुर्गा देवी की मूर्ति के समक्ष नारिकेल अथवा कोहड़े की बलि प्रदर्शित करें।

निम्न आठ-मंत्रों का क्रमानुसार उच्चारण करते हुए आठ दीपक देवी के सम्मुख दिखा देवें-

१-हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।

२-य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्यु कस्मै देवाय हविषा विधेम॥

३-यः प्राणतो निमिषतो महित्वैक इन्द्राजा जगतो बभूव। य इशे अस्य द्विपदश्चतुष्पद कस्मै देवाय हविषा विधेम॥

४-यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः। यस्येमाः प्रदिशो यस्य बाहु कस्मै देवाय हविषा विधेम॥

५-येन द्यौरुग्रा पृथिवी च इडहा येन स्वः स्तभितं येन नाकः। यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥

६–यं क्रन्दसी अवसा तस्तमाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम॥

७–आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्। ततो देवानां समवर्ततासुरे कः कस्मै देवाय हविषा विधेम॥

८–यश्चिदापो महिना पर्यपश्यद् दक्षं दधानां जनयन्तीर्यज्ञम्। यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम॥

उपरान्त आचार्य देवी के पीछे की ओर खड़े होकर सतूर्यघोष करें तथा इस वैदिक मन्त्र का उच्चारण करके दुर्गा के एक–एक नेत्र को खोल देवें–

ॐ चित्रं देवानामुदगादनीकं चक्षुर्म्मित्रस्य वरुणस्याग्नेः।

इस कर्म की समाप्ति के उपरान्त–

ॐ नमो भगवती दुर्गायै हिरण्यरेतस्यै परायै परमात्मायै हिरण्यरूपिण्यै शिवप्रियायै नमः॥

इस क्रम के अनुसार ही नेत्राकार लिखकर अंजन और मधुअंजन दुर्गा देवी को प्रदान करें। पश्चात् नेत्रोन्मीलन के अंगत्व यजमान अपने आचार्य को इस संकल्प का उच्चारण करके गौदान देवे।

संकल्पः–

देश कालौ संकीर्त्य-नेत्रोन्मीलन अङ्गत्वे गोदानं अहं करिष्ये।

गौदान कर्म के पश्चात् निम्न मन्त्र का उच्चारण कर आचार्य उत्थापन कर्म करवाये–

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उप प्रयन्तु मरुतः सुदानव ऽइन्द्र प्राशूर्भवा सचा॥

उत्थापन की समाप्ति के पश्चात् कुशा के आसन को एक वस्त्र से आच्छादित कर ब्रह्ममण्डल पर देवी को शयन करा देवें, तथा देवी के दक्षिण पार्श्व की ओर छत्र, व्यंजन और पंखा तथा चरणों में पादुका पीछे की ओर शान्तिकुम्भ रखें। देवी के सम्मुख आसन, दर्पण, घण्टा तथा नानाप्रकार की भोज्य वस्तुएँ एवं शीतल व सुगन्धितजल स्वच्छपात्र में रक्खे, इसके पश्चात् भस्म, तिल, अदर्भ देवी के चारों ओर रक्षा हेतु तीन प्रकार्य करके आचार्य स्थाण्डिल का निर्माण विधिवत् करे एवं अग्नि को प्रतिष्ठापित कर उसमें ही द्रव्य का त्याग यजमान से ही करावें।

प्रधान होम कर्म–

प्रधान होम के अंत में '**तामग्निवर्णाः**' मन्त्र का उच्चारण होते ही यजमान देवी के चरणों का स्पर्श करें–

इस मन्त्र का उच्चारण होते ही यजमान देवी की नाभि का स्पर्श करें–

ॐ अग्ने त्वं पारयानव्यो अस्मान् त्स्वस्तिभिरति दुर्गाणिविश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः॥

इस मंत्र का उच्चारण होते ही यजमान देवी के सिर का स्पर्श करें–

ॐ विश्वानिदेव सवितर्दुरितानि परासुव यद् भद्रं तन्न ऽआसुव।

आचार्य द्वारा इस मंत्र का उच्चारण होने पर देवी के सभी अंगों का स्पर्श करें–

ॐ जातवेदसे सुनवाम सोममरातीयतोऽनि दहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥

निम्न दो मन्त्रों का उच्चारण करते हुए आचार्य दुर्गादेवी का उत्थापन करावें–

१–ॐ उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृक्षे विश्वाय सूर्यम्॥

२–ॐ जातवेदसे सुनवाम सोममरातीयतोऽ नि दहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥

पश्चात् देवालय अथवा मंडप में आचार्य सहित यजमान प्रवेश कर मणि, मुक्ता, प्रवाल, सुवर्ण, रजत का गर्त में निक्षेपन कर आचार्य सहित सभी ब्राह्मण विधिवत् देवी की स्थापना करावे।

पश्चात् आचार्य इस वैदिक मंत्र का उच्चारण करते हुए देवी का स्पर्श एवं जाप करावें।

ॐ आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठा विचाचलिः। विशस्त्वा सर्व्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत्॥

स्पर्श एवं जाप के पश्चात् आचार्य इसप्रकार से दुर्गा देवी का षडङ्गन्यास यजमान से करावें–

१–ॐ ऐं हृदयाय नमः, २–ॐ ह्रीं शिर से स्वाहा, ३–ॐ क्लीं शिखायै वषट् ४–ॐ चामुण्डायै कवचाय हुं ५–ॐ विच्चे नेत्र त्रयाय वौषट् ६–ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे-अस्त्राय फट्

षडङ्गन्यास करने के पश्चात् निम्न क्रमानुसार आचार्य प्राणप्रतिष्ठा करावें।

कर्ता विनियोग करें–

अस्यश्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि चैतन्य रूपिणी जगत्सृष्टिकर्त्री प्राणशक्तिर्देवता आंबीजं, ह्रीं शक्तिः, क्रीं कीलकं प्राणप्रतिष्ठापने विनियोगः।

ॐ आं ह्रीं क्रीं अं कं खं गं घं ङं आकाशवाय्वग्नि-जलमभ्यात्मने आम्-अङ्गुष्ठाभ्यां नमः।

ॐ आं ह्रीं क्रीं इं चं छं जं झं ञं शब्दस्पर्शरूपरसगन्धात्मने ईं-तर्जनीभ्यां नमः।

ॐ आं ह्रीं क्रीं उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुघ्राणात्मने ओं-मध्यमाभ्यां नमः।

ॐ आं ह्रीं क्रीं एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं–अनाभिकाभ्यां नमः।

ॐ ह्रीं क्रीं पं फं बं भं मं वचनदानाविहरणोत्स-र्गानन्दात्मने ओं–कनिष्ठिकाभ्यां नमः।

ॐ आं ह्रीं क्रीं अं यं रं लं वं शं षं सं हं क्षं मनोबुध्यहङ्का-रनिवृत्तात्मने ओं–करतलकरपृष्ठाभ्यां नमः–एवं हृदयादि।

इस प्रकार से ध्यान करवाके प्राणप्रतिष्ठा करावें-

ॐ आं ह्रीं क्रीं यं रं लं वं शं षं हं क्षं सः देव्या प्राणाः। ॐ आं क्रीं ॐ यं रं हं सः देव्याः इह स्थितः। ॐ आं ह्रीं क्रीं ॐ यं रं लं देव्याः सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षु श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थ इह देव्याः आगत्य सुखं चिरं तिष्ठन्तु स्वाहा।

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

॥इति सजीवं ध्यायेत्॥

आचार्य देवी के दाहिने कर्ण में निम्न दुर्गा गायत्री मंत्र का जप यजमान से करावें-

गायत्री मन्त्रः- कात्यायनाय विद्महे कन्याकुमारि धीमहि तन्नोदुर्गा प्रचोदयात्।

जाप के पश्चात् यह प्रार्थना करें-

स्वागतं देवि देवेशि मद्भाग्यात्त्वमिहागतः।
सन्निध्यं सर्वदा देविदुर्गेऽस्मिन्परिकल्पय॥

तत्पश्चात् आचार्य शेष चार कलशों को लाकर उनमें से एक में रत्न डालकर उस रत्नमिश्रित जल के द्वारा देवी का अभिसिंचन करें।

पुनः इस वैदिक मंत्र का उच्चारण करके आचार्य कूर्चासन कर्म करावे-

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥

दूर्वा, विष्णुक्रान्ता, श्यामाक, पद्मपत्र मिश्रित कलशों के जल से इस श्लोक का उच्चारण कर देवी को आचार्य अर्घ्य प्रदान करावें-

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥

एला, लवङ्ग, कर्पूर मिश्रित कलश के जल से आचार्य इस श्लोक का उच्चारण कर देवी को आचमन करावें-

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥

इस कनिक्रद[1] सूक्त का उच्चारण कर देवी को अभ्यङ्ग विधि से स्नान करावे और पंचामृत चढ़ावें।

पुनः इस श्लोक का उच्चारण कर शुद्धोदक प्रदान करावें-

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या ऽअलक्ष्मीः॥

[2]अलंरूद्रमितिसूक्त, आपोहिष्ठाकी तीन ऋचायें हिरण्वर्णाः शुचयः, पवमानः सुवर्जनः इन व्याहृतियों से एवं र्देवस्यत्वेति। इन मंत्रों से स्नान करवा कर चुपचाप आचार्य अमंत्रक आचमन भी करावें।

आचार्य इस श्लोक का उच्चारण कर देवीको वस्त्र प्रदान करावें-

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥

---

१. कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम्। सुमङ्गलश्च शकुने भवासि मा त्वा काचिदमिभा विश्वाविदत्। मा त्वा श्येन उद वधीन्मा सुपर्णो मा त्वा विददिषुमान् वीरो अस्ता। पित्र्यामनु प्रदिशं कनिक्रदत् सुमंगलो भद्रवादी वदेह वदेह अव क्रन्दः दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकुन्ते। मा नः स्तेन ईशत माघशंसो बृहद् वदेम विदथे सुवीराः॥ (ऋ०२।४२।१-३)

२. अलंरुद्रमितिसूक्त से देवस्यत्वेति तक के सभी कर्मो को प्रतिष्ठामयूख के द्वारा आचार्य करावें।

आचार्य इस श्लोक का उच्चारण कर देवी कोयज्ञोपवीत और आचमनीय प्रदान करावें।

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्हम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥

पश्चात् नाम मंत्रों के द्वारा यजमान प्रतिसरसूत्र खोलकर, देवीको नमस्कार करें पुनः आचार्य निम्न श्लोक का उच्चारण कर देवी को गंध प्रदान करावें–

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
इश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥

इस श्रीसूक्त के श्लोक एवं इस वैदिक मंत्र का आचार्य उच्चारण कर देवी को पुष्प समर्पित करावें–

मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥
ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः।
बृहस्पति प्प्रसूतास्तानो मुञ्चन्त्वर्ठ० हसः॥

पुष्प समर्पित करवाने के पश्चात् आचार्य इस वैदिक मंत्र का उच्चारण कर देवी को सौभाग्य सामग्री प्रदान करावें–

ॐ अहिरिव भोगैः पर्य्येति बाहुं ज्यायां हेतिं प्परिबाधमानः। हस्तग्घ्नो व्विश्वा व्वयुनानि व्विद्वान्न-पुमान्पुमार्ठ० सं प्परिपातु व्विश्वतः।

आचार्य इस श्लोक का उच्चारण कर देवी को धूप दीखायें–

कर्दमेन प्रजाभूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥

आचार्य इस श्लोक का उच्चारण कर देवीको दीपक दीखायें–

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।

नि च देवीं मातरं श्रियं वासय मे कुले॥

आचार्य इस श्लोक का उच्चारण कर देवी को नैवेद्य प्रदान करावे इसके पश्चात् क्रमशः आचमन एवं चन्दनादि प्रदान करवायें–

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

आचार्य इस श्लोक का उच्चारण कर देवी को पूगीफल एवं ताम्बूल प्रदान करावें–

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।

सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

आचार्य इस वैदिक मंत्र का उच्चारण कर देवी के सम्मुख श्रद्धा भक्ति से यजमान दक्षिणा प्रदान करावें–

ॐ हिरण्यगर्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेक ऽआसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा व्विधेम॥

आचार्य इस श्लोक का उच्चारण कर देवीके समक्ष कपूर की आरती घूमाये–

ॐ इदर्ठ० हविः प्रजननं मे ऽअस्तु दशवीरर्ठ० सर्व्वगणर्ठ० स्वस्तये। आत्मसनि प्प्रजासनि पशुसनि लोकसन्न्यभयसनि। अग्निः प्प्रजां बहुलां मे करोत्त्वन्नं पयो रेतो ऽअस्म्मासु धत्त। आ रात्त्रि पार्थ्थिवर्ठ० रजः पितुरप्प्रायि

धामभिः। दिवः सदार्ठ० सि बृहती व्वितिष्ठुस ऽआ त्त्वे षं वर्त्तते तमः॥

आचार्य इन तीन मंत्रों का उच्चारण करके दुर्गा देवी को यजमान से पुष्पाजंलि प्रदान करावे तथा प्रणाम करावे व उनकी प्रदक्षिणा भी करावे-

तां म ऽआवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यांहिरण्यंप्रभूतंगावो दास्योऽश्वान्विन्देयं पुरुषानहम्॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साद्ध्याः सन्ति देवाः॥

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥

अब आचार्य ब्रह्मादिमंडल के लिए एक-एक आज्य [1]आहुति यजमान से प्रदान करवा के आचार्य इस वैदिक मंत्र का उच्चारण करते हुए यजमान से अग्नि का पूजन करवायें-

ॐ अग्ग्ने नय सुपथा राये ऽअस्मान् विश्वानि देव व्वयुनानि व्विद्वान्। युयोध्य-सम्मज्जुहुराणमेनो भूयिष्ठां ते नम ऽउक्तिं व्विधेम॥

1-देवोद्देशेन बह्नौ मन्त्रेण हविः प्रक्षेप आहुतिः। (का० श्रौ० २।१।२०)

अपने बायें हाथ से किसी बड़े पात्र में तिल व शाकल को ग्रहण कर दहिने हाथ से घृत भर कर स्रुवे को लेकर, दाहिने पैर की जांघ को मोड़कर ब्रह्मा से स्पर्श कर इन नाम मन्त्रों द्वारा स्विष्टकृत संज्ञक आहुति प्रदान कर स्रुवे के अवशेष घृत का प्रोक्षणी पात्र में त्याग भी करें-

ॐ अग्नये स्विष्टकृते स्वाहा- इदमग्नये स्विष्टकृते न मम॥

आचार्य निम्न देवताओं को पायसबलि यजमान से प्रदान करावें-

दशदिक्पाल, गणेश, वरुण षोड़शमातृका, सप्तघृतमातृका, नवग्रह, पंचलोकपाल, वास्तोष्पति, वास्तुपीढ़देवता योगिनी, असंख्यातरुद्र, विष्णु, दुर्गाप्रधान देवताभ्यः पायस बलिं समर्प्य क्षेत्रपालदेवतायै माषभक्त बलिंमाष दध्योदनबलिं व चतुर्मुखदीपसहितं दद्यात्। तद् विधिःश्तु ग्रहशांतिपद्धति-अनुसारेण कुर्यात्।

आचार्य कर्ता[1] के नाम के सहित देवी का नाम सदा व्यवहारार्थ करें उसमें अमुख नाम की देवी इसप्रकार से नामकरण करके ब्राह्मण प्रार्थना करके उत्तरपूजन के निमित्त आचार्य यजमान से इस संकल्प को करावें-

ततः कृतस्यदुर्गाप्रतिष्ठाख्यकर्मणः साङ्गतासिद्धये आवाहितदेवानामुत्तर पूजनं करिष्ये।

संकल्प की समाप्ति के पश्चात् विधि विधान से गणपत्यादि देवताओं की पूजा यजमान से करावें। पश्चात् आचार्य इन श्लोकों का उच्चारण करके यजमान से प्रार्थना करावें-

---

१- यजमानः स्वनामयुतं देवी-देवस्य नाम कुर्यादित्यन्यत्र॥ (प्रतिष्ठामयूखः)

रूपं देहि यशो देहि भगं भगवति देहि मे।

पुत्रान् देहि धनं देहि सर्वकामांश्च देहि मे॥

महिषघ्नि महामाये चामुण्डा मुण्डे मालिनी।

आयुरारोग्यमैश्वर्यं देहि देवी नमोऽस्तु ते॥

आचार्य एवं अन्य ब्राह्मणों को [1]दक्षिणा प्रदान करने के निमित्त यजमान यह संकल्प करें-

कृतस्यदुर्गाप्रतिष्ठाकर्मणःसाङ्गतासिद्ध्यर्थंतत्सम्पूर्णफल-प्राप्त्यर्थं च आचार्यादिभ्यो-महर्त्विग्भ्यः हवनकर्तृ-भ्योऽन्येभ्यश्च यथाशक्ति दक्षिणां विभज्य दातुमहमुत्सृज्ये।

ब्रह्मा को पूर्णपात्रदान देने हेतु यह संकल्प यजमान करें-

कृतस्यदुर्गाप्रतिष्ठाकर्मणः साङ्गतासिद्ध्येतत्सम्पूर्ण-फलप्राप्तये च इदं पूर्णपात्रं सदक्षिणं ब्रह्मणे तुभ्यमहं संप्रददे।

ब्रह्मा पूर्णपात्र ग्रहण करके कहें-

ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रति गृह्णातु।

पुनः ब्राह्मण भोजन करवाने से पूर्व निम्न संकल्प यजमान करें-

कृतस्यदुर्गाप्रतिष्ठाकर्मसमृद्धये यथाशक्तिब्राह्मणान् भोजयिष्यामि।

संकल्प के उपरान्त ब्राह्मणों को प्रेम, आदर, सत्कार से भोजन करावें, ब्राह्मणभोजन के पश्चात् यजमान दीन, अनाथजनों को यह संकल्प करके भूयसीदक्षिणा और अन्नादिक भी देवें-

---

१-दक्षिणाः सर्वयज्ञानां दातव्याभूतिमिच्छतो। (साम्बपुराण ३४/२६)

कृतेऽस्मिन् दुर्गाप्रतिष्ठा कर्मणिन्यूनातिरिक्त दोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथाशक्ति भूयसीं दक्षिणां विभज्य दातुमहमुत्सृज्ये॥

उपर्युक्त कर्म की समाप्ति के पश्चात यजमान अग्नि का विर्सजन इस श्लोक का उच्चारण करके करें–

गच्छ गच्छ सुरश्रेष्ठ! स्वस्थाने परमेश्वर।
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन!॥

इन श्लोकों का उच्चारण करवा के आचार्य क्षमाप्रार्थना यजमान से करावें–

जपच्छिद्रं तपश्छिद्रं यच्छिद्रं शान्तिकर्मणि।
सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः ॥ १ ॥
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ २ ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ३ ॥

इसके पश्चात् आचार्य एवं सभी ब्राह्मण यजमान एवं उसकी धर्मपत्नी व उसके परिवार के सदस्यों को तिलक लगाकर ही आशीर्वाद प्रदान करें, उपरान्त ही यजमान एवं उसकी धर्मपत्नी, अपने पुत्र-पौत्रादि व परिवार के लोगों के इष्ट मित्रों एवं सम्बन्धियों सहित दुर्गादेवी के महाप्रसाद को हर्षोल्लास के साथ ग्रहण करें।

॥ दुर्गाप्रतिष्ठा समाप्तः ॥

लक्ष्मी-प्रतिष्ठा

ज्योतिर्विद् द्वारा दिये गये लक्ष्मी की प्रतिष्ठा के लिए शुभ समय तथा शुभ दिन में यजमान स्नानादि कृत्यों से निवृत होकर आचमन एवं प्राणायाम कर कुशासन अथवा कम्बलासन पर अपनी धर्मपत्नी सहित पूर्वाभिमुख या उत्तराभिमुख बैठकर अपने ऊपर तथा समस्त प्रतिष्ठासामग्री की पवित्रता के हेतु इस पौराणिक श्लोक का उच्चारण करके जल छिड़कें-

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपिवा।

यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु ॐ पुण्डरीकाक्षः पुनातु ॐ पुण्डरीकाक्षः पुनातु

उपरान्त यजमान के दायें हाथ में पुष्प व अक्षत प्रदान करके आचार्य सहित सभी ब्राह्मण [1]शान्तिपाठ करें इसके उपरान्त यजमान के दायें हाथ में जल इत्यादि देकर इस [2]संकल्प को करावें-

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे अविमुक्तवाराणसीक्षेत्रेमहाश्मशाने आनन्दवने गौरीमुखे त्रिकण्टकविराजिते भागीरथ्याः पश्चिमे तीरे (इति काश्यामेवविशेषः) अमुकनाम्नि संवत्सरे, अमुकायने

१-शान्तिपाठ के मंत्रों को इसी पुस्तक के पृष्ठ सं. ७५ में देखें।

२-संकल्पेन बिना कर्म यत्किंचत् कुरुते नरः। फलं चाप्याल्पकं तस्य धर्मस्यार्द्धक्षयो भवेत्॥

[भविष्य-पुराण]

अमुकऋतौ, महामाङ्गल्यप्रदमासोत्तमे मासे, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकराशिस्थितेचन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुक शर्माऽहं (वर्माः, गुप्तः, दासः) मम सपत्नीकस्य शाश्वत ब्रह्मलोकप्राप्तिकामनया दीर्घायुर्लक्ष्मी सर्वकाम समृद्धि-अक्षय्यसुख प्राप्त्यर्थं श्रीलक्ष्मीदेवी प्रीत्यर्थं लक्ष्मीप्रतिष्ठाख्यं कर्म करिष्ये। तदङ्गत्वेन स्वस्तिपुण्याहवाचनं, मातृकापूजनं, वसोर्धारापूजनम्, आयुष्यमंत्रजपं, नान्दीश्राद्धम्, आचार्यादिवरणं च करिष्ये। तत्रादौ निर्विघ्नता सिद्ध्यर्थं गणेशाम्बिकयोः पूजनं करिष्ये।

पश्चात् आचार्य गणेश पूजन से नान्दी श्राद्ध तक के समस्त वैदिक कर्मों को ग्रहशांतिप्रयोग के द्वारा ही सम्पन्न करावें।

आचार्य यजमान से इस संकल्प को करावें-

अथाचार्यलक्ष्मीप्रतिष्ठाख्येकर्मणि अमुक शर्मणः यजमानेन वृतोऽहमाचार्य कर्म करिष्ये।

उपरान्त इन श्लोकों का उच्चारण कर के पूर्वादि दिशाओं में पीली सरसों और धान के लावे को बिखेरकर पंचगव्य द्वारा प्रोक्षित करके आचार्य प्रादेशान्त कर्म करावें-

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥

अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्।
सर्वेषामविरोधेन प्रतिष्ठाकर्म समारभे॥

इस वैदिक मंत्र का उच्चारण करके पुनःशुद्धजल द्वारा प्रोक्षण करें-

ॐ आपो हि ष्ट्ठा मयोभुवस्तानऽऊर्ज्जे दधातन महेरणाय चक्षसे॥

उपरोक्त कर्म के पश्चात् प्रतिष्ठामयूख में वर्णित विधि द्वारा ही आचार्य मंडप स्नपादि कर्म करावें, पश्चात् भद्रपीठ पर ही आठ कलशों सहित लक्ष्मी देवी की मूर्ति को भी स्थापित करें।

इस मूल मंत्र का उच्चारण कर घृतद्वारा अभ्यंग करके आचार्य पंचगव्य से ही स्नान करावें-

मूल मंत्र-**ॐ लं लक्ष्म्यै नमः॥**

आचार्य निम्न मंत्र का उच्चारण करके लक्ष्मी की मूर्ति का नेत्रोन्मीलन कर्म करें-

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्।
चन्द्रां हिरणमयीं लक्ष्मीं जातवेदो म ऽआवह॥

नेत्रोन्मीलन का द्वितीय प्रकारः-आचार्य लक्ष्मी की मूर्ति के मुख और दोनों नेत्रों में स्वर्ण की शलाका द्वारा घृत एवं मधु को मिश्रित कर इस आधे आदि मंत्र का उच्चारण करके चिन्ह करें-

ॐ चित्रं देवानामुदगादनीकं चक्षुर्म्मित्रस्य वरुणस्याग्नेः॥

(यजु. अ. ७ मं. ४२)

इस मंत्र का उच्चारण कर आचार्य पायस, भक्ष्य, भोज्य, दर्पणादि मूर्ति को दीखावें।

ॐ आ कृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतंमर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥

आचार्य इस मंत्र का उच्चारण कर लक्ष्मी की मूर्ति के समक्ष त्रिमधु अर्पित करें-

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥

पूर्वदिशा की ओर के कुम्भ जल से इस मंत्र का उच्चारण करके अभिषेक करें-

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रीयं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥

आचार्य इस मंत्र का उच्चारण करके दक्षिणदिशा की ओर के कलश से अभिषेक करें-

कां सोस्मितां हिरण्यप्राकारामार्दां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥

इस मंत्र का आचार्य उच्चारण करके पश्चिमदिशा की ओर के कलश से अभिषेक करें-

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥

इस मंत्र का आचार्य उच्चारण करके उत्तरदिशा के कलश से अभिषेक करें-

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्त्व वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्याऽअलक्ष्मीः॥

इस मंत्र का आचार्य उच्चारण करके आग्नेयकोण के कलश से अभिषेक करें-

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिं मृद्धिं ददातु मे॥

इस मंत्र का आचार्य उच्चारण करके नैऋत्यकोण की ओर के कलश से अभिषेक करें-

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥

इस मंत्र का उच्चारण आचार्य करके वायव्यदिशा की ओर के कलश से अभिषेक करें-

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥

इस मंत्र का आचार्य उच्चारण करके ईशानकोण के कलश से अभिषेक करें-

मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥

इस मंत्र का आचार्य उच्चारण करके लक्ष्मी जी की मूर्ति के शिर पर से इक्यासी कलशों के जल द्वारा विधिपूर्वक स्नान करावें-

कर्दमेन प्रजा भूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥

इस मंत्र का आचार्य उच्चारण करके लक्ष्मी जी की मूर्ति को अधोभाग से स्नानकरावें-

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले॥

इस मंत्र का आचार्य उच्चारण करके गन्धोदक के कलशों के द्वारा स्नान करावें-

आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह॥

इस मंत्र का आचार्य उच्चारण कर पुष्पों से युक्त कुम्भ के जल से स्नान करावें-

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म ऽआवह॥

'ता मआवह' इस ऋचा से **'शान्तिय'** मंत्र से तथा **'श्रीसूक्त'** के मंत्रों के द्वारा आचार्य शैय्याधिवास कर्म को करावें।

श्रीम्-इस बीज मंत्र का आचार्य विधिवत् उच्चारण करके चित्तशक्ति का न्यास आचार्य करके पुनः पूजन कार्य यजमान के द्वारा ही करावें।

श्रीसूक्त-के सभी मंत्रों के द्वारा मण्डप में निर्मित कुण्डों में कमल पुष्पों से या करवीर के पुष्पों से सौ अथवा एक हजार आहुति प्रतिष्ठा-स्थल पर उपस्थित होम में भाग लेने वाले ब्राह्मणों के द्वारा हवन कुण्ड में आचार्य प्रदान करावें-

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह स्वाहा॥ १॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् स्वाहा॥ २॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् स्वाहा॥ ३॥
कां सोस्मितां हिरण्यप्राकारामार्द्रां, ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां, तामिहोपह्वये श्रियम् स्वाहा॥ ४॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि स्वाहा॥ ५॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्याऽअलक्ष्मीः स्वाहा॥ ६॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे स्वाहा॥ ७॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् स्वाहा॥ ८॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् स्वाहा॥ ९॥
मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः स्वाहा॥ १०॥
कर्दमेन प्रजा भूता मयि संभव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् स्वाहा॥ ११॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले स्वाहा॥ १२॥
आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह स्वाहा॥ १३॥
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह स्वाहा॥ १४॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् स्वाहा॥ १५॥
यः शुचिः प्रयतोभूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् स्वाहा॥ १६॥

आचार्य श्रीसूक्त के सोलह मंत्रों का उच्चारण कर सभी गृहोपयोगी वस्तुओं को लक्ष्मीजी की मूर्ति के समक्ष अर्पित करें, पश्चात् लक्ष्मीमंत्र द्वारा पीड़िका का निर्माण कर श्रीसूक्त के सभी मंत्रों द्वारा उनकी विधिवत् प्रतिष्ठा करें, आचार्य प्रत्येक ऋचा का जाप प्रतिष्ठा मंडप में उपस्थित ब्राह्मण और जपकर्ता ब्राह्मण से ही करावें।

लक्ष्मी की प्राण प्रतिष्ठा के लिये कर्ता यह विनियोग करें-

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्युजः सामानि छन्दांसि प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं श्रीमहालक्ष्म्यादिदेवता-प्रीत्यर्थं प्रतिष्ठापने विनियोगः।

ॐ ब्रह्मविष्णुमहेश्वरेभ्यो ऋषिभ्यो नमः-शिरसि।

ॐ ऋग्युजःसामछन्दोभ्यो नमो-मुखे

ॐ प्राणशक्तिदेवतायै नमः-हृदये।

ॐ आं बीजाय नमः-गुह्ये।

ॐ ह्रीं शक्तये नमः-पादयो।

ॐ क्रों कीलकाय नमः-नाभौ।

ॐ प्राणप्रतिष्ठापने विनियोगः-सर्वाङ्गे।

ॐ ह्राम्-अङ्गुष्ठाभ्यां नमः। ॐ ह्रीम्-तर्जनीभ्यां नमः ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैम्-अनामिकाभ्यां नमः। ॐ ह्रौं-कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतलकरपृष्ठाभ्यां नमः।

ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुम्। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्।

ध्यानम्–

ध्यायेल्लक्ष्मीं प्रहसितमुखीं राज्यसिंहासनस्थां,
मुद्राशक्तिं सकलविनुतां सर्वसंसेव्यमानाम्।
अग्नौ पूज्यामखिलजननीं हेमवर्णां हिरण्यां,
भाग्योपेतां भुवनसुखदां भार्गवीं भूतिधात्रीम्॥

इस प्रकार से ध्यान करके मूर्ति के ऊपर हाथ रखकर प्राणप्रतिष्ठा बीजों का उच्चारण करें–

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सः श्रीमहालक्ष्मीदेव्याः प्राणा इह प्राणाः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सः जीव इह स्थितः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सः सर्वेन्द्रियाणि वाङ्मनः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणपादपायूपस्था इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

ॐ अस्यै[1] प्राणा प्रतिष्ठन्तु अस्यै प्राणा क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति कश्चन॥

उपरान्त एकाग्रचित्त होकर दाहिने हाथ में कमल के पुष्पों से युक्त माला लेकर प्रार्थना करें उसके पश्चात् लक्ष्मी देवी का विधि–विधान से पूजन कर्म आचार्य यजमान के द्वारा सम्पन्न करावें।

लं लक्ष्म्यै नमः–इस मूलमंत्र के द्वारा लक्ष्मी देवी का सानिध्य भी करें।

१–कालिकापुराणे–अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु यत्। असौ देवत्वसंख्यायै स्वाहेति यजुरुच्चरन्॥ अस्मिन्प्राणप्रतिष्ठान्तु प्रतिमा पूजनाद् ऋते॥ प्राणप्रतिष्ठां प्रथमं पूजाभागविशुद्धये॥ न कश्चित् बुधः कुर्यात्कृत्वा मृत्युमवाप्नुयात्।

आचार्यादि दक्षिणा संकल्पः -

कृतस्य 'लक्ष्मीप्रतिष्ठाकर्मणः' सांगतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च आचार्यादिभ्यो, महर्त्विग्भ्यः सूक्तपाठकेभ्यो, मंत्रजापकेभ्यो, हवनकर्तृभ्योऽ अन्येभ्यो देवयजनमागतेभ्यश्च दक्षिणां दातुमहमुत्सृजे॥

गौदानसंकल्पः-

कृतस्य लक्ष्मीप्रतिष्ठाकर्मणः सांगतासिद्ध्यर्थं तत्सम्पूर्ण फलप्राप्त्यर्थं गौदान महं करिष्ये॥

ब्राह्मणभोजन संकल्पः-

कृतस्य लक्ष्मीप्रतिष्ठाकर्मसमृद्ध्यै यथाशक्ति ब्राह्मणान् भोजयिष्यामि॥

भूयसीदक्षिणा संकल्पः-

कृतेऽस्मिन् लक्ष्मीप्रतिष्ठाकर्मणि - न्यूनातिरिक्त - दोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च - यथाशक्ति - भूयसीं दक्षिणां विभज्य दातुमहमुत्सृज्ये॥

लक्ष्मी प्रतिष्ठा से सम्बन्धित सभी वैदिक कर्मो के समाप्ति के उपरान्त प्रतिष्ठा-स्थल पर उपस्थित सपत्नीक यजमान पुत्र-पौत्रादि सहित, इष्ट-मित्र बन्धु-बान्धवों के साथ हर्षोल्लास के साथ लक्ष्मीदेवी के महाप्रसाद को ग्रहण करें।

॥ लक्ष्मीप्रतिष्ठा समाप्तः॥

काली-प्रतिष्ठा

शुभमुहूर्त में तथा शुभदिन में यजमान स्नानादि कार्यो से निवृत्त होकर आचमन एवं प्राणायाम करने के पश्चात् शुभासन पर सपत्नीक पूर्वाभिमुख या उत्तराभिमुख बैठकर अपने ऊपर और समस्त प्रतिष्ठा सामग्री के पवित्रीकरण हेतु इस श्लोक का उच्चारण करके जल छिड़कें।

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।

यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु। ॐ पुण्डरीकाक्षः पुनातु। ॐ पुण्डरीकाक्षः पुनातु।

इसके पश्चात् यजमान के दाहिने हाथ में अक्षत एवं पुष्प देकर आचार्य सहित सभी ब्राह्मण [1]शान्तिपाठ करें, इसके पश्चात् यजमान से निम्न सङ्कल्प आचार्य करावें-

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे अविमुक्तवाराणसीक्षेत्रे-महाश्मशाने आनन्दवने गौरीमुखे त्रिकण्टकविराजिते भागीरथ्याः पश्चिमे तीरे (इति काश्यामेवविशेषः) अमुकनाम्नि संवत्सरे, अमुकायने अमुकऋतौ, महामाङ्गल्यप्रदमासोत्तमे मासे, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकराशिस्थितेचन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ

१-शान्तिपाठ के लिये इसी पुस्तक में की पृष्ठसंख्या ७५ को देखें।

शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगणगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुक शर्माऽहं (वर्माः, गुप्तः, दासः) अस्यां कालीदेवी मूर्त्तौ देवता सान्निध्यार्थं दीर्घायुर्लक्ष्मीसर्वकाम-समृध्यक्षय्य-सुखप्राप्तिकामं प्राप्त्यर्थं श्रीकालीचर-प्रतिष्ठाकर्म करिष्ये। तदङ्गत्वेन स्वस्तिपुण्याहवाचनं, मातृकापूजनं, वसोर्धारापूजनम्, आयुष्यमंत्रजपं, नान्दीश्राद्धम्, आचार्यादिवरणं च करिष्ये। तत्रादौ निर्विघ्नता सिद्ध्यर्थं महागणपतिपूजनं करिष्ये।

गणपतिपूजन से नान्दीश्राद्ध तक के सभी वैदिक कर्मो को आचार्य ग्रहशान्तिपद्धति के द्वारा करवायें उसके पश्चात् यजमान इस संङ्कल्प के द्वारा आचार्य का वरण करें-

देशकालौ संकीर्त्य-अमुकगोत्रोत्पन्नः अमुकप्रव-रान्वितः अमुकशर्माऽहम्, अमुक गोत्रोत्पन्नममुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यन्दिनीयशाखाध्या-यिनममुकशर्माणं ब्राह्मणमस्मिन् कालीमूर्त्तेः चरप्रतिष्ठाकर्मणि एभिवरणद्रव्यैः आचार्यत्वेन त्वामहं [1]वृणे।

यजमान पुनः यह सङ्कल्प यजमान करें-

कर्मनिष्ठं स्वशाखाढ्यं सर्वशात्रार्थ पारगंत शान्तिदातारं शुभाद्यर्थ-माचार्यत्वेन त्वामहं वृणे।

इस सङ्कल्प के पश्चात् आचार्य के हाथ में यजमान फलादि देकर गंधादि के द्वारा पूजन करते हुए इस श्लोक का उच्चारण करते हुए आचार्य की प्रार्थना करें-

---

१-वरणं नाम करिष्यमाण कर्मस्वरूपदक्षिणाद्रव्य तत्परिमाण श्रावणापूर्वकं स्वयमप्रवृत्तानामाचार्यादि कर्मसु कर्तृत्वेनाभ्यर्थनम्।

आचार्यस्तु यथा स्वर्गे शक्रादिनां बृहस्पतिः।
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत!।।

आचार्य प्रार्थना के पश्चात् आचार्य कालीदेवी की चरप्रतिष्ठा कर्म को प्रारम्भ करें-

पक्ष में कुण्डमण्डप का निर्माण कर अथवा छायामण्डप बनाकर इन मंत्रों का उच्चारण करते हुए आचार्य उदुम्बर के पत्ते और दूर्वा के जलों से प्रोक्षण करें-

ॐ आपो हि ष्ट्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन। महे रणाय चक्षसे।।

ॐ शं न इन्द्राग्नि भवता मवोभिः शं न इन्द्रा वरुणा रातहव्याः। शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रा पूषणा वाजशातौ।

इन श्लोकों का उच्चारण करते हुए आचार्य प्रादेशान्त कर्म को यजमान से करावें-

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु।।
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः।
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया।।
अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्।
सर्वेषामविरोधेन प्रतिष्ठाकर्म समारभे।।

प्रादेशान्त कर्म की समाप्ति के अनन्तर आचार्य निम्न क्रमानुसार विधिविधान से पञ्च गव्य बनावें उसमें सर्वप्रथम आचार्य

गायत्री मन्त्र पढ़कर गोमूत्र [1]"गन्धद्वारां' इस मन्त्र से गोबर, आप्यायस्व[2] इस मन्त्र से दूध दधि क्राब्णो[3] इस मन्त्र से दधि [4]'घृतंमिमिक्षे' इस मंत्र से घृत 'आपोहिष्ठा:'[5] इस मन्त्र से कुशोदक एक पात्र में लेकर 'प्रणव' का उच्चारण करते हुए यज्ञियकाष्ठ से मिलावे। तथा प्रणव मन्त्र द्वारा ही उसे अभिमन्त्रित भी करें।

तत्पश्चात् आचार्य इस मन्त्र का उच्चारण करते हुए पञ्चगव्य को दिशाओं में भूमि में और अन्तरिक्ष में छिड़कें-

ॐ आपो हि ष्ट्ठा मयो भुवस्ता न ऽऊर्ज्जे दधातन। महे रणाय चक्षसे॥

यजमान मूर्त्ति का निर्माण करने वाले शिल्पकार का सत्कार अर्थात् उसे द्रव्यादि से प्रसन्न करके उससे मूर्ति ले आवे। पश्चात् निम्न दो मन्त्रों का उच्चारण करके आचार्य जलाधिवासकर्म को करावें-

ॐ अव ते हेलो वरुण नमोभि रव यज्ञेभिरीमहे हविर्भि:। क्षयन्न स्मभ्यमासुर प्रचेता राजन्नेनांसि शिश्रथ: कृतानि॥

१-गन्ध द्वारा दुराधर्षां नित्यपुष्टां करीषिणीम्। इश्वरीं सर्वभूतानां तामि हो पह्वये श्रियम्॥ [ऋ० परि० ११ म० ९]

२-आप्यायस्व समेतु ते विश्वत: सोम वृष्णसियम्। भवा वाजस्य संगथे। [ऋ० १।९।११।१६]

३-दधि क्राब्णो ऽअकारिषं जिष्णोरश्वस्य व्वाजिन:। सुर भि नो मुखा करत्त्रण आयुर्ठ० षितारिषत्॥ [ऋ० ४। ३९।६]

४-घृतं मिमिक्षे घृतमस्य योनिघृते श्रितो घृतम्वस्य धाम।
अनुष्वधमावह मादयस्व स्वाहा कृतं वृषभ वक्षि हव्यम्। [शुक्लयजुर्वेद]

५-आपो हि ष्ठा मयोभुवस्तान ऽऊर्जे दधातन। महे रणाय चक्षसे। [ऋ० १०।९।१]

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते तवनागसो अदितये स्याम॥

जलाधिवास कर्म की समाप्ति के पश्चात् यजमान के दाहिने हाथ में जल-अक्षत देकर आचार्य निम्न सङ्कल्प करावें-

श्रीकालीचर प्रतिष्ठा कर्म करिष्ये।

सङ्कल्प के पश्चात् आचार्य यजमान से यह प्रार्थना करवाये-

स्वागतं देवदेवशि विश्वरूप नमोस्तु ते।
श्रद्धे वत्वदधिष्ठाने शुद्धिकर्म सहस्व भो॥

भूतशुद्धिआदि करके निम्नलिखित मातृकान्यास, पुरुषसूक्तन्यास तक करे, वे इस प्रकार है-

मातृका न्यासः

१. ॐ अं नमः तालुके — २. ॐ आं नमः मुखे
३. ॐ इं नमः दक्षिण नेत्रे — ४. ॐ ईं नमः वाम नेत्रे
५. ॐ उं नमः दक्षिण श्रोत्रे — ६. ॐ ऊं नमः वाम श्रोत्रे
७. ॐ ऋं नमः दक्षिण गंडे — ८. ॐ ॠं नमः वाम गंडे
९. ॐ लृं नमः दक्षिण चिबुके — १०. ॐ लृं नमः वाम चिबुके
११. ॐ एं नमः उर्ध्व दशनेषु — १२. ॐ ऐं नमः अधोदशनेषु
१३. ॐ ओं नमः उर्ध्वोष्ठे — १४. ॐ औं नमः अध रोष्ठे
१५. ॐ अं नमः ललाटे — १६. ॐ अंः नमः जिह्वायां
१७. ॐ यं नमः त्वचिरंचक्षुषोः — १८. ॐ लं नमः नासिकाय
१९. ॐ वं नमः दशनेषु — २०. ॐ शं नमः श्रोतयोः
२१. ॐ षं नमः उदरे — २२. ॐ सं नमः कटिदेशै
२३. ॐ हं नमः हृदये — २४. ॐ क्षं नमः नाभ्यां
२५. ॐ कं नमः लिंगे — २६. ॐ पं फं बं भं मं नमः दक्षिणबाहौ

२७. ॐ तं थं दं धं नं नमः वामबाहौ

२८. ॐ टं ठं डं ढं णं नमः दक्षिणजंघायां

२९. ॐ चं छं जं झं ञं नमः वामजंघायां

३०. ॐ कं खं गं घं ङं नमः सर्वांगुलीषु

॥ इति मातृकान्यास ॥

पुरुषसूक्त न्यासः

हरि:ॐसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।

स भूमिर्ठ० सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ वामकरे ॥

पुरुष ऽएवेदर्ठ० सर्व्वं य्यद्भूतं य्यच्च भाव्यम्।

उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ दक्षिणकरे ॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः।

पादो ऽस्य व्विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ वामपादे ॥

त्रिपादूर्ध्व ऽउदैत्पुरुषः पादो ऽस्येहाभवत्पुनः।

ततो व्विष्वङ् व्यक्क्रामत्साशनानशने ऽअभि ॥ दक्षिणपादे ॥

ततो व्विराड्जायत व्विराजो ऽअधि पूरूषः।

स जातो ऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ वामजानौ ॥

तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्।

पशूँस्ताँश्चक्क्रे व्वायव्यानारण्ण्या ग्राम्म्याश्च ये ॥ दक्षिणजानौ ॥

तस्माद्यज्ञात्सर्वहुत ऽऋचः सामानि जज्ञिरे।

छन्दार्ठ०सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ वामकट्याम् ॥

तस्मादश्वाऽ अजायन्त ये के चोभदयातः।
गावो ह जज्ञिरे तस्मात्तस्माज्जा ता ऽअजावयः॥ दक्षिण कट्याम्॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥ नाभौ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत्किं बाहू किमरू पादा ऽउच्च्येते ॥ हृदये ॥
ब्राह्मणोऽस्य मुखमासीद् बाहूराजन्यः कृतः।
उरू तदस्य यद्वैश्यः पद्भ्याꣳशूद्रो अजायत ॥ वामबाहौ ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो ऽअजायत।
श्रोत्राद्वायुश्च्च प्राणश्च्च मुखादग्निरजायत् ॥ दक्षिणबाहौ ॥।
नाभ्या ऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ ऽअकल्पयन् ॥ कण्ठे ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्य ग्रीष्मऽ इध्मः शरद्धविः ॥ मुखे ॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ अक्ष्णोः ॥।
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥ अस्त्राय फट्॥
ब्राह्मणोऽस्य मुखमासीद् बाहूराजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत ॥ हृदयायनमः ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो ऽअजायत।

श्श्रोत्राद्वायुश्च्च प्राणश्च्च मुखादग्निरजायत् ॥ शिर से स्वाहा ॥

नाभ्या ऽआसीदन्तरिक्षर्ठ० शीष्र्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ ऽअकल्पयन्॥ कवचाय हुम ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।

वसन्तोऽस्यासीदाज्य ग्रीष्मऽ इध्मः शरद्धविः ॥ नेत्रत्रयाय वौषट् ॥

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।

देवा यद्यज्ञं तन्वाना अबध्नन्पुरुष पशुम्॥ शिखायै वषट् ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साद्धयाः सन्ति देवाः ॥ अस्त्रायफट् ॥

॥ इति पुरुषसूक्तन्यासः॥

इस प्रकार से आचार्य यजमान के द्वारा ही उसके शरीर पर इन न्यासों को करवाने के उपरान्त काली देवी की मूर्ति में इन न्यासों को करें—वे न्यास नीचे क्रमानुसार दिए जा रहे हैं—

निवृत्यादि न्यासः

ॐ ह्रीं अं निवृत्यै नमः शिरसि न्यासामि।

ॐ ह्रीं आँ प्रतिष्ठायै नमः मुखे न्यासामि।

ॐ ह्रीं इं विद्यायै नमः दक्षिणनेत्रे न्यासामि।

ॐ ह्रीं ईं शान्त्य नमः वामनेत्रे न्यासामि।

ॐ ह्रीं उं धुन्धिकायै नमः दक्षिणश्रोते न्यासामि।

ॐ ह्रीं ऊं दिपिकायै नमः वामश्रोते न्यासामि।

ॐ ह्रीं ॠं रेचिकायै नमः दक्षनासापुटे न्यासामि।
ॐ ह्रीं ॠं मोचिकायै नमः वामनासापुटे न्यासामि।
ॐ ह्रीं ॡं सूक्ष्मायै नमः वामकपोले न्यासामि।
ॐ ह्रीं एं सूक्ष्मामृतायै नमः उर्ध्वदंतेषु न्यासामि।
ॐ ह्रीं ऐं ज्ञानामृतायै नमः अधोदंतेषु न्यासामि।
ॐ ह्रीं ओं सावित्र्यै नमः उर्ध्वोंष्ठे न्यासामि।
ॐ ह्रीं औं व्यापिन्यै नमः अधरोष्ठे न्यासामि।
ॐ ह्रीं अं सुरूपायै नमः जिह्वायां न्यासामि।
ॐ ह्रीं अः अनंतायै नमः कण्ठे न्यासामि।
ॐ ह्रीं कं सृष्ठ्यै नमः दक्षबाहुमुले न्यासामि।
ॐ ह्रीं खं ऋध्यै नमः दक्षकर्पूरे न्यासामि।
ॐ ह्रीं गं स्मृत्यै नमः दक्ष मणिबन्धे न्यासामि।
ॐ ह्रीं घं मेघायै नमः दक्षकरांगुलिमूलेषु न्यासामि।
ॐ ह्रीं ङं घन्त्यै नमः दशाङ्गुल्यग्रेषु न्यासामि।
ॐ ह्रीं चं लक्ष्म्यै नमः वामबाहुमुले न्यासामि।
ॐ ह्रीं छं द्युत्यै नमः वाम कूपरे न्यासामि।
ॐ ह्रीं जं स्थिरायै नमः वाममणिवन्धे न्यासामि।
ॐ ह्रीं झं स्थित्यै नमः वामांगुलिमुले न्यासामि।
ॐ ह्रीं ञं सिध्यै नमः वामांगुल्यग्रेषु न्यासामि।
ॐ ह्रीं टं जरायै नमः दक्षपादमूले न्यासामि।
ॐ ह्रीं ठं पालिन्यै नमः दक्षजानुनि न्यासामि।
ॐ ह्रीं डं शान्त्यै नमः दक्षगुल्फे न्यासामि।

ॐ ह्रीं ढं ऐश्वर्यै नमः दक्षपादाङ्गुलीषु न्यासामि।

ॐ ह्रीं णं रत्यै नमः वामपादमूले न्यासामि।

ॐ ह्रीं तं कामिन्यै नमः वामपादमूले न्यासामि।

ॐ ह्रीं थं रदायै नमः वामजानुनि न्यासामि।

ॐ ह्रीं दं ह्लादिन्यै नमः वामगुल्फे न्यासामि, वामपादाङ्गुल्यग्रेषु न्यासामि।

ॐ ह्रीं धं प्रित्यै नमः वामपादाङ्गलिमूले न्यासामि।

ॐ ह्रीं नं दीर्घायै नमः वामांगुल्यग्रेषु न्यासामि।

ॐ ह्रीं पं तीक्ष्णायै नमः दक्षिणकुक्षौ न्यासामि।

ॐ ह्रीं फं सुप्त्यै नमः वामकुक्षौ न्यासामि।

ॐ ह्रीं बं अभयायै नमः पृष्ठे न्यासामि।

ॐ ह्रीं भं निद्रायै नमः नाभौ न्यासामि।

ॐ ह्रीं मं मात्रे नमः उदरे न्यासामि।

ॐ ह्रीं यं शुद्धायै नमः हृदि न्यासामि।

ॐ ह्रीं रं क्रोधिन्यै नमः कंठे न्यासामि।

ॐ ह्रीं लं कृपायै नमः ककुदि न्यासामि।

ॐ ह्रीं वं उत्कायै नमः स्कन्धयो न्यासामि।

ॐ ह्रीं शं मृत्यवे नमः दक्षिणकरे न्यासामि।

ॐ ह्रीं षं पीताय नमः वामकरे न्यासामि।

ॐ ह्रीं सं श्वेतायै नमः दक्षपादे न्यासामि।

ॐ ह्रीं हं अरुणायै नमः वामपादे न्यासामि।

ॐ ह्रीं त्रं असितायै नमः मूर्धापादान्तं न्यासामि।

ॐ ह्रीं क्षं सर्वसिद्धिगौर्यै नमः पादादिमूर्धान्तं न्यासामि।

वशिन्यादिन्यासः

ॐ अं आं इं ईं उं ऊं ऋं ॠं लृं एं ऐं ओं औं अं अः क्लृं वासिनीवाग्देवतायै नमः ब्रह्मरन्ध्र न्यासामि ॥ १ ॥

ॐ कं खं गं घं ङं क्लीं ह्रीं कामेश्वरीवाग्देवतायै नमः ललाटे न्यासामि॥ २ ॥

ॐ चं छं जं झं ञं क्लीं मोदिनीवाग्देवतायै नमः भ्रूमध्ये न्यासामि॥ ३॥

ॐ टं ठं डं ढं णं ब्ल्यूं विमलावाग्देवतायै नमः कण्ठे न्यासामि ॥ ४ ॥

ॐ तं थं दं धं नं क्लीं अरुणावाग्देवतायै नमः हृदि न्यासामि ॥ ५ ॥

ॐ पं फं बं भं मं हस्लब्ल्यूं जयनीवाग्देवतायै नमः नाभौ न्यासामि॥ ६ ॥

ॐ यं रं लं वं हस्पब्यूं सर्वेश्वरीवाग्देवतायै नमः आधारे न्यासामि ॥ ७॥

ॐ शं षं हं क्षं क्ष्मीं कौलिनीवाग्देवतायै नमः सर्वाङ्गे न्यासामि ॥ ८ ॥

ततः-'**खड्गाय से पादादि शिर पर्यन्त**' तक के सभी न्यासों को देवी की मूर्ति पर करें।

इसके पश्चात् काली देवी के मूल [1]मन्त्र का न्यास आचार्य अथवा मन्त्र शास्त्री से जानकर ही यजमान करे।

उपरान्त क्राँ इत्यादि दीर्घबीज से करांङ्गुली न्यास करने के पश्चात् यजमान षडंग न्यास कर देवी का ध्यान करें। इसके पश्चात् इस मंत्र का उच्चारण करके मूर्ति को बारह बार मिट्टी से शुद्ध करें–

ॐ स्योना पृथिवि नो भवान्नृक्षरा निवेशनी। यच्छा नः शर्म्म सप्प्रथाः॥

पुनः मूर्ति के उत्तर भाग में स्थण्डिल का निर्माण कर उसके चारों कोनों पर चार कलश स्थापित कर प्रथम कलश में ससमृतिका द्वितीय कलश में क्षीरवृक्षत्वक तृतीय कलश में यवशाली, चतुर्थ कलश में गन्ध पुष्प डालकर इस मंत्र से अलंकृत करें।

ॐ आपो हि ष्ट्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन। महे रणाय चक्षसे॥

तत्पश्चात् इस मंत्र का उच्चारण करते हुए आचार्य यजमान से प्रथम कलश के जल से मूर्ति का अभिषेक करावें–

ॐ योवः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः॥

पुनः इस मंत्र का उच्चारण करते हुए आचार्य यजमान से द्वितीय कलश के जल से मूर्ति का अभिषेक करावें–

तस्मा ऽ अरङ्गमामवोयस्य क्षयाय जिन्वथ, आपो जनयथा च नः।

१-क्रीं क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं दक्षिणकालिके क्रीं क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं स्वाहा।

पश्चात् आचार्य पुनः इस मन्त्र का उच्चारण करते हुए यजमान से तृतीय कलश के जल से मूर्ति का अभिषेक करावें-

शं नो देवीरभिष्टय ऽआपो भवन्तु पीतये। शं य्योरभिस्त्रवन्तु नः।

उपर्युक्त मन्त्र का उच्चारण करते हुए आचार्य यजमान से चतुर्थ कलश के जल से मूर्ति का अभिषेक करावे।

अभिषेक के पश्चात् यजमान घृत से काली देवी की मूर्ति का लेपन कर उस पर उबटन। (उद्वर्तन) लगावें।

उद्वर्तन द्रव्य यह है-

१-चंदन २-कर्पूर ३-इलायची ४-काचौर ५- उशीर ६-शतपत्र ७-भद्रमुस्ता।

इनको चूर्ण कर दुग्ध में मिलाकर निम्न मन्त्र का उच्चारण करते हुए दस बार अभिमंत्रीत करे:-

मन्त्रः-यां सां चंद्र चूड़ नीलकंठजटाजूटवृत्त-सुशीतामोदवाहना-रुतांगप्रत्यंगावय वधातुध्यं एतन् मूर्ते निष्काश्यदाहताप शमयशमयसुशीतल त्वं कुरु-कुरु देहि-देहि यां सां स्वाहा॥

इस मंत्र का आचार्य उच्चारण करते हुए यजमान से मूर्ति में उद्वर्तन लगवाएँ-

ॐ या ऽओषधीः पूर्व्वा जाता देवेब्भ्यस्त्रियुगं पुरा।
मनै नु बब्भ्रूणामहठं॰ शतं धामानि सप्त च॥

विशेष-कालीप्रतिष्ठा में 'अग्न्युत्तारण' कर्म कृता-कृत है।

उपर्युक्त कर्म के समापन के पश्चात् आचार्य इस अनुवाक्य का उच्चारण यजमान से करवाते हुए मूर्ति पर जलधारा गिरवाये

पवमानः [१]सुवर्जनः।

आचार्य सर्वतोभद्रमण्डल के देवताओं की पूजा यजमान से करवाएँ, पूजन के पश्चात्–नवीन वस्त्र से वेष्ठित करवाकर आचार्य यजमान से पायस बलि भी प्रदान करवाएँ।

पायसबलि प्रदान करवाने के पश्चात् जलपूर्ण वस्त्रवेष्ठित तथा आम्रपल्लव विभूषित आठकलशों को आचार्य इन मन्त्रों का उच्चारण करते हुए यजमान द्वारा ही आठों दिशाओं क्रम से स्थापित करवायें–

१. हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

२. य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम॥

३. यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पद कस्मै देवाय हविषा विधेम॥

४. यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः। यस्येमाः प्रदिशो यस्य बाहु कस्मै देवाय हविषा विधेम॥

१-पवमानः सुवर्जनः पवित्रेण विचर्षणि। यः पोता स पुनातु मा॥

५. येन द्यौरुग्रा पृथिवी च हडहा येन स्वः स्तभितं येन नाकः। यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम॥

६. यं क्रन्दसी अवसा तस्तमाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम॥

७. आपो ह यद्वृहतीविंश्वमायन् गर्भ दधाना जनयन्तीरग्निम्। ततो देवानां समवर्ततासुरे कः कस्मै देवाय हविषा विधेम॥

८. यश्चिदापो महिना पर्यपश्यद् दक्षं दधाना जनयन्तीर्यज्ञम्। यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम॥ (ऋ० १०।१२१।१-८)

आचार्य आठों दिशाओं में आठों कलशों को स्थापित करवाने के पश्चात् आठ दीपकों को प्रज्वलित कर समीप में रखे, पश्चात् किसी तेजस पात्र में घृत और सहद मिलाकर स्वर्ण (सोने) की शलाका से मूर्ति के दक्षिण नेत्र का उनमिलन आचार्य इस मन्त्र की उच्चारण करते हुए यजमान के द्वारा करवायें-

ॐ चित्रं देवानामुदगादनीकं चक्षुर्म्मित्रस्य वरुणस्याग्नेः॥

इस कर्म की समाप्ति के पश्चात् आचार्य निम्न मन्त्र का उच्चारण करें-

ॐ यजिष्ठं त्वा ववृमहे देवं देवत्रा होमारममर्त्यम्। अस्य यज्ञस्य सुक्रतुम्॥

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्ब्बाहुब्भ्यां पूष्णो हस्ताब्भ्याम्। सरस्वत्यै व्वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्म्राज्येनाभिषिञ्चाम्म्यसौ॥

तत्पश्चात् यजमान शलाका को जल से स्वच्छ करे और मधु लेकर मूर्ति के वामनेत्र का उनमिलन करते समय आचार्य निम्न वैदिक मन्त्र का उच्चारण करें–

ॐ तच्चक्षु र्देवहितं पुरस्ताच्छुक्र मुच्चरत् पश्येम शरदः शतम् जीवेम शरदः शतठं॰ श्रुणुयाम शरदः शतं प्रब्रवाम् शरदः शत मदीनः श्याम शरदः शतं भूयश्च शरदः शतात्॥

इन तीनों मन्त्रों का उच्चारण आचार्य सहित सभी ब्राह्मण करें उस समय वहाँ ब्राह्मण एवं आचार्य के अतिरिक्त कोई भी अन्य सदस्य न हों–

१. ॐ सुपर्णा वाचमक्रतोप द्यव्या खरे कृष्णा इषिरा अनर्तिषुः। न्य ङ्गि यन्तुपरस्य निष्कृतं पुरु रेतो दधि रे सूर्यश्वितः।

२. ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्य मगन्म ज्योति रुत्तमम्।

३. ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणाग्ने॥

इसके पश्चात् काली देवीको अन्नराशि प्रदान करें तथा दर्पण दिखावें। इसके साथ ही साथ मन्त्र घोष एवं वाद्य घोष करें तथा इस मन्त्र का उच्चारण करके आचार्य तथा प्रतिष्ठा स्थल पर उपस्थित अन्य ब्राह्मण देवी को स्नान करावें–

ॐ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्त ऽआश्विनाः श्येतः श्येताक्षोऽरुणस्ते रुद्द्राय पशुपतये कर्ण्णा यामा ऽअवलिप्ता रौद्द्रा नभोरूपाः पार्ज्जन्न्याः॥

पुनः इन मन्त्रों का उच्चारण करते हुए देवी को स्नान करावें–

ॐ समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्यनिविश मानाः। इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु॥

ॐ या आपो दिव्या उतवा स्त्रवन्ति खनित्रिमा उतवा याः स्वयंजाः। समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु॥

ॐ या सां राजा वरुणो याति मध्ये सत्यानृते अवयश्यञ्जनानाम्। मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु॥

ॐ या सुराजा वरुणो यासु सोमो विश्वेदेवा यासर्ज मदन्ति। वेश्वानरो यास्वग्निः प्रविष्टन्ता आपो देवीरिह मामवन्तु॥ (ऋ० ७।४९।१-४)

देवी के स्नान के पश्चात् इस मन्त्र का उच्चारण करते हुए आचार्य वस्त्रयुग्म आच्छादित करें-

ॐ अभि वस्त्रा सुवसनान्यर्षा ऽभि धेनूः सुदुघाः पूयमानः। अभि चन्द्रा भर्तवे नो हिरण्या ऽभ्यश्वान् रथिनो देव सोम॥

आचार्य निम्न मन्त्र का उच्चारण करते हुए यजमान से मूर्ति के दाहिने हाथ में श्वेत ऊनी धागा बधवाएँ-

ॐ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम्। सुमङ्गलश्च शकुने भवासि मा त्वा का चिदमिभा विश्वाविदत्॥

मूर्ति के दायें हाथ में श्वेत ऊनी धागा बधवाने के पश्चात् आचार्य व सभी ब्राह्मण पुरुषसूक्त के इन सोलह मन्त्रों का उच्चारण कर काली देवी की स्तुति यजमान से करावें-

पुरुषसूक्तम्

हरिः ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्।
स भूमिर्ठ॰ सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥
पुरुष ऽएवेदर्ठ॰ सर्व्वं य्यद्भूतं यच्च भाव्व्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः।
पादोऽस्य व्विश्वा भूतानि त्रिपादस्यामृतं दिवि॥

त्रिपादूर्ध्व ऽउदैत्पुरुषः पादो ऽस्येहाभवत्पुनः।
ततो व्विष्वङ्व्यक्क्रामत्साशनानशने ऽअभि॥
ततो व्विराडजायत व्विराजो ऽअधि पुरुषः।
स जातो ऽअत्यरिच्यत पश्चाद् भूमिमथो पुरः॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्क्रे वायव्यानारण्या ग्राम्म्याश्च ये॥
तस्माद्याज्ञात्सर्वहुत ऽऋचः सामानि जज्ञिरे।
छन्दाठ० सि जज्ञिरे तस्माद्यजुस्तस्म्मा दजायत॥
तस्मादश्वा ऽअजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽअजावयः॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवा ऽअयजन्त साद्ध्या ऽऋषयश्च ये॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत्किं बाहू किमूरू पादा ऽउच्च्येते॥
ब्राह्मणोऽस्य मुखमासीद् बाहूराजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याठ० शूद्रो ऽअजायत।
चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो ऽअजायत।
श्रोत्राद्वायुश्च प्प्राणश्च मुखादग्निरजायत॥
नाब्भ्या ऽआसीदन्तरिक्षठ० शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ ऽअकल्पयन्॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तो ऽस्यासीदाज्यं ग्रीष्म ऽइध्मः शरद्धविः॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साद्ध्याः सन्ति देवाः॥

॥ इति पुरुषसूक्तम् स्तुतिः ॥

पुरुषसूक्त से काली देवी की स्तुति करवाने के पश्चात् आचार्य देवी की भूतशुद्धि करावें।

भूत शुद्धि के लिए इन दो मंत्रों का उच्चारण क्रमानुसार करें-

१. ॐ विश्वकर्मन हविषा वावृधानः स्वयं यजस्य पृथिवीमुतद्याम्। मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु॥

२. ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक ऽआसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

पुनः [1]भूतशुद्धि के लिए 'इयममाप्रजाम्' इस मंत्र का उच्चारण करें, उसके पचात् आचार्य इन मन्त्रों का उच्चारण स्वयं करते हुए यजमान से भी करवायें-

---

१-तन्त्रोक्त भूतशुद्धि-
ॐ भूत श्रृगाराच्छिरः सुपुम्ना पथे न जीव शिवम् परं शिव पदे योजयामि स्वाहाः ॥ १ ॥
ॐ यँ लिङ्गाशरीरं शोषय-शोषय स्वाहा ॥ २ ॥
ॐ रँ संकोच शरीरं दह-दह स्वाहा ॥ ३ ॥
ॐ परम शिव सुषुम्नापथेन मूल षिृ मूल सोल्लस ज्वल ज्वल प्रज्वल प्रज्वल सोऽहम् हंसः स्वाहा ॥ ४ ॥

तत्र मंत्रः—यतो बुध्यहं कारचितं पथिव्यप्ते काश शब्द स्पर्श रुपर सगंध—श्रोत्रत्वक् चक्षुजिह्वा घ्राणवाक् पाणिवाद पायूस्थ जीव प्रणाई हागव्य सुंखु चिरं तिष्ठंतु स्वाहा।

ओं आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः सो हं इति॥

यजमान के हाथ को देवी के मस्तक पर रखवाकर उपर्युक्त मन्त्रों का उच्चारण आचार्य स्वयं तीन बार करें।

प्राणप्रतिष्ठा

तदनन्तर काली देवी के शिर या हृदय को स्पर्श कर प्राण-प्रतिष्ठा करें उसके पूर्व निम्न विनियोग करें—

अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्म-विष्णु-रुद्रा ऋषयः, ऋग्यजुः सामानि छन्दांसि। क्रियामयवपुःप्राणाख्या देवता। ॐ बीजम्। ह्रीं शक्तिः। क्रौं कीलकम् प्राणप्रतिष्ठायां विनियोगः।

इसके पश्चात् ऋष्यादियों का निम्न क्रम से शिर-मुख-हृदय-नाभि गुह्यस्थान और पैरों में न्यास करें।

ॐ ब्रह्मविष्णुमहेश्वरेभ्यो ऋषिभ्यो नमः—शिर

ॐ ऋग्यजुः—सामछन्देभ्यो नमः—मुखे

ॐ चैतन्यरूपायै प्राणशक्त्यै देवतायै नमः—हृदि

ॐ आं बीजाय नमः—गुह्यस्थान

ॐ शक्त्यै नमः नमः—पादयो

ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने ॐ हृदयाय नम—हृदय

ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा—शिर।

ॐ टं ठं डं ढ़ णं उं श्रोत्रत्वक्चक्षुजिह्वाघ्राणात्मने ॐ शिखायै वषट् - शिखा।

ॐ तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्सने ऐं कवचाय हुम्–कवच।

ॐ पं फं बं भं मं ॐ वचनादानविहरणोत्सर्गानन्दात्मने ॐ नेत्रत्रयाय वौषट्–नेत्र।

ॐ अं यं रं लं वं शं षं सं हं क्षं मनोबुद्ध्यहङ्कार चित्तात्मने अः अस्त्राय फट्-अस्त्र।

इस प्रकार से काली देवी की मूर्ति में न्यास करके, उपर्युक्त कर्म के पश्चात् देवी का स्पर्श कर जप करें–

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य प्राणाः इह प्राणाः।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य जीव इह स्थितः॥

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य सर्वेन्द्रियाणि।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य वाङ्मनश्चक्षुः।

श्रोत्रजिह्वाघ्राणप्राण इहागत्यस्वस्तये सुख चिरंतिष्ठतु स्वाहा।

इसके पश्चात् आचार्य इस सूक्त का जप करके अर्चित हृदय में अंगुठे को देखकर जप करें–

ॐ ध्रुवा द्यौ ध्रुवा पृथिवी ध्रुवासः पर्वतो इमे। ध्रुवविश्वमिदं जगद् ध्रुवो राजा विशामयम्॥

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः। ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥

ध्रुवं ध्रुवेण हविषा ऽभि सोमं मृशामसि। अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत्॥

इस श्लोक का उच्चारण करें-

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्यमर्चायै स्वाहेति यजुरीरयेत्॥

उपर्युक्त कर्म के पश्चात् यो प्रणव (ॐ) से रोककर देवी का सजीव ध्यान करे।

इस मन्त्र से देवी के शिर में हाथ रखकर देवी का ध्यान करें-

ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्। सम्बाहुभ्यान्धमति संपतत्रैर्द्यावा भूमी जनयन देवऽएकः॥

प्राण-प्रतिष्ठा के पश्चात् आचार्य पुरुषसूक्त के मन्त्रों का उच्चारण करते हुए काली देवी का उपस्थान करावें, उसके पश्चात् आचार्य यजमान से इस प्रार्थना करवायें-

स्वागतं देव-देवेशि मद्भाग्यादिहागता।
धर्मार्थ काममोक्षार्थं स्थिरा भव शुभासने॥

तत्पश्चात् आचार्य इस मंत्र का उच्चारण करते हुए यजमान से कालीदेवी के पैर से सिर तक स्पर्श करावें-

हरिः ॐ मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमं तनोत्वरिष्टं य्यज्ञठं० समिमं दधातु विश्वेदेवास ऽइह मादयन्तामो ३ँ प्रतिष्ठ॥

प्रतिष्ठा सूक्त के उपरान्त आचार्य एवं सभी ब्राह्मण इन पाँच मन्त्रों का तीन बार उच्चारण करें-

१. इहवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः। इन्द्र इवेह ध्रुवस्तिष्ठे ह राष्ट्र मु धारय ॥

२. इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा। तस्मै सोमो अधि ब्रवत् तस्मा उ ब्रह्मणस्पतिः॥

३. ध्रुवा द्यौ ध्रुवा पृथिवी ध्रुवासः पर्वतो इमे। ध्रुवविश्वमिदं जगद् ध्रुवो राजा विशामयम्।

४. ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः। ध्रुवं त इन्द्रशचाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥

५. ध्रुवं ध्रुवेण हविषा ऽभि सोमं मृशामसि। अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत्॥

उपर्युक्त कर्म की समाप्ति के पश्चात् आचार्य निम्न पौराणिक श्लोकों एवं वैदिक मन्त्रों का उच्चारण करते हुए, क्रमानुसार देवी को पाद्य-आचमन करावे तथा पञ्चामृत से स्नान करावें-

पाद्यम्-

सुवर्णपात्रेऽतितमां पवित्रे भागीरथीवारिमयोपनीतम्।
सुरासुरैरर्चितपादयुग्मे गृहाण पाद्यं विनिवेदितं ते॥

ॐ एतावानस्य महिमातो ज्यायाँश्च पुरुषः। पादोऽस्य विश्वाभूतानि त्रिपादस्या मृतं दिवी॥

आचमनम्—

समस्तदुःखौघविनाशदक्षे! सुगन्धितं फुल्लप्रशस्त पुष्पैः।
अये! गृहाणाचमनं सुवन्द्ये! निवेदनं भक्तियुतः करोमि॥

ॐ ततो व्विराडजायत व्विराजो ऽअधि पूरुषः। स जातो ऽअत्यरिच्च्यत पश्श्चाद् भूमिमथो पुरः॥

पञ्चामृत स्नानम्—

दुग्धेन दध्ना मधुना घृतेन संसाधितं शर्करया सुभक्त्या।
आलोकतृप्ति कृतलोक! देवि! पञ्चामृतं स्वीकुरु लोकपूज्ये!॥

ॐ पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्।

'इमा आपः शिवतमः', इस मन्त्र का उच्चारण करके आचार्य काली देवी का अभिषेक यजमान से करावें। तत्पश्चात् विभिन्न सूक्तों का उच्चारण कर आचार्य देवी को स्नान करावें तथा वस्त्रादिक उपचारों से यजमान से देवी की मूर्ति का पूजन भी करावें।

आचार्य इस मन्त्र का उच्चारण कर यजमान से अग्नि का पूजन करावें—

ॐ अग्ग्ने नय सुपथा राये ऽअस्मान् विश्वानि देव व्वयुनानि व्विद्वान्। युयोध्यस्म्मज्जुहुराणमेनो भूयिष्ठां ते नम ऽउक्तिं व्विधेम॥

पश्चात् किसी बड़े पात्र से तिलों को ग्रहण कर दाहिने हाथ से घी भर कर स्रुव को ले दाहिने पैर की जांघ को मोड़ कर ब्रह्मा से स्पर्श कर इस मन्त्र से स्विष्टकृत संज्ञक आहुति यजमान से प्रदान

करावें तथा स्रुवे में बचे घृत का त्याग आचार्य प्रोक्षणी पात्र में यजमान से ही करावें-

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम॥

पश्चात्-अग्निदेव के दक्षिण अग्नि के पीछे पश्चिम देश में पूर्वाभिमुख बैठकर स्रुव के द्वारा कुण्ड से भस्म लेकर निम्न नाम मंत्रों से यजमान क्रमानुसार ललाट्-गले-दाहिने बाहु और हृदय में भस्म लगावें-

ॐ त्र्यायुषं जमदग्नेः-ललाट् में लगावें।

ॐ कश्यपश्य त्र्यायुषम्-गले में लगावें।

ॐ यद्देवेषुत्र्यायुषम्-दाहिने बाहु में लगावें।

ॐ तन्नो ऽअस्तु त्र्यायुषम्-हृदय में लगावें।

इसके पश्चात् आचार्य होम कर्म का समापन करावें। तथा यजमान से इस श्लोक का उच्चारण करवा के विसर्जन करावें-

गच्छ गच्छ सुर श्रेष्ठ! स्वस्थाने परमेश्वर।
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन!॥

विसर्जन के पश्चात् यजमान संकल्प करके ही आचार्य को गौदान देवें।

यजमान अपने आचार्य को दक्षिणा अलंकार तथा स्वर्णादि देने से पूर्व निम्न संकल्प करें-

कृतस्य कालीचरप्रतिष्ठाकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्ण फलप्राप्त्यर्थं च आचार्यादिभ्यो महर्त्विग्भ्यः दक्षिणां विभज्य दातुमहमुत्सृज्ये।

दक्षिणा के पश्चात् ब्राह्मण भोजन करवाने से पूर्व पुनः निम्न संकल्प यजमान करें-

कृतस्यकालीचरप्रतिष्ठाकर्मसमृद्धये यथाशक्ति-ब्राह्मणान् भोजयिष्यामि।

सकल्प के पश्चात् ब्राह्मणों को प्रेम व आदर सत्कार से भोजन करावें। ब्राह्मण भोजन के पश्चात् यजमान दीन, अनाथजनों को इस संकल्प करके भूयसी दक्षिणा एवं अन्नादिक भी प्रदान करें।

कृतेऽस्मिन् कालीचरप्रतिष्ठाकर्मणिन्यूनातिरिक्तदोष-परिहारार्थं दीनानाथेभ्यश्च यथाशक्ति भूयसीं दक्षिणां विभज्य दातुमहमुत्सृज्ये॥

यजमान सपत्नीक, पुत्र-पौत्रादि व अपने सम्बन्धियों तथा अपने इष्टमित्रों के साथ कालीदेवी के प्रसाद को ग्रहण करें।

॥ कालीप्रतिष्ठा समाप्तः॥

गणेश-प्रतिष्ठा

नित्यक्रियाओं से निवृत्त होने के पश्चात् यजमान शुभासन पर प्राङ्मुख बैठे, तथा अपने से दक्षिण की ओर अपनी धर्मपत्नी को बैठाकर इन तीन नामों का उच्चारण कर तीन बार आचमन करें:-

ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः।

इस मंत्र का उच्चारण कर पवित्र धारण करके प्राणायाम करे:-

ॐ पवित्रेस्थो व्वैष्णव्व्यौ सवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्द्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्र पूतस्य यत्कामः पुने तच्छकेयम्॥

पश्चात् इस श्लोक का उच्चारण कर स्वयं के ऊपर और समस्त प्रतिष्ठा सामग्री की पवित्रता हेतु जल छिड़के-

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।

यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु,

तत्पश्चात् यह संकल्प करें-

देशकालौसंकीर्त्य-अमुक गोत्रोत्पन्नो-मुकशर्माऽहं[वर्माऽहं-गुप्तोऽहं]सर्वाय-छांति पूर्वक दीर्घायु विपुल पुत्र-पौत्राद्यनवछिन्न-संततिवृद्धि स्थिरलक्ष्मी कीर्तिलाभ-शत्रु पराजय सर्वपाप निरसन सकल वाप्ति सकलसुख-धर्मार्थ-काम-मोक्ष प्राप्ति द्वारा श्री परमेश्वर प्रीत्यर्थं वा महागणपति प्रीत्यर्थं गणेशमूर्ति चलप्रतिष्ठाख्यंकर्म करिष्ये।

• तदंङ्गत्वेन स्वस्ति पुण्याहवाचनं-मातृकापूजनं-नान्दी श्राद्धं-आयुष्य मंत्रजपं आचायादि ब्राह्मणानां वरणं करिष्ये।

उपर्युक्त कर्म की समाप्ति के पश्चात् इस श्लोक का उच्चारण कर आचार्य पीली सरसों फेकें-

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥

पश्चात् पंचगव्य और शुद्ध जल को कुशा के द्वारा समस्त प्रतिष्ठा सामग्रीयों के प्रोक्षण हेतु छिड़के।

पश्चात् निम्न वैदिकमंत्र का उच्चारण कर रक्षा-कर्म करें:-

ॐ देवा आयान्तु यातुधाना अपयान्तु विष्णो देवयजनं रक्षस्व।

उपर्युक्तकर्म की समाप्ति के पश्चात् निम्न क्रमानुसार गणेशजी की मूर्ति में अग्न्युत्तारण करें-

आचार्य अग्न्युत्तारण कर्म के लिए यजमान से निम्न संकल्प करावें:-

करिष्यमाण गणेशप्रतिष्ठाकर्मणि न्यूनातिरिक्त दोष परिहारार्थं अथवा अवघातादि दोष परिहारार्थं अमुक गोत्रः अमुक शर्माहं [वर्मा-गुप्तः]अस्यां सुवर्णमय अथवा रजतमय अथवा काँस्यमय श्रीगणेशप्रतिमायाः सान्निध्यार्थं च अग्न्युत्तारणं करिष्ये।

संकल्प की समाप्ति के पश्चात् किसी पात्र में स्वर्ण की अथवा रजत की या ताम्र की गणेशजी की प्रतिमा को पंचामृत से लेपन पूर्वक पान के ऊपर रख (समुद्रस्य से शिवोभव) तक के इन बारहवैदिक मंत्रों का उच्चारण कर अग्न्युत्तारण कर्म को करें:-

---

• संकल्प के पश्चात् स्वतिपुण्याहवाचनं, मातृकापूजन, नान्दीश्राद्धं, आयुष्य मंत्र जंप, आचार्य वरण कर्म ग्रहशांति प्रयोग अनुसार करें।

अग्न्युत्तारणमन्त्राः—

ॐ समुद्द्रस्य त्वावकयाग्ग्ने परि व्ययामसि।
पावको ऽअस्मभ्भ्यर्ठ० शिवो भव ॥ १ ॥
ॐ हिमस्य त्वा जरायुणाग्ग्ने परि व्वययामसि।
पावको ऽअस्मभ्भ्यर्ठ० शिवो भव ॥ २ ॥
ॐ उप ज्ज्मनुप वेतसेऽवतर नदीष्ष्वा।
अग्ने पित्तमपामसि मण्डूकि ताभिरागहि।
सेमं नोयज्ञं पावकवर्ण्णर्ठ० शिवं कृधि ॥ ३ ॥
ॐ अपामिदं न्ययनर्ठ० समुद्द्रस्य निवेशनम्।
अन्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको
अस्मभ्भ्यर्ठ० शिवो भव ॥ ४ ॥
ॐ अग्ग्ने पावक रोचिषा मन्द्रया देव जिह्वया।
आ देवान्न्वक्षि यक्षि च ॥ ५ ॥
ॐ स नः पावक दीदिवोऽग्ग्ने देवाँ२ ॥ऽइहावह।
उप यज्ञर्ठ० हविश्च्च नः ॥ ६ ॥

ॐ पावकया यश्चितयन्त्या कृपा क्षामन्नुरुच ऽउषसो न भानुना। तूर्व्वन्न यामन्नेतशस्य नू रण ऽआ यो घृणे न ततृषाणो ऽअजरः ॥ ७॥

ॐ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्च्चिषे। अन्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्भ्यर्ठ० शिवो भव ॥ ८ ॥

ॐ नृषदे व्वेडप्सुषदे बेड् व्वर्हिषदे व्वेड् व्वनसदे व्वेट् स्वर्व्विदे व्वेट् ॥ ९ ॥

ॐ ये देवा देवानां य्यज्ञिया यज्ञियानाठं॰ संवत्सरीण-मुपभागमासते। अहुतादो हविषो यज्ञे ऽअस्मिन्नन्त्स्वय पिबन्तु मधुनो घृतस्य ॥ १० ॥

ये देवा देवेष्वधि देवत्वमायन्न्ये ब्रह्मणः पुर ऽएतारो ऽअस्य। येब्भ्यो न ऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्या ऽअधि स्नुषु ॥ ११ ॥

ॐ प्राणदा ऽअपानदा व्व्यानदा व्वर्च्चोदा व्वरिवोदाः। अन्याँस्ते ऽअस्म्मत्तपन्तु हेतयः पावको ऽअस्म्मब्भ्यठं॰ शिवो भव ॥ १२ ॥

पश्चात् अग्निपद रहित, फिर अग्निपद सहित प्राकृतसूक्त को पढ़े, फिर +आपोहिष्ठा इन तीन मंत्रों से एवं * हिरण्यवर्णाम् इन चार

+आपोहिष्ठा की तीन ऋचाएँ-

ॐ आपो हि ष्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन महे रणाय चक्षसे महिम् ॥ १ ॥

योः वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः ॥ २ ॥

तस्मा अरं गमाम वो यस्याक्षयाय जिन्वण आपो जनयथा च नः ॥ ३ ॥

(शु० अ० ११, म० ५०, ५१, ५२)

* हिरण्यवर्णां की चार ऋचाएँ-

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म ऽआवह ॥ १ ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्या हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवि मुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥ [श्रीसूक्तम्]

मंत्रों से और पवमान सुवर्जन इन अनुवाकों से और व्याहृतियों से गणेशजी को पंचगव्य से स्नान कराकर निम्न मंत्र का उच्चारण करके गणेशजी की मूर्ति को पंचपंल्वों से स्नान करावे–

ॐ अश्श्वत्त्थे वो निषदनं पर्ण्णे वो व्वसतिष्कृता।

गोभाज ऽइत्किलासथयत्त्सनवथ पूरुषम्॥

पुनः मणि–मुक्ता–प्रवाल एवं सुवर्णादि के जल से प्रतिमा को शुद्धोदक स्नान कर निम्न बीज मंत्रों से प्रोक्षण करें:–

अं गं सं

पश्चात् गणेशजी की मूर्ति के सिर पर हाथ रखकर इन मंत्रों का उच्चारण पुष्पांजलि प्रदान करें–

ॐ गणानां त्वा गणपतिर्ठ० हवामहे प्रियाणां त्वा प्रियपतिर्ठ० हवामहे निधीनां त्वा निधिपतिर्ठ० हवामहे व्वसो मम ऽआहमजानि गर्ब्भधमात्त्वमजासि गर्ब्भ धम्।

पुष्पांजलि प्रदान करने के पश्चात् पीठान्तर में वस्त्र युग्म प्रदान कर निम्न श्लोकानुसार गंध एवं पुष्प अथवा पुष्पमाला के द्वारा गणेशजी का पूजन करे।

गन्ध से पूजन–

कर्पूरवासितजलेनसुधृष्टमेतं श्रीभद्रारुजमिमंसुविलेपनाय।
गन्धगृहाणशिवपुत्रशिवायमेस्या हारिद्रगन्धग्रहणायशिवेप्रसीद॥

पुष्प अथवा पुष्प माला से पूजन–

पुष्पाणि गन्धरस सवर्ण सुरूपभाञ्जि कालोपजानि विनयेन मयाऽऽहृतानि।
लम्बोदराय जननी सहिताय तुभ्यं भक्त्याऽर्पये परिगृहाण दयस्व मह्यम्॥

पश्चात् [1]हिरण्यगर्भ इत्यादि इन आठ मंत्रों का क्रमानुसार उच्चारण कर आठ दीपकों के द्वारा गणेशजी की आरती करें। इसके पश्चात् स्वर्ण की शलाका लेकर गणेश की प्रतिमा के समक्ष भोजन पदार्थ-छत्र-चामर, इत्यादि वस्तुओं को रखे, फिर यजमान गणेश देवता की प्रतिमा के पीछे से दक्षिण की ओर जाकर गणेश जी का ध्यान करें।

उपरान्त इस मंत्र का उच्चारण करें-

ॐ गणानां त्वा गणपतिर्ठ० हवामहे प्रियाणां त्वा प्रियपतिर्ठ० हवामहे निधीनां त्वा निधिपतिर्ठ० हवामहे व्वसो मम ऽआहमजानि गर्ब्भधमात्त्वमजासि गर्ब्भ धम्।

पश्चात् इस मंत्र का उच्चारण कर पायस-भक्ष्य भोज्य दर्पण आदि रख देवें-

ॐ आ कृष्णेन रजसा व्वर्तमानो निवेशयन्न मृतंमर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥

१-हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम १ यः आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम २ यः प्राणतो निमिषतो महित्वैक इद्राजया जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ३ यस्यमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः। यस्येमाः प्रदिशो यस्य बाहु कस्मै देवाय हविषा विधेम ४ येन द्यौरुग्रा पृथिवी च हडहा येन स्वः स्तभितं येन नाकः। यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ५ यं क्रदसी अवसा तस्तमाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ६ आपो ह यद्वृहतीविश्वमायन् गर्भ दधेना जनयन्तीरग्निम्। ततो देवानां समवर्ततासुरे कः कस्मै देवाय हविषा विधेम ७ यश्चिदापो महिना पर्यपश्यद् दक्षं दधाना जनयन्तीर्यज्ञम्। यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम ८ (ऋ० १०। १२१। १-८)।

पश्चात् ताम्रपात्र में [1]मधुवाता इस मंत्र से मधु और [2]घृतंमिमिक्षे इस मंत्र से अभिमंत्रित करके स्वर्ण की शलाका से यथा अंजतित्वा[3] इस मंत्र से आज कर, देवस्यत्वा[4] इस मंत्र से पुनः शकर आजे।

गौद्रोहन काल के पर्यन्त समय व्यतीत कर सभी लोग गणेश देवता के दाहिनी ओर से भूमिपर दण्डवत होकर निम्न प्रार्थना करें–

भगवन् देव देवेश त्वं माता देवदेहिनाम्।
त्वया व्याप्त मिदं सर्वं जगत् स्थावर जंगमम्॥
त्वमीन्द्र० पावकश्चैव यमोनिऋति रेव च।
वरुणो मातरः सोम यो ईशान प्रभुरव्ययः॥
येण रूपेण भगवन् सत्वयाह्यं चराचरम्।
तेनं रूपेण देवेश अर्चायां सन्निधौ भव॥

उपर्युक्त कर्म के पश्चात् निम्न क्रमानुसार सर्वतोभद्रमंडल में ब्रह्मादि देवताओं की स्थापना करें–

आचार्य यजमान के दाएँ हाथ में जल अक्षतादि एवं यथाशक्ति द्रव्य देकर निम्न संकल्प करावें–

गणेश चल प्रतिष्ठा कर्मणि महावेद्यां सर्वतोभद्रमण्डले ब्रह्मादि देवतानां स्थापनं पूजनं च करिष्ये।

१–मधुव्वाता ऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥
मधु नक्तमुतोषसो मधुमतपार्थिवठ. रजः। मधु द्यौ रस्तु नः पिता मधुमान्नो
वनस्पतिर्म धुमाँ अस्तु सूर्य्यः माध्वी गावो भवन्तुनः॥ [ऋ० १।९०।६-८]

२–घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितौ घृतं वस्य धामं। अनुष्व धमावह मादयस्व स्वाहा कृतं वृष भवक्षि हव्यम् [यजु० स०]

३–यथा अजतित्वा इस मंत्र के विषय में कुछ संशय होने के कारण इसको यहाँ नहीं दिया जा रहा हैं।

४–देवस्यत्वा सवितुः प्रसवे ऽश्विनौ बाहुभ्यां पुष्णौ हस्ताभ्याम् [तेत-सं० १।१।६]

संकल्प के जलादिको यजमान भूमि पर छोड़ दे, पश्चात् आचार्य काष्ठ की चौकी अथवा पीढ़े पर वस्त्रादि बिछाकर चारों ओर से मौली के द्वारा बंधनकर उस पर सर्वतोभद्रमंडल का निर्माण कर चावल की ढेरी पर ताम्र कलश की स्थापना यजमान से करावे, पश्चात् उसपर सिंहासन अथवा किसी शुद्ध पात्र में गणेश जी की प्रतिमा स्थापित करें।

नीचे लिखे मंत्रों से अथवा नाममंत्रों का उच्चारण कर सर्वतोभद्र मंडल के देवताओं का स्थापन एवं पूजन निम्न क्रम से करें-

[१] ब्रह्म यज्ञानम्	ब्रह्मणे नमः
[२] वयर्ठ० सोम	सोमाय
[३] तमीशानम्	ईशानाय
[४] त्रातारमिन्द्रम्	इन्द्राय
[५] त्वन्नो अग्ने	अग्नये
[६] यमायत्वाङ्गि	यमाय

ये सभी मंत्र शु० यजुर्वेद संहिता के हैं-

१-ॐ ब्रह्मयज्ञानं प्रथमं पुरसाद्विसीमतः सुरुचोव्वेनऽआवः।
स बुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः॥

२-व्वयर्ठ० सोम व्रतेतवमनस्तनू षु बिभ्रतः॥ प्रजावन्तः सचेमहि॥

३-तमीशानञ्जगतस्तस्थुषस्प्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम्।
पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये॥

४-त्रातारमिन्द्रमवितारमिन्द्रर्ठ० हवे हवे सुहवर्ठ० शूरमिन्द्रम्।
ह्वयामिशक्क्रम्पुरुहूतमिन्द्रर्ठ० स्वस्ति नो मघवा धात्विन्द्रः॥

५-त्वन्नो ऽअग्ने तवदेवपायुभिर्म्मघोनोरक्षतन्वश्चवन्द्य।
त्राता तोकस्यतनयेगवामस्यनिमेषर्ठ० रक्षमाणस्तवव्व्रते॥

६-यमायत्त्वाङ्गिरस्वतेपितृमते स्वाहा। स्वाहा घर्म्मायस्वाहाघर्म्मः पित्रे॥

[१]असुन्वन्तमयज	निर्ऋतये
[२]तत्त्वायामि	वरुणाय
[३]आनो नियुद्भि	वायवे
[४]सुगावो देवाः	अष्टवसुभ्यो
[५]रुद्राः सर्ठ०	एकादशरूद्रेभ्यः
[६]यज्ञोदेवानाम्	द्वादशादित्येभ्यः
[७]अश्विना	अश्विभ्यां
[८]विश्वेदेवास	सपैतृकविश्वेभ्योदेवेभ्यो

ये सभी मंत्र शु० यजुर्वेद संहिता के हैं–

१–असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य।
अन्यमस्मदिच्छसातऽइत्या नमो देविनिर्ऋतेतुभ्यमस्तु॥

२–तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानोव्वरुणेह बोद्ध्युरुशर्ठ० समानऽआयुः प्रमोषीः॥

३–आनोनियुद्भि शतिनी भिरध्वर्ठ० सहस्त्रिणी भिरुपयाहि यज्ञम्। व्वायोऽअस्मिन्तसवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥

४–सुगावो देवाः सदनाऽअकर्मय ऽआजग्मेवर्ठ० सवनञ्जुषाणाः।
भरमाणाव्वहमाना हवीर्ठ० ष्यस्मे धत्तव्वसवो व्वसुनि स्वाहा॥

५–रुद्राः सर्ठ० सृज्य पृथिवीम्बृहज्योतिः समीधिरे।
तेषांभानुरजस्त्रऽइच्छुक्रो देवेषुरोचते॥

६–यज्ञोदेवानां प्रत्येतिसुम्नमादित्यासोभवता मृडयन्तः।
आवोऽर्व्वाचीसुमतिर्व्ववृत्त्यादर्ठ० होश्चिद्याव्वरिवोवित्तरासदादित्येभ्यस्त्वा॥

७–अश्विनातेजसाचक्षुः प्प्राणेन सरस्वती व्वीर्य्यम्।
व्वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम्॥

८–व्विश्वेदेवासऽआगत शृणुतामऽइमर्ठ० हवम्। एदम्बर्हिर्न्निषीदत। उपयाम-
गृहीतोऽसिव्विश्श्वेभ्यस्त्वा देवेभ्यऽएषते योनिर्व्विश्वेभ्यस्त्वा देवेभ्यः॥

[१]अभित्यन्देवर्ठ०	सप्तयक्षेभ्य:
[२]नमोऽस्तुसर्प्पे	भूतनागेभ्य:
[३]ऋताषाड्ऋत	गन्धर्वाप्सरोभ्य:
[४]यदक्रन्द:	स्कन्दाय
[५]आशु:शिशानो	नन्दीश्वराय
[६]यत्तेगात्रा	शूलाय
[७]काषिरसि	महाकालाय

ये सभी मंत्र शु० यजुर्वेद संहिता के हैं–

१–अभित्यन्देवर्ठ० सवितारमोण्यो: कविक्रतुमर्च्चामि सत्त्यसवर्ठ० रत्क्रधामभि प्प्रियंमतिंकविम्॥ ऊद्ध्र्वायस्याऽमतिर्भाऽअदिद्युतत्सवीमनिहिरण्य पाणिरमिमीत सुक्रतु: कृपास्व:। प्रजाब्भ्यसत्वा प्प्रजास्त्वानुप्प्राणन्तुप्प्रजास्त्व मनुप्प्राणिहि॥

२–नमोऽस्तु सर्प्पेब्भ्यो यो ये केचपृथिवीमनु॥
येऽअन्तरिक्षेयेदिवितेब्भ्यर्ठ० सर्प्पेभ्योनम:॥

३–ऋताषाड्ऋत धामाग्निर्गन्धर्व्व स्तस्यौषधयोप्सरसोमुदोनाम।
स नऽइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। व्वाट्ताब्भ्य: स्वाहा॥

४–यदक्रन्द: प्प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वापुरीषात्॥
श्येनस्य पक्षाहरिण स्यबाहूऽउपस्त्युत्यम्महि जातन्तेऽअर्व्वन्॥

५–आशु: शिशानो व्वृषभोनभीमोघनाघन: क्षोभणश्चर्षणीनाम्।
सङ्क्रन्दनोनिमिषऽ एकवीर: शतर्ठ० सेनाऽअजयत्त्साकमिन्द्र:॥

६–यत्तेगात्रादग्निापच्यमानादभिशूल्यन्निह तस्यावधावति।
मातद्भूम्यामाश्रिणन्मातृणेषु देवेब्भ्यस्तदशद्ब्भ्योरातमस्तु॥

७–ॐ काषिरसि समुद्रदस्य त्वाक्षित्त्या ऽउन्नयामि।
समापो ऽअद्भिरग्मत समोषधीभिरोषधी:॥

आचार्य हनुमानजी की मूर्ति के मुख और नेत्र में स्वर्ण की शलाका के द्वारा सहद व घृत को मिश्रित कर इस आधे वैदिक मंत्र का उच्चारण कर चिह्न करें–

ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुण-स्याग्ने:।

आचार्य इस वैदिक मंत्र का उच्चारण कर पायस, भक्ष्य, भोज्य, दर्पण आदि मूर्ति को दिखा देवें-

ॐ आ कृष्णेन रजसा व्वर्त्तमानो निवेशयन्न मृतंमर्त्त्यं च।
हिरण्येन सविता रथेना देवोयाति भुवनानि पश्यन्॥

उपरान्त किसी तेजस पात्र (धातुपात्र) में मधु भरकर देवता के सामने रखें, मूर्ति के दाहिने ओर बाई ओर तच्चक्षु इस मंत्र से हवन करें-

हवन की समाप्ति के उपरान्त यजमान, आचार्य को नवीन पंचवस्त्र, (अलंकार सामर्थ्य हो तो) तथा द्रव्यादि देवें।

चार प्रकार के अन्नों को देवता के समक्ष रख कर, मण्डप के चारों द्वारों पर विधिवत् कलश की स्थापना करे।

पश्चात् मूर्ति को पंचामृत व शुद्धोदक से स्नान करावें, तथा एकसौआठ कलशों की स्थापना कर, उनमें से बीस-बीस घड़े लेकर मूर्ति को स्नान करावे, उपरान्त पृथक्-पृथक् आठ कलशों के जल द्वारा स्नान करावें।

[1]पुरुषसूक्त, पावमानसूक्त, अस्यवागीयसूक्त, रुद्रसूक्त, महाशांतिसूक्त, सौरसूक्त व वायुसूक्त का पाठ आचार्य सहित प्रतिष्ठा स्थल पर उपस्थित सभी ब्राह्मण स्नान करवाने के समय करें। इसके उपरान्त विधि विधान से हनुमान जी का पूजन आचार्य सहित सभी ब्राह्मण यजमान से करावें।

---

१. पुरुषसूक्त, पावमानसूक्त, अस्यवागीयसूक्त, रुद्रसूक्त, महाशांतिसूक्त, सौरसूक्त व वायुसूक्त के लिए मेरे द्वारा रचित-टीकाकृत, हनुमत्-प्रतिष्ठा-पद्धति में देखें।

हनुमत्-पूजनम्

ध्यानम्—

मनोजवं मारुत-तुल्य वेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथ-मुख्यं श्रीरामदूतं शरण प्रपद्ये॥
ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्।
स भूमिर्ठ० सर्व्वतः स्पृत्वात्त्यतिष्ठद्दशाङ्गुलम्॥

आवाहनम्—

ॐ पुरुष एवेदर्ठ० सर्व्वं यद्भूतं यच्च भाव्यम्।
उतामृत्वस्येशानो यदन्नेनातिरोहति॥

आसनम्—

ॐ पुरुषऽएवेदर्ठ० सर्व्वं यद्भूतं यच्चभाव्यम्।
उतामृतत्वस्येशानो यद्दन्नेनातिरोहति॥

पाद्यम्—

सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिभिर्युतम्।
विघ्नराजगृहाणोदं भगवन्भक्त वत्सल॥
ॐ एतवानस्य महिमातो ज्यायाश्च पूरुषः।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिविः॥

अर्घ्यम्—

ॐ प्रजायतौ त्वा देवताया मुपोदके
लोकेनिदध्यभ्यसौ अयनः शोशुचदधम्॥

पंचामृतम्—

पयोदधि घृतं चैव मधु च शर्करान्वितम्।
पंचामृतं यथाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥
ॐ पंच नद्यः सरस्वतीमपियन्ति सस्रोतसः।
सरस्वती तु पंचधा सो देशो भवत्सरित् ॥

शुद्धोदक—

सुवर्णकलशानीतैर्गङ्गादि- सरिदुद्भवैः।
शुद्धोदकैः कपीश! त्वामभिषांमि मारुते॥
ॐ आपो हि ष्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन।
महे रणाय चक्षसे॥

कटिसूत्रम्—

ग्रथिता नवभी रत्नैर्मेखलां त्रिगुणीकृताम्।
मौञ्जंमोञ्जीमयं पीतां गृहाण पवनात्मज!॥

कौपीनम्—

कटिसूत्रं गृहाणेदं कौपीनं ब्रह्मचारिणः।
कौशेयं कपिशार्दूल! हरिद्रक्तं सुमंगलम्॥

उत्तरीयम्—

पीताम्बर-सुवर्णाभमुत्तरीयार्थमेव च।
दास्यामि जानकी प्राण-त्राणकारण! गृह्यताम्॥

वस्त्रोपवस्त्रम्—

ॐ तस्माद्यज्ञातसर्व्वहुतः सम्भृतं पृषदाज्ज्यम्।
पशूँस्ताँश्चक्रे व्वायव्व्यानारण्या ग्ग्राम्याश्च ये॥

यज्ञोपवीतम्–

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं मया दत्तं गृहाण परमेश्वरः॥

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

गन्धम्–

श्री खण्डंचन्दनं दिव्यं गन्धाठ्य सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥

ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
उरू तदस्य यद्वैश्यः पद्भ्यार्ठ० शूद्रो ऽअजायतः॥

अक्षतान्–

अक्षताश्च सुरश्रेष्ठा कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वरः॥

ॐ अक्षन्नमीमदन्त ह्यव प्प्रियऽ ऽअधूषत। अस्तोषत स्वभानवो व्विप्प्रानव्विष्ठया मतीयोजाविन्द्र ते हरी॥

पुष्पाणि–

माल्यादीनि-सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाऽऽहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥

ॐ ओषधीः प्प्रतिमोदध्वं पुष्प्पवतीः प्रसूवरीः।
अश्वाऽइव सङ्ि.त्वरीर्व्वीरुधः पारयिष्णवः॥

अबीरम्—

नानापरिमलै द्रव्यैर्निर्मितं चूर्णमुत्तमम्।
अबीर नामकं चूर्ण गन्धं चारु प्रतिगृह्यताम्॥

सिन्दूरम्—

सिन्दूरं शोभनं रक्तं सौभाग्य सुखवर्द्धनम्।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥

धूपम्—

वनस्पतिरसोद्भूतो गंधाढ्यो गन्ध उत्तमः।
आध्रेयः सर्व देवानां धूपोऽयं प्रतिगृह्यताम्॥
ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यं ग्रीष्म ऽइध्मः शरद्धविः॥

दीपम्—

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश! त्रैलोक्यतिमिरापहम्॥
ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो ऽअजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥

नैवेद्यम्—

नैवेद्यं गृह्यतां देव! भक्तिं मे ह्यचलां कुरु।
ईप्सितं मे वरं देहि परत्र च परां गतिम्॥
शर्कराखण्डखाद्यानि दधि-क्षीर-घृतानि च।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥

ताम्बूलम्–

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्न्वत।
व्वसन्तो ऽस्यासीदाज्ज्यं ग्रीष्म्म ऽइध्मः शरद्धविः॥

दक्षिणाः–

हिरण्यगर्ब्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा व्विधेम।

आरती–

कदलीगर्भसंम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

ॐ आ रात्रि पार्थिवर्ठ० रजः पितुरप्प्रायि धामभिः दिवः सदार्ठ० सि बृहती व्वितिष्ठसऽआत्त्वे षं वर्त्तते तमः॥

ॐ इदर्ठ० हविः प्रजननं मेऽअस्तु दशवीरर्ठ० सर्व्वगणर्ठ० स्वस्तये। आत्मसनि प्प्रजानि पशूसनि लोकसन्न्यभयसनि अग्निः प्प्रजां बहुलां मे करोत्त्वन्नम्पयोरेतोऽअस्मासु धत॥

पुष्पांजलि:—

नाना-सुगन्धि-पुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर!॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्तिदेवाः॥

प्रदक्षिणा:—

पापोऽहं पापकर्माऽहं पापात्मा-पाप संभवः।
त्राहि मां पुण्डरीकाक्ष! त्वमेव शरणं मम॥
यानि कानि च पापनि जन्मान्तर-कृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे॥

प्रणाम—

मनोजवं मारुत-तुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथ-मुख्यं श्रीरामदूतं शरणं प्रपद्ये॥
नमस्तेऽतु महावीर! नमस्ते वायुनन्दन।
विलोक्यं कृपया नित्यं त्राहि मां भक्तवत्सल!॥

हनुमान जी के पूजन की समाप्ति के उपरान्त इस श्लोक का उच्चारण कर पुनः प्रार्थना करें—

हनुमानञ्जनी सूनु वार्युपुत्रो महाबल।
रामेष्ट फाल्गुनी सखः पिगाक्षोऽमितविक्रमः॥
समुद्रोल्लघनं चैव सीता शोकविनाशनः।
लक्ष्मण प्राणदाता च दशग्रीवस्य दर्पहा॥

ध्यान करें—

मनोजवं मारुत-तुल्य वेगं जितेन्द्रियं बुद्धिमंता वरिष्ठम्।
वातात्मजं वानरयूथ-मुख्यं श्रीरामदूतं शरणं प्रपद्ये॥

अथ कुशकण्डिका

अग्नेर्दक्षिणतो ब्रह्मासनम्। अग्नेरुत्तरतः प्रणीतासनद्वयम्। ब्रह्मासने ब्रह्मोपवेशनम्। यावत्कर्म समाप्यते तावत्त्वं ब्रह्मा भव 'भवामि' इति। पठित्वा तत्रोपवेशनम्। 'भवामि' इति ब्रह्मणः प्रत्युक्तिः। ब्रह्मा वाग्यतश्च भवेत्। ततः प्रणीतापात्रं सव्यहस्ते धृत्वा दक्षिणहस्तगृहीतेनोदकपात्रेण तत्र जलं सम्पूर्य पश्चादास्तीर्णकुशैषु दक्षिणहस्तेन निधाय (कुशैराच्छाद्य तत्पात्रमालभ्य ब्रम्हणोमुखमवलोक्य ईक्षणमात्रेण ब्रम्हणाऽनुज्ञातः उत्तरत आस्तीर्णेषु कुशेषु निदध्यात्। ततो द्वादशानां परिस्तरण कुशानां चतुरो भागान् वामहस्ते कृत्वा एकैकभागेन आग्नेयादीशानान्तम्, ब्रह्मणोऽग्निपर्यन्तम्, नैर्ऋत्याद्वायव्यान्तम् अग्नितः प्रणीतापर्यन्तम्। इतरथा वृत्तिः। तत उत्तरतः स्तीर्णकुशेषु द्विशः पात्राणि यथासम्भवं न्युब्जानि उदक्संस्थानि प्राक्संस्थानि वा आसादयेत्। पवित्रे

अग्निदेव के दक्षिण दिशा की तरफ ब्रह्म देव के लिए कुशासन रखे। अग्नि के उत्तर दिशा में 'प्रणीता पात्र' के लिये दो आसन रखे।

ब्रह्मा के ही आसन पर ब्रह्मा को बैठा दे और कहे–हे ब्रह्मन् जब तक कर्म की समाप्ति न हो तब तक आप ब्रह्म के पद पर आसीन हो। ब्रह्मा मैं होता हूँ–यो कह कर पूर्व स्थापित आसन पर बैठे, तदनन्तर ब्रह्मा मौन हो जाये, फिर प्रणीता पात्र को बायें हाथ में धारण कर दाहिने हाथ से ग्रहण किये हुए जलपात्र से उस प्रणीता पात्र में जल को भरकर पहले से बिछी हुई कुशाओं पर दाहिने हाथ से रखकर कुशों द्वारा आच्छादन कर उस पात्र को स्पर्श कर ब्रह्मदेव के मुख को देखकर ईक्षण मात्र से ब्रह्मा की आज्ञा लेकर उत्तर दिशा की तरफ बिछी कुशाओं पर रख दे, तदनन्तर बाहर परिस्तरण कुशाओं के चार भागों को बायें हाथ में रखे उसमें से एक-एक भाग से परिस्तरण अग्निकोण से ईशानादि में ही करें। तदनन्तर–पश्चिम दिशा से उत्तर दिशा की ओर बिछी कुशाओं पर दो–दो पात्रों को यथा सम्भव

छेदनकुशाः। प्रोक्षणीपात्रम्। आज्यस्थाली। चरुस्थाली। संमार्जनकुशाः पञ्च। उपयमनकुशाः सप्त। समिधस्तिस्त्रः। स्रुवः। आज्यम्। तण्डुला। पूर्णापात्रम्। उपल्पनीयानि द्रव्याणि निधाय तत्तद्ग्रहवस्त्राणि। अधिदेवताद्यर्थं श्वेतानि। तत्तद्ग्रहवर्णाः। तत्तद्ग्रह पुष्पाणि। तत्तद्ग्रहधूपाः तत्तदग्रहनैवेद्यानि। फलानि। दक्षिणाः वितानम्। अर्कादिसमिधिः। सयवतिलाः पूर्णाहुत्यर्थं नारिकेल-स्त्रादि। ततः पवित्रकरणम्। आसादितकुशपत्रद्वयं स्थौल्येन समं मध्यशल्यरहितं वामहस्ते कृत्वा अग्रतः प्रादेशमात्रं परिमाय मूले तयोरुपरि कुशत्रयमुदग्ग्रं निधाय तत्कुशत्रय तयोर्मूलभागेन प्रादक्षिण्येन परिवेष्ट्य तयोः प्रादेशपरिमणमग्रभागं वामस्ते कृत्वा अवशिष्टं मूलभ्भागंकुशत्रयं च दक्षिणहस्ते धृत्वा दक्षिणहस्तेन त्रोटयेत् परित्यजेच्च। शिष्टं पत्रद्वयं पवित्रम्। तस्मिन्पत्रद्वयेऽविश्लेषाय ग्रथिं कुर्यात्। ततः प्रागग्रं प्रोक्षणीपात्रं

न्युब्ज-उदक् संस्थ या प्राक्संस्थ आसादन करे। दो पवित्र छेदन करने के लिए कुशा, प्रोक्षणीपात्र, आज्यस्थाली, चरुस्थाली, संमार्जनकुशापाँच, उपयनकुशा सात, तीनसमीधा, स्रुव-घृत-चावल पूर्णपात्र आदि रखें, सूर्यादि ग्रहों के अनेक वर्ण के वस्त्र, अधिदेवता, देवता आदि के लिये सफेद वस्त्र, सूर्यादि ग्रहों के लिए अनेक प्रकार के चन्दन, तत्-तत् वर्ण के ग्रहों की धूप, ग्रहों के नैवेद्य-फल-दक्षिणा वितान सूर्यादि की समिधा यव और तिल, पूर्णाहुत्यर्थ नारिकेल और वस्त्र का आसादन करे। तदन्तर पवित्र बनाये जैसे-स्थापित मध्य (बीच कुशा से रहित) शल्य रहित दो कुशपत्रद्वय को आगे से बराबर नापकर बायें हाथ में कर कुशा के अग्रभाग से प्रादेशमात्र नापकर उसके मूल पर उन दोनों कुशा के ऊपर तीन कुशाओं को उद्ग्र रखकर उन कुशाओं को उस दो कुशा के मूल भाग से प्रादक्षिण्यक्रम से वेष्टन कर उन दो कुशपत्रों को प्रादेशमात्र परिमाण के अग्रभाग को बायें हाथ में कर बचे हुए मूल भाग को और तीन कुशाओं को दाहिने हाथ से तोड़ दें फिर उसका त्याग कर दें, शिष्ट पत्रद्वय ही पवित्र है। उस पत्रद्वय में अविश्लेषण के लिए गाँठ दे। तदनन्तर

प्रणीतासन्निधौ निधाय तत्र सपवित्रेण पात्रान्तरेण हस्तेन वा प्रणीतोदकं त्रिरासिच्य प्रोक्षणीपात्रं सव्ये कृत्वा दक्षिणेन वामहस्तधृतमेव कर्णसमुत्थाय नीचैः कृत्वा प्रणीतोदकेन पवित्रानोतेनोत्तानहस्तेन प्रोक्षणीः प्रोक्षयेत्। ततः प्रोक्षणीजलेन आज्यस्थालीं प्रोक्षणम्। चरुस्थालीं प्रोक्षणम्। समार्जनकुशानां प्रोक्षणम्। उपयमनकुशानां प्रोक्षणम्। समिधां प्रोक्षणम्। स्त्रुवस्य प्रोक्षणम्। आज्यस्य प्रोक्षणम्। पूर्णपात्रस्य प्रोक्षणम्। ततस्ते पवित्रे प्रोक्षणीपात्रे संस्थाप्य प्रोक्षणीपात्रमग्निप्रणतयोर्मध्ये निदध्यात्। ततोऽग्नेः पश्चादाज्यस्थालीं निधाय तत्राज्यं प्रक्षिपेत् एवं चरुस्थाली मग्नेः पश्चिमतो निधाय तत्र सपवित्रायां त्रिः प्रक्षालियान् तण्डुलान् प्रक्षिप्य प्रणीतोदकमासिच्योपयुक्तं जलं तत्र निनीय ब्रम्हदक्षिणत आज्यम् आचार्य उत्तरतश्चरुमदग्धमस्त्रावितमण्डमन्तरूष्मपक्वं सुश्रृतं पचेत्। (केवलाज्ये तु उत्तराश्रितामाज्य स्थाली मग्नावारोपयेत्।)

प्रागग्र प्रोक्षणीपात्र को प्रणीता के समीप रख दे वहाँ से सपवित्र पात्रान्तर हाथ से प्रणीता पात्र से जल को तीन बार आसेचन कर प्रोक्षणी पात्र को बायें हाथ में कर दाहिने से बायें हाथ से धारण किये हुए ही कान की तरफ उठाकर नीचे की तरफ कर प्रणीतापात्र के जल से पवित्र द्वारा ग्रहण किये हुए, उत्तानहाथ से प्रोक्षणीपात्र का प्रोक्षण करें। प्रोक्षणी जल से आज्यस्थाली का प्रोक्षण करे। चरुस्थाली का प्रोक्षण करे। संमार्जन कुशाओं का प्रोक्षण करे। उपयमन कुशाओं का, समिधा का, स्रुवका आज्यका और पूर्णपात्रका प्रोक्षण करे। तदन्तर उन दोनों पवित्रों को प्रोक्षणी पत्र में स्थापन कर उस प्रोक्षणी पात्र को अग्नि और प्रणीतापात्र के मध्य में रख दे। फिंर अग्नि के पीछे आज्यस्थाली रख उसमें आज्य का प्रक्षेप करे। इसीप्रकार अग्नि के पश्चिम में चरुस्थाली रख सपवित्रवाली उसमें तीन बार धोये हुए चावलों को छोड़ प्रणीता पात्र के जल से आसेचन कर उपयुक्त जल को उसमें छोड़कर ब्रह्मा के

ततोऽग्नेर्ज्वलदुल्मुकमादाय ईशानादि प्रदक्षिणमीशान पर्यन्तमग्निमाज्यचर्वोः परितं भ्रामयित्वोल्मुकमग्नौ प्रक्षिप्य अप्रदक्षिणं हस्तमीशानकोणपर्यन्तं पर्यावर्तयेत्। अर्द्धश्रिते चरौ स्रुव गृहीत्वाऽधोबिलं सकृत् प्रतप्य संमार्जनकुशाना-ममग्रैरन्तरतः उपरि मूलादारभ्याग्रेपर्यन्तं प्राञ्चं सम्मृज्य कुश - मूलै - र्बहिरधः प्रदेशे अग्रादारभ्य प्रत्यञ्चं समृज्य संमार्जन कुशा नग्नौ प्रक्षिप्य प्रणीतोदकेन स्रुवमभ्युक्ष्य पुनःस्रुवं प्रत्यप्य दक्षिणस्यांदिशि तंतस्थापयेत् तत् शृंतचरु स्रुवेण गृहीतेनाज्येनाभिघार्य आज्यस्थालीं चरोः पूर्वेणानीयोत्तरत उद्वास्याग्रेः पश्चिमतः स्थापयेत्। ततश्चरुमादाय उत्तरत उद्वास्य आज्यस्य पूर्वेणानीय आज्यस्योत्तरतः स्थापयेत्।ततो दक्षिणहस्तस्याङ्-गुष्ठानामिकाभ्यां पवित्रयोर्मूलं सङ्गृह्यवाम-हस्तस्याङ्गुष्ठा-नामिकाभ्यां पवित्रयोर्मूलं संङ्गृह्यवा-महस्तस्याङ्गुष्ठा नामि काभ्यां तयोरग्रं संङ्गृह्य ऊर्ध्वा ग्रनेनम्रीकृत्य धारयन्ने वाज्ये प्रक्षिप्याज्यस्योत्पवनं

दक्षिण तरफ घी को आचार्य उत्तरदिशा से अदग्ध अश्रावित पक्वचरु को पका दे। तदन्तर अग्निकुंड या स्थण्डिल से जलते हुए, उल्मुक को लेकर ईशान कोण आदि से प्रदक्षिण कर ईशानकोण पर्यन्त अग्नि स्थित आज्य और चरु के चारों तरफ घुमकर उस उल्मुक को अग्नि में छोड़ दे। फिर अप्रदक्षिण क्रम से अपने हाथ को ईशान कोण पर्यन्त घुमा दे। चरु के आधे पक जाने पर स्रुव को हाथ में ग्रहण कर उस स्रुव के बिल को नीचे की तरफ कर एक बार अग्नि में तपाकर समार्जन कुशाओं के अग्रभाग से भीतर की तरफ से मूलभाग से आरम्भ कर अग्रभागपर्यन्त पूर्व की तरफ संमार्जन कर कुश मूलों से बाहर और नीचे के हिस्से में अग्रभाग से आरम्भ कर शुद्ध कर सर्माजन कुशाओं को अग्नि में फेककर प्रणीत जल से स्रुव का अभ्युक्षण तथा स्रुव का प्रतपन कर दक्षिणदिशा की तरफ उस स्रुव को रख दे। तदनन्तर पके हुए चरु में स्रुव के द्वारा घी को छोड़ आज्यस्थाली को चरु के पूर्व से लेकर उत्तरदिशा

कुर्यादुच्छालयेत्। तत आज्यमवेक्ष्य सत्यपद्रव्ये तन्निरस्येत्। ततः पूर्ववत्पवित्रे गृहीत्वाप्रोक्षणीनामपामुत्पवनं कुर्यात्। ततो वामहस्ते उपयमनादाय दक्षिणेन प्रादेशमात्रीः पालाशीस्तिस्त्रःसमिधो घृताक्ता द्व्यङ्गुलादूर्ध्वं मध्यमानामिकांगुष्ठै र्मूलभागे धृतास्तर्जन्यग्रवत्स्थूलास्तन्त्रेणाग्नौतूष्णीं प्रक्षिप्य सपवित्रेण प्रोक्षण्युदकेन चुलुकगृहीतेन ईशानादि प्रदक्षिणमीशान कोणपर्यन्तं पर्युक्ष्य अप्रदक्षिणमीशानकोणपर्यन्तं हस्तं पर्यावर्तयेत्। ततः पवित्रे प्रणीतासु निधाय दक्षिणं जान्वाच्य

की तरफ रख फिर अग्नि के पश्चिम दिशा की तरफ स्थापन करें। फिर चरु को लेकर उत्तर दिशा से उतारे हुए घी के पूर्व से ले आकर घी के उत्तर की तरफ स्थापन करे।

तदनन्तर-दाहिने हाथ के अंगूठे और अनामिका से उस दोनों कुशाओं (पवित्र) के अग्रभाग को पकड़कर ऊपर के अग्रभाग को नम्र बनाकर धारण करते हुए ही आज्य(घी) में प्रक्षेप कर आज्य को उत्पवन करे। फिर घी को देख कर उसमें जो अपद्रव्य हो उसे निकाल दे। तदनन्तर फिर पवित्रों को ग्रहण कर प्रोक्षणी स्थित जल का उत्पवन करे फिर बायें हाँथ में उपयमन कुशा को लेकर दाहिने हाथ में प्रादेश प्रमाण की तीन समिधाओं को घी में भिगोकर दो अंगुल ऊपर मध्यमा अनामिका अँगूठे के मूलभाग में धारण की हुई, तर्जनी की तरह मोटी समिधा को एक साथ चुपचाप अग्नि में प्रक्षेप कर सपवित्र वाली प्रोक्षणी पात्र के जल से चुल्लु द्वारा ग्रहण कर ईशान कोण से प्रक्षेप कर फिर ईशान पर्यन्त प्रदक्षिण क्रम से पर्युक्षण कर अप्रदक्षिण क्रम से ईशान कोण पर्यन्त अपने दाहिने हाथ को केवल घुमा दे। तदनन्तर उन पवित्र को प्रणीता पात्र में रख अपने दाहिने जानु को मोड़कर ब्रह्मा से कुशों द्वार अन्वारब्ध (स्पर्श) कर उपयमन कुशा के सहित अपने हाथ की अँगुलियों को फैलाकर उस हाथ को हृदय में लगा दाहिने हाथ से स्रुव के मूल से चार अंगुल छोड़कर शंखमुद्रा से स्रुव को ग्रहण कर प्रदीप्त अग्नि में वायव्यकोण से प्रारम्भ कर अग्निकोण पर्यन्त या पूर्व दिशा की तरफ निरन्तर घी की धारा द्वारा प्रजापति का मन से ध्यान कर स्रुव से चुपचाप शेष के सहित हवन करे, इसमें स्वाहाकार नहीं है। 'इदं प्रजापतये न मम' इस वाक्य का यजमान त्याग करे। होम त्याग के बाद स्रुव स्थित आज्य का सर्वत प्रोक्षणी पात्र में प्रक्षेप करे।

नात्र स्वाहाकारः। इदं प्रजापतये न मम इति यजमानेन त्यागः कर्त्तव्यः।होमत्यागानन्तरं स्रुवा वशिष्टस्याज्यस्य सर्वत्र प्रोक्षणीपात्रे प्रक्षेपः कार्यः। ततो निर्ऋतिकोणा दारभ्येशानकोणपर्यन्तं प्राञ्चं वा-ॐ इन्द्राय स्वाहा इति जुहुयात्। 'इदमिन्द्राय न मम' इति त्यजेत्। तत उत्तरपूर्वार्द्धे - ॐ अग्नये स्वाहा इदमग्नये न ब्रह्मणा कुशैरन्वारब्धः उपयमनकुशसहितं प्रसारितांगुलिहस्तं हृदि निधाय दक्षिणहस्तेन मूले चतुरङ्गुलं त्यक्त्वा शङ्खसन्निभमुद्रया श्रुवं गृहीत्वा समिद्धतमेऽग्नौवायव्य-कोणादारभ्याग्नि-कोणपर्यन्तं प्राञ्चं वा सन्ततघृतधारया मनसा प्रजापतिं ध्यायन् श्रुवेण तूष्णीं सशेषं मौनी जुहुयात्। मम॥ इति हुत्वा दक्षिणपूर्वाधे-ॐ सोमाय स्वाहा-इदं सोमाय न मम इति जुहुयात् ततो यजमानः द्रव्यत्यागं कुर्यात्। तत्र च बहुकर्तृके होम यथाकालं प्रत्याहुतित्यागस्य कर्तुमशकत्वा-त्सर्वंहवनीयं द्रव्यं देवताश्च मनसा ध्यात्वा त्यजेत्। तच्चैवम् इदमुपकल्पितं समित्तिलादिद्रव्यं (यथासम्पादितम्) या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न ममेति साक्षतजलं भूमौ क्षिपेत्॥ यथा दैवतमस्तु॥

तदनन्तर-निर्ऋतिकोण से आरम्भ कर ईशान कोण पर्यन्त या पूर्व की तरफ 'इन्द्राय स्वाहा' इससे हवन करे। इद्रमिन्द्राय न मम, इससे त्याग करे फिर उत्तर पूर्वार्ध में 'अग्नये स्वाहा' से हवन करें। दक्षिण पूर्वार्ध में 'सोमाय स्वाहा' से हवन करे। तदनन्तर यजमान त्याग करे। क्योंकि बहुकर्तृक हवन में यथा समय प्रति आहुति के बाद प्रोक्षणी पात्र में त्याग करना असम्भव है। अतः सब हवनीय द्रव्य तथा देवताओं को मन से ध्यान कर 'इदमुपकल्पितं समित्तिलादि द्रव्यं या या यक्ष्णमाण देवतास्ताभ्यस्ताभ्यो मयापरित्यक्तं न मम्' इस वाक्य को पढ़कर जल सहित अक्षत भूमि में प्रक्षेप करे 'यथादैवतमस्तु' यह कहें।

[1]बलिस्येति, इस सूक्त के प्रत्येक मंत्र से हवन करें, इस सूक्त की बत्तीस आवृत्ति से तीस, तथा चावल व घृत से हवन करे। उपरान्त [2]य आत्मदा इस मंत्र का उच्चारण कर एक सौ आठ आहुति प्रदान करें।

हनुमान अंजनीसूनु वार्युपुत्रो महाबल।
रामेष्ट फाल्गुनी सखः पिंगाक्षोऽमितविक्रमः॥
समुद्रोल्लंघनं चैव सीता शोक विनाशनः।
लक्ष्मण प्राणदाता च दश ग्रीवस्य दर्पहा॥

उपर्युक्त श्लोक में हनुमानजी के बारह नामों का प्रवेश है। अतः पृथक्-पृथक् नामों का उच्चारण कर आहुति प्रदान करें।

पूर्णाहुतिः

इस संकल्प को करें—**हनुमत् प्रतिष्ठाकर्मणि संपूर्णफल प्राप्त्यर्थं मृडनामाग्नौ पूर्णाहुतिं होष्यामि।**

संकल्प करने के पश्चात् चार अथवा बारह बार घी को यज्ञीयपात्र स्रुव के द्वारा स्रुचि नामक पात्र में ग्रहण कर शिष्टाचार से उस स्रुचि पर सुपारी, पान, पुष्प, रेशमीवस्त्र से वेष्टितकर पुष्पमाला से सुशोभित तथा सुगन्धित द्रव्य, सिन्दूर आदि द्रव्य से सजाकर स्रुचि पर रख आचार्य इस वैदिक मन्त्र से पूजन करावें—

ॐ पूर्णा दर्व्वि परापत सुपूर्णा पुनरापत।
व्वस्नेवव्विक्रीणावहाऽइषमूर्ज्जꣳ शतक्रतो॥

[3]पूर्णाहुति के मंत्रोंका आचार्य सहित सभी ब्राह्मण उच्चारण करें।

---

१. 'बलिस्येतिसूक्त' के लिए यजुर्वेद संहिता देखें।

२. य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा व्विधेम्। (यजुर्वेद सं०)

३. पूर्णाहुति के मंत्रों को पृष्ठ सं० १६६ पर देखें।

अगर मूर्ति की अचल प्रतिष्ठा करनी हो तो मूर्ति के नीचे मणिक्य मोती, मूँगा, प्रवाल इन्द्रनील वैदूर्य (लहसूनिया) ये पंच रत्नादि रखें। 'स्थिरो भव' इस मंत्र का उच्चारण कर मूर्तिकी स्थापना करे।

कृतस्य हनुमत्प्रतिष्ठाहोमकर्मण साङ्गतासिद्धये आवाहित देवानांमुत्तर पूजां करिष्ये॥

संकल्प की समाप्ति के पश्चात् विधिवत् गणपत्यादि देवताओं की पूजा करें। उसके पश्चात् आचार्यदि की दक्षिणा के लिए यजमान यह संकल्प करें-

कृतस्य 'हनुमत्प्रतिष्ठा' कर्मणिः सांगता सिद्धये तत्संपूर्णफल प्राप्त्यर्थं च आचार्यादिभ्यो, ब्राह्मणेभ्यो, सूक्तपाठकेभ्यो, हवनकर्तृभ्योः, अन्येभ्यो देवयजन-यागतेभ्य दक्षिणां दातुमहमुत्सृज्ये।

इसके पश्चात् [1]अभिषेक कर्म को आचार्य करावे, उसके पश्चात् अभिषेक कर्म की फल प्राप्ति के लिए यह संकल्प करें-

कृतस्याभिषेक कर्मणः साङ्गफल प्राप्तये अभिषेक कर्तृभ्यो ब्राह्मणेभ्यो दक्षिणां विभज्य ददे॥

यजमान ब्राह्मण भोजन के निमित्त इस संकल्प को करें-

कृतस्य हनुमत्प्रतिष्ठा कर्मणः साङ्गतासिद्ध्यर्थं ब्राह्मणान् भोजयिष्यामि।

ब्राह्मणभोजन के उपरान्त विधिवत् हनुमानजी की स्तुति कर कर्मार्पण करें, यजमान परिवार, सम्बन्धि, मित्रगण हनुमानजी के प्रसाद को ग्रहण करें।

१-अभिषेक के लिए इस पुस्तक की पृष्ठ सं० १८६ देखें।

द्वितीय अंश

यज्ञ-प्रकरणम्

लक्ष्मी-याग

सर्वप्रायश्चित्त के दिन या उसके अगले दिन ब्रह्मचर्य, भूशय्या आदि नियमों से युक्त होकर नित्यक्रिया करके सपत्नीक यजमान उपवास एवं मंगलस्नानकरके तिलकादि से अलंकृत होकर शिखा बन्धन करे और प्रशस्त कुशासन बिछाकर उसके नीचे 'ह्रीम्' बीज लिखे और पूरब या उत्तर की ओर मुँख करके बैठे तथा हाथ धोकर इस श्लोक द्वारा रक्षादीप प्रज्वलित करें-

शुभं करोतु कल्याणमारोग्यं धनसम्पदाम्।
शत्रुबुद्धिविनाशाय दीपज्योतिर्नमोऽस्तु ते॥

रक्षादीप मंत्र का उच्चारण कर पवित्री धारण कर दो बार आचमन करें तथा लक्ष्मीगायत्री से पूजन की सामग्रीका और अपना प्रोक्षण भी करें।

करिष्यामि व्रतं देवि त्वद्भक्तस्त्वत्परायणः।
तदविघ्नेन मे यातु समाप्तिं त्वत्प्रसादतः॥

तत्पश्चात् यजमान के हाथ में रक्तचावल और पुष्प देकर आचार्य सहित सभी ब्राह्मण [1]शान्ति पाठ करें।

शान्तिपाठ के पश्चात् आचार्य जल, अक्षत, पुष्प व द्रव्य यजमान के दाएँ हाथ में देकर यह संकल्प करावें-

ततो देशकालौ सङ्कीर्त्य-मम गृहे सर्वसङ्कटना-नाविधरोगादिसर्वोपद्रवशान्तिपूर्वक धनधान्यरजतता म्रहिरण्यमुक्तामणिप्रवाल-ऊर्णादिबहुमूल्योपकल्पित-वस्त्राभरणाद्विपदचतुष्पदपुत्रपौत्राद्यभिवृद्धिपूर्वक-विपुलमहालक्ष्मीप्राप्तिद्वारा-अलक्ष्मीपरिहारपूर्वक

---

१. शान्तिपाठ के लिए इस पुस्तक की पृष्ठ संख्या ७५ देखें।

सकलमनोरथसिध्यर्थम्, समस्तपापक्षयार्थम्, ईश्वरच-रणारविन्दयोरचञ्चलभिक्तिलाभसिध्यर्थम्, श्रीव्यास-निर्मिताष्टादशपुराणोपपुराणेषु मन्वादिस्मृतिषु तन्त्रेषु च कथितसमस्तलक्ष्मीपूजनजन्यफलप्राप्त्यथर्मम्, आचन्द्रा-र्कस्ववंशाख्यातकीर्तिसिध्यर्थम्, अस्मद्विरोधिनां दुष्टानां मनोवाक्कायस्तम्भनार्थम्, राजद्वारेषु सर्वानुकूलता-सिध्यर्थम्, सनातनधर्मप्रतिपादकानां वेदप्रभृतीनां पुराणान्तानां धार्मिकग्रन्थानां सर्वाषां विद्यानां च आचन्द्रार्कमभिवृध्यर्थम्, राजद्वारादिष्वप्रतिहतप्रवेश-पूर्वकसत्प्रतिष्ठाप्राप्त्यर्थम्, एकविंशति कुलोद्धरण-पूर्वकसमस्तपितृणां निरतशयानन्दसाश्वतब्रह्मलोक-निवाससिध्यर्थम्, सालोक्यसामीप्यसान्निध्यसायुज्या-दिमोक्षफलावाप्त्यर्थम्, भारतवर्षवास्तव्यानां नानादिग्देशादागतानां महर्षिकल्पानां विदुषां महात्मनां चाज्ञया उपचीयमानाधर्मनिवृत्तिपुरस्सरं धर्माभि-वृद्ध्यर्थम्, समेषां प्राणिनां सदभावनोत्पादनार्थम्, विश्वकल्याणार्थं च निरन्तराविच्छिन्नलक्ष्मीस्थिरता-सिद्ध्यर्थं च षष्टिसहस्त्रा-धिकैकलक्षसङ्ख्यहोमात्मकं सग्रहमखं लक्ष्मीयागं, विंशत्यधिकलक्षत्रय-संख्याकहोमात्मकं सग्रहमखमति लक्ष्मीयागं करिष्ये। एवं सहस्त्रसंख्याकहोमात्मकम्, अयुतहोमात्मकम्, लक्षहोमात्मकम्, प्रयुतहोमात्मकम् कोटिहोमात्मकम्, शतसंख्याकहोमात्मकम्, दशसंख्याकहो-मात्मकम्, यथाशक्ति परिमितसंख्याकहोमात्मकं सग्रहमखं

लक्ष्मीयागं करिष्ये। तदङ्गत्वेन स्वस्तिपुण्याहवाचनम्, षोडशमातृकापूजनम्, वसोर्द्धारापूजनम्, नान्दीश्राद्धम्, आयुष्य-मंत्र जपम्, आचार्यादिवरणानि च करिष्ये। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं करिष्ये।

ऐसा संकल्प करके शेष कर्म ग्रहशान्ति पद्धति के अनुसार करें।

पश्चात् आचार्य मण्डपप्रवेश, वास्तु पूजन, मण्डप पूजन, कुण्डपूजा, पंचभूसंस्कार पूर्वक अग्निस्थापन, ग्रहस्थापन, असख्यात् रुद्रस्थापन, योगिनीपूजा, क्षेत्रपाल पूजा ग्रहशान्ति के द्वारा करें।

सर्वतोभद्रमण्डल के समीप आकर कम्बलादि आसन पर बैठकर स्थापन विधि से सुपारी आदि पर ब्रह्मादि देवताओं का स्थापन कर वेदी के मध्य में सुवर्णादि कलश स्थापित कर उसके ऊपर चाँदी के पात्र में सुवर्ण छत्र चामरादि युक्त सिंहासन स्थापित करके सोना-चाँदी-ताँबा या रेशमी वस्त्र पर लक्ष्मी यन्त्र इस क्रम से लिखे।

लक्ष्मी यन्त्र निर्माण प्रकार-महालक्ष्मी के अष्टगन्ध से या चन्दन से सोने की शलाका से बीच में एक बिन्दू रख कर, षट्कोण बनावे, उसके बाहर अष्टदल बनावे, उसके बाहर चतुरस्त्र बनावे, उसके चारों ओर तीन रेखायें दिशाओं में युक्त यंत्र बनावे।

इसप्रकार यंत्र लिखकर अपने सामने पीठ इत्यादि पर स्वर्णमयी महालक्ष्मी की प्रतिमा स्थापित कर उसमें स्वर्णमय चार द्वारों वाला मंडप बनाकर यजमान के हाथ में अक्षत-पुष्प देकर ध्यान करावें।

ॐ अमृतम्भोनिधये नमः १ ॐ रत्नद्वीपाय नमः २ ॐ नानावृक्षमहोद्यानाय नमः ३ ॐ कल्पवाटिकायै नमः ४ ॐ सन्तानवाटिकायै नमः ५ ॐ हदिश्चन्दनवाटिकायै नमः ६ ॐ मन्दारवाटिकायै नमः ७ ॐ पारिजातवाटिकायै नमः

८ ॐ कदम्बवाटिकायै नमः ९ ॐ पुष्परागरत्नप्राकाराय नमः १० ॐ पद्मरागरत्नप्राकाराय नमः ११ ॐ गमेधकरत्नप्राकाराय नमः १२ ॐ वज्ररत्नप्राकाराय नमः १३ ॐ वैडूर्यरत्नप्राकाराय नमः १४ ॐ इन्द्रनीलरत्नप्राकाराय नमः १५ ॐ मुक्तारत्नप्राकाराय नमः १६ ॐ मरकतरत्नप्राकाराय नमः १७ ॐ विद्रूमरत्नप्राकाराय नमः १८ ॐ माणिक्यमण्डपाय नमः १९ ॐ सहस्त्रस्तंभमण्डपाय नमः २० ॐ अमृतवापिकायै नमः २१ ॐ आनन्दवापिकायै नमः २२ ॐ विमर्शवापिकायै नमः २३ ॐ बालातपोद्नाराय नमः २४ ॐ चन्द्रिकोद्गाराय नमः २५ ॐ महाशृङ्गारपरिधायै नमः २६ ॐ महापद्माटव्यै नमः २७ ॐ चिन्तामणिमयगृहराजाय नमः २८ ॐ पूर्वाम्नायमयपूर्वद्वाराय नमः २९ ॐ दक्षिणम्नायमयदक्षिणद्वाराय नमः ३० ॐ पश्चिमाम्नामयपश्चिम-द्वाराय नमः ३१ ॐ उत्तराम्नाय-मयोत्तरद्वाराय नमः ३२ ॐ रत्नप्रदीप्रवलयाय नमः ३३ ॐ मणिमयसिंहासनाय नमः ३४ ॐ ब्रह्ममयैकमञ्चपादाय नमः ३५ ॐ विष्णुमयैकमञ्चापादाय नमः ३६ ॐ रुद्रमयैकमञ्चपादा नमः ३७ ॐ ईश्वरमयैकमञ्चपादाय नमः ३८ ॐ सदाशिवमयैक-मञ्चफलकाय नमः ३९ ॐ हंसतूलिकातल्पाय नमः ४० ॐ हंसतूलिकमहोपधाय नमः ४१ ॐ कौसुम्भास्तरणाय नमः ४२ ॐ महावितानकाय नमः ४३ ॐ महामायायवनिकायै नमः ४४ तत्र नानारत्नखचितं मुक्ताद्यखड्कृतं सिंहासनं स्मरेत्।

ततः पूर्वद्वारे–ॐ गं गणपतये नमः। ॐ क्षं-क्षेत्रपालाय नमः। दक्षिणद्वारे–ॐ श्री लक्ष्म्यै नमः। ॐ ऐं सरस्वतयै नमः। पश्चिमद्वारे–ॐ वं वटुकाय नमः ओं यं यमुनायै नमः

उत्तरद्वारे–ओं अस्त्राय फट्-इति पूर्वादिदिक्षु द्वारेषु देवान् आवाह्य गन्धाक्षतपुष्पैः पूजयेत्। अशक्तौ तु-ओं द्वारदेवताभ्यो नमः।

इस प्रकार से पूजा करनी चाहिये। हाथ में जल लेकर नीचे लिखे मन्त्रों से विनियोग करें।

'ॐ श्रीम्' इस बीज मंत्र द्वारा व शुद्ध तीर्थ जल से तीन बार कर शुद्धि करें।

अथ विनियोगः–

हिरण्यवर्णामिति पञ्चदशर्चस्य सूक्तस्य, श्रीआनन्दकर्दमचिल्कीदेन्दिरा सुता महर्षयः, श्रीर्देवता आद्यास्त्रिस्त्रोनुष्टुभः, पञ्चमीषष्ठ्यौ त्रिष्टुभौ ततोऽष्टानुष्टुभः, द्वादशी निचृदनुष्टुप् त्रयोदशी-चतुर्दश्यावनुष्टुभौ, अन्त्या आस्तारपंक्तिः, न्यासे विनियोगः।

विनियोग के पश्चात् नीचे लिखे मन्त्रों से ऋष्यादिक न्यास करें।

ॐ आनन्दकर्दमचिक्लीतेन्दिरा सुत ऋषिभ्यो नमः-शिरसि
ॐ अनुबादिछन्दोभ्यो नमः-मुखे। ॐ श्रीर्देवतायै नमः-हृदये।
ॐ हिरण्यवर्णामिति बीजाय-गुह्ये।
ॐ कां सोस्मितामिति शक्तये नमः-पादयोः।
ॐ बिन्दुः कीलकाय नमः-नाभौ।
ॐ ममाभीष्टलक्ष्मीप्राप्त्यर्थे न्यासे विनियोगाय नमः-सर्वाङ्गे।

ऋष्यादिक न्यास के पश्चात् नीचे लिखे मन्त्रों से षडङ्गकरन्यास करें-

ॐ हिरण्यवर्णाम्-अङ्गुष्ठयोः। ॐ हरिणीम्-तर्जन्योः। ॐ सुवर्णरजतस्त्रजाम्-मध्यमयोः। ॐ चन्द्रांहिरण्मयीम्-अनामिकयोः। ॐ लक्ष्मीम्-कनिष्ठिकयोः। ॐ जातवेदो म आवह-करतलकरपृष्ठयोः।

षडङ्गकरन्यास के पश्चात् नीचे लिखे मन्त्रों से हृदयादिषडङ्ग न्यास करें।

ॐ हिरण्यवर्णाम्-हृदयाय नमः। ॐ हरिणीम्-शिरसे स्वाहा। ॐ सुवर्णरजतस्त्रजाम्-शिखायै वषट्। ॐ चन्द्रां हिरणमयीम्-कवचाय हुम्। ॐ लक्ष्मीम्-नेत्रत्रयाय वौषट्। ॐ जातवेदो म आवह-अस्त्राय फट्। ॐ हिरण्यवर्णायै नमः-अङ्गुष्ठाभ्यां नमः। ॐ सुवर्णायै नमः-तर्जनीभ्यां नमः। ॐ रजतस्त्रजायै नमः-मध्यमाभ्यां नमः। ॐ चन्द्रायै नमः-अनामिकाभ्यां नमः। ॐ हिरणमय्यै नमः-कनिष्ठिभ्यां नमः। ॐ लक्ष्म्यै नमः-करतलकरपृष्ठाभ्यां नमः। ॐ हिरण मय्यै नमः-हृदयाय नमः। ॐ चन्द्रायै नमः-शिरसे स्वाहा। ॐ रजतस्त्रजायै नमः-शिखायै वषट्। ॐ हिरण्यस्त्रजायै नमः-कवचाय हुम्। ॐ हिरण्याक्षायै नमः-नेत्रत्रयाय वौषट्। ॐ हिरण्यवर्णायै नमः-अस्त्राय फट्।

ॐ श्रियै नमः-शिरसि। ॐ लक्ष्म्यै नमः-नेत्रयोः। ॐ वरदायै नमः-कर्णयोः। ॐ विष्णुपत्न्यै नमः। नासिकयोः। ॐ वसुदायै नमः-मुखे। ॐ हिरण्यवर्णायै नमः-गण्डयोः। ॐ

स्वर्ण-मालिन्यै नमः-कण्ठे। ॐ स्त्रजायै नमः-ओष्ठयोः। ॐ सुवर्णगृहायै नमः-दक्षिणबाहौ। ॐ स्वर्ण प्राकाराय नमः-बामबाहौ। ॐ पद्मवासिन्यै नमः-स्तनयोः। ॐ पद्महस्तायै नमः-दक्षिणहस्ते। ॐ पद्मप्रियायै नमः-वामहस्ते। ॐ मुक्तालङ्कारायै नमः-हृदये। ॐ सूर्यायै नमः-उदरे। ॐ चन्द्रायै नमः-नाभौ। ॐ बिल्वप्रियायै नमः-दक्षिणकरे। ॐ ईश्वर्यै नमः-वामकरे। ॐ भुक्त्यै मुक्त्यै नमः-कुक्षिद्धये। ॐ विभूत्यै वृद्ध्यै नमः-कटिद्वये। ॐ समृध्यै नमः-गुह्ये। ॐ तुष्ट्यै पुष्ट्यै नमः-उरुद्वये। ॐ गङ्गायै धनेश्वर्यै नमः-जानुद्वये। ॐ शुद्धायं भोगिन्यै नमः-गुल्फद्वये। ॐ भोगदायै धात्र्यै नमः-पादद्वये। ॐ विधात्र्यै नमः-सर्वाङ्गे। उपरिभागे-ॐ साम्राज्यलक्ष्म्यै नमः। पुरतः-ॐ सागरजायै नमः। पृष्ठे-ओं कमलायै नमः। दक्षिणभागे-ओं द्विजराजसहोदर्यै नमः। वामभागे-ओं जयप्रदायै नमः। पाताले-ओं विजयप्रदायै नमः। मध्ये-ओं सर्वसौभाग्यदायै नमः। 'ओं भूर्भुवः स्वरोम्' इति दिग्बन्धनम्।

ॐ श्राम-हृदयाय नमः। ॐ श्रीम्-शिरसे स्वाहा।
ॐ श्रूम-शिखायै वषट्। ॐ श्रैम्-कवचाय हुम्।
ॐ श्रौम-नेत्रत्रयाय वौषट्। ॐ श्रः अस्त्राय फट्।
ॐ ह्राम्-अङ्गुष्ठाभ्यां नमः। ॐ ह्रीम्-तर्जनीभ्यां नमः।
ॐ ह्रुम्-मध्यमाभ्यां नमः। ॐ ह्रैम्-अनामिकाभ्यां नमः।
ॐ ह्रौम्-कनिष्ठिकाभ्यां नमः। ॐ ह्रः-करतलकरपृष्ठाभ्यां नमः।

न्यास का क्रम पूजा समुच्चय के मत से–

(१) ॐ हिरण्यवर्णाम् भगवत्यै महालक्ष्म्यै नमः शिरसि
(२) ॐ तां म ऽ आवह ,, ,, नेत्रयोः
(३) ॐ अश्वपूर्वाम् ,, ,, कर्णयोः
(४) ॐ कांसोस्मिताम् ,, ,, नासिकयोः
(५) ॐ चन्द्रां प्रभासाम् ,, ,, मुखे
(६) ॐ आदित्यवर्णे ,, ,, कण्ठे
(७) ॐ उपैतु माम् ,, ,, बाह्वोः
(८) ॐ क्षुत्पिपासामलाम् ,, ,, हृदये
(९) ॐ गन्धद्वाराम् ,, ,, नाभौ
(१०) ॐ मनसः कामम् ,, ,, गुह्ये
(११) ॐ कर्दमेन प्रजा ,, ,, पादयोः
(१२) ॐ आपः सृजन्तु ,, ,, ऊर्वोः
(१३) ॐ आर्द्रा पुष्करणीम्,, ,, जान्वोः
(१४) ॐ आर्द्रा यष्करणीम्,, ,, जङ्घयोः
(१५) ॐ तां म अवह ,, ,, पादयोः

(१) ॐ कर्दमेन प्रजा भगवत्यै महालक्ष्म्यै नमः हृदयाय नमः।
(२) ॐ आपः सृजन्तु ,, ,, शिरसे स्वाहा
(३) ॐ आर्द्रां पुष्करणीम्,, ,, शिखायै वषट्
(४) ॐ आर्द्रां यष्करणीम् ,, ,, कवचाय हुम्
(५) ॐ तां म आवह ,, ,, नेत्रत्रयाय वौषट्
(६) ॐ यः शुचिः प्रयतो ,, ,, अस्त्राय फट्

तत्पश्चात् कुशों के द्वारा श्रीसूक्त के मन्त्रों से मार्जन करना चाहिए, इस प्रकार समग्रपूर्ण श्रीसूक्त को पढ़कर, पापों का प्रायश्चित करके उस जल को अपने बायीं ओर से डालकर तथा उठकर ऊपर हाथ उठाकर श्रीसूक्त के मंत्र से उपस्थान करना चाहिए, इसके पश्चात् इस श्लोक के द्वारा अपने हृदय में महालक्ष्मी का पूजन करना चाहिए-

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी।
गम्भीरावर्तनाभिस्तनभरनमिताशुभ्रवस्त्रोत्तरीया॥
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्ममणिगणखचितैः स्नापिताहेमकुंभै।
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता॥

अथ पाद्यादिपात्रस्थापनपूजनम्

पूर्व नवकोष्ठात्मिकां भूमिं संपाद पूर्वादितो मध्ये च पाद्यादिपात्राणामुत्तरक्रमेण संस्थाप्य एवं पञ्चपञ्चामृतपात्राणां स्थापनं कृत्वा विदिक्षु सुगन्धित द्रव्याणि निधाय स्थापनक्रमेण नवसु पात्रेषु सद्रव्येषु नव देवताः पूजयेत्-

ॐ विद्यायै नमः। ॐ अविद्यायै नमः। ॐ प्रकृत्यै नमः। ॐ मायायै नमः। ॐ तेजस्विन्यै नमः। ॐ प्रबोधिन्यै नमः। ॐ सत्याय नमः। ॐ रजसे नमः। ॐ तमसे नमः। इति संपूज्य गायत्र्याऽभिमृशेत्।

अथ पूजाकलशार्चनम्

अपने वाम भाग में पूजा कलश स्थापित कर "इमं मे वरुणेति" इस मंत्र से वरुणदेव का पूजन कर गायत्री से दस बार मंत्र को अभिमन्त्रित करें।

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वती।
नर्मदे सिन्धुकावेरि जलेऽस्मिन्सन्निधिं कुरु॥
सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥

इसके पश्चात् 'ॐ कलशस्य मुखे वि०' इति विष्णवादीनामावाहयेत्। ॐ विष्णवे नमः। ॐ रुद्राय नमः। ॐ ब्रह्मणे नमः। ॐ मातृगणेभ्यो नमः। ॐ सागरेभ्यो नमः। ॐ सप्तद्वीप-वसुन्धरायै नमः। ॐ ऋग्वेदाय नमः। यजुर्वेदाय नमः। सामवेदाय नमः। ॐ अथर्ववेदाय नमः। ॐ वेदाङ्गेभ्यो नमः। ॐ गायत्र्यै नमः। ॐ सावित्र्यै नमः। ॐ शान्त्यै नमः। ॐ सरस्वत्यै नमः।

इनका आवाहन कर पूजा करें।

अथ पीठपूजा

उपर्युक्त कर्म की समाप्ति के पश्चात् आचार्य पीठपूजा निम्न क्रमानुसार यजमान से करावें—

ॐ मण्डूकाय नमः। ॐ कालाग्निरुद्राय नमः। ॐ मूलप्रकृत्यै नमः। ॐ आधारशक्त्यै नमः। ॐ कूर्माय नमः। ॐ अनन्ताय नमः। ॐ वाराहाय नमः। ॐ पृथिव्यै नमः। ॐ सुधासमुद्राय नमः। ॐ श्वेतद्वीपाय नमः। ॐ स्वर्णपर्वताय नमः। ॐ करुणातोयपरिखायै नमः। ॐ स्वर्णमण्डपाय नमः। पूर्वद्वारे—ॐ द्वारश्रियै नमः। ॐ इन्द्राय नमः। ॐ ब्रह्मणे नमः। ॐ सत्वाय नमः। ॐ ऋग्वेदाय नमः। ॐ आत्मने नमः। ॐ कालतत्वाय नमः। ॐ अम्बिकायै नमः। ॐ इन्द्राण्यै नमः।

ॐ वेदमात्रे नमः। ॐ शैलपुत्र्यै नमः। ॐ ब्रह्मचारिण्यै नमः। ॐ चण्द्रघण्टायै नमः। ॐ स्कन्दमात्रे नमः। ॐ कात्यायन्यै नमः। ॐ गौर्यै नमः।

दक्षिणद्वारे—ॐ द्वारश्रियै नमः। ॐ यमाय नमः। ॐ शान्त्यै नमः। ॐ सिद्धायै नमः। ॐ क्षमायै नमः। ॐ विष्णवे नमः। ॐ यजुर्वेदाय नमः। ॐ रजसे नमः। ॐ विद्यातत्वाय नमः। ॐ जगन्मात्रे नमः। ॐ मायायै नमः। ॐ शिवायै नमः। ॐ शान्त्यै नमः। ॐ प्रभायै नः। ॐ ह्रीं कारायै नमः। ॐ क्लीं कारायै नमः। ॐ मायाशक्त्यै नमः। ॐ वीरायै नमः। ॐ अन्तरात्मने नमः। ॐ दण्डधराय नमः।

पश्चिमद्वारे—ॐ द्वारश्रियै नमः। ॐ वरुणाय नमः। ॐ रुद्राय नमः। ॐ सामवेदाय नमः। ॐ तमसे नमः। ॐ आदित्याय नमः। ॐ वारुण्यै नमः। ॐ शंखायुधायै नमः। ॐ हंसवाहिन्यै नमः। ॐ जगज्जीवायै नमः। ॐ जगद्बीजायै नमः। ॐ षोडशकलायै नमः। ॐ पूर्णकलशाय नमः। ॐ चित्रिण्यै नमः। ॐ चित्रभालायै नमः। ॐ चित्रायै नमः। ॐ चामुण्डायै नमः।

उत्तरद्वारे—ॐ द्वारश्रियै नमः। ॐ कपालधारिण्यै नमः। ॐ भक्तवत्सज्योत्स्नायै नमः। ॐ कल्याण्यै नमः। ॐ शर्वाण्यै नमः। ॐ चन्द्रकलायै नमः। ॐ चन्द्रवदनायै नमः। ॐ विभूत्यै नमः। ॐ परमविभूत्यै नमः। ॐ भस्मधारिण्यै नमः। ॐ पावनायै नमः। ॐ गङ्गायै नमः। ॐ भागीरथ्यै नमः। ॐ गोदावर्यै नमः। ॐ प्रवरायै नमः। ॐ प्रणतायै नमः। ॐ क्रां कारायै नमः। ॐ

क्रीं कारायै नमः। ॐ क्रौं कारायै नमः। ॐ सर्वबीजात्मने नमः। ॐ बीजप्रवाहिन्यै नमः।

मध्ये—ॐ रत्नवेदिकायै नमः। ॐ रत्नसिंहासनाय नमः। ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ अनैश्वर्याय नमः। ॐ श्वेतच्छत्राय नमः। ॐ विच्छित्यै नमः ॐ मायाशक्त्यै नमः। ॐ आनन्दकन्दाय नमः। ॐ संविन्नालाय नमः। ॐ प्रकृतिमयपत्रेभ्यो नमः ॐ पञ्चाशद्वर्णबीजाढ्यसर्वेभ्यो नमः। ॐ तत्वरूपायै कर्णिकायै नमः। अं अर्कमण्डलाय नमः। ॐ मं वह्निमण्डलाय नमः। ॐ सं सोममण्डलाय नमः। ॐ सं सत्वाय नमः। ॐ रं राजसे नमः। ॐ तं तमसे नमः। ॐ आं आत्मने नमः। ॐ अं अन्तरात्मने नमः। ॐ पं परमात्मने नमः। ॐ ह्रीं ज्ञानात्मने नमः। ॐ आत्मतत्वाय नमः। ॐ मायातत्वाय नमः। ॐ विद्यातत्वाय नमः। ॐ कालतत्वाय नमः। ॐ परतत्वाय नमः।

केसरेषु पूर्वादिक्रमेण—

ॐ विभूत्यै नमः। ॐ उन्नत्यै नमः। ॐ कान्त्यै नमः।

ॐ हृष्टयै नमः। ॐ कीर्त्यै नमः। ॐ सन्नत्यै नमः। ॐ व्युष्ट्यै नमः। ॐ उत्कृष्ट्यै नमः। ॐ मत्यै नमः। ॐ ऋध्यै नमः।

ततः—ॐ श्रीं सर्वशक्तिकमलासनाय नमः। ॐ महालक्ष्मीयोगपीठाय नमः।

इसप्रकार समस्त पीठों की पूजा करके कर्णिका में पुष्पांजलि प्रदान करे।

अथाग्न्युत्तारणम्

देवी की प्रतिमा को सुवर्ण के पात्र में रखकर मधु और घृत से धोकर 'ॐ अश्मन्नूर्जम्' इस वाक्य का उच्चारण कर श्री सूक्त से तथा दूध मिश्रित जल से या केवल दूध से अभिषेक करके प्रतिमा को बाहर निकाल कर, स्वच्छ एवं नवीन वस्त्र से पोछ करके उसे यंत्र के ऊपर स्थापित करके प्राण प्रतिष्ठा करनी चाहिए।

प्राणप्रतिष्ठा

लक्ष्मी प्राण प्रतिष्ठा मंत्र के ब्रह्मा-विष्णु-महेश्वर ऋषि हैं। ऋग्यजु, साम छन्द हैं, प्राण शक्ति देवता हैं, आं 'बीज' हैं, 'ह्रीं' शक्ति हैं, 'क्रों' कीलक हैं।

इस प्रकार महालक्ष्मी देवी को प्रसन्न करने के लिए उनके प्रतिष्ठापत्र का यह विनियोग कर्ता को करना चाहिए।

ॐ ब्रह्मविष्णुमहेश्वरेभ्यो ऋषिभ्यो नमः शिरसि।

ॐ ऋग्यजुःसामछन्दोभ्यो नमो मुखे। ॐ प्राणशक्तिदेवतायै नमः-हृदये। ॐ आं बीजाय नमः-गुह्ये। ॐ ह्रीं शक्तये नमः-पादयोः। ॐ क्रों कीलकाय नमः-नाभौ। ॐ प्राणप्रतिष्ठापते विनियोगः-सर्वाङ्गे।

ॐ ह्राम्-अङ्गुष्ठाभ्यां नमः। ॐ ह्रीम्-तर्जनीभ्यां नमः। ॐ ह्रं मध्यमाभ्यां नमः। ॐ ह्रैम्-अनामिकाभ्यां नमः। ॐ ह्रीं-कनिष्ठिकाभ्यां नमः। ॐ ह्रः-करतलकरपृष्ठाभ्यां नमः।

ॐ ह्रां हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ ह्रं शिखायै वषट्। ॐ ह्रैं कवचाय हुम्। ॐ ह्रौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्।

उपरोक्त कर्म के पश्चात् यजमान से लक्ष्मी देवी का ध्यान इस श्लोक का उच्चारण करके आचार्य करावें-

ध्यायेल्लक्ष्मीं प्रहसितमुखीं राज्यसिंहासनस्थां।
मुद्राशक्तिं सकलविनुतां सर्वसंसेव्यमानाम्॥
अग्नौ पूज्यामखिलजननीं हेमवर्णां हिरण्याम्।
भाग्योपेतां भुवनसुखदां भार्गवीं भूतिधात्रीम्॥

इस प्रकार ध्यान करवाके प्रतिमा के ऊपर आचार्य अपने हस्त (हाथ) को रखकर प्राणप्रतिष्ठा बीज को पढ़ें-

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सः श्रीमहालक्ष्मीदेव्याः प्राणा इह प्राणाः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सः जीव इह स्थितः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सः सर्वेन्द्रियाणि वाङ्मनः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणपादपायूपस्था इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

ॐ अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणा क्षरन्तु च।
अस्यै दवत्वमर्चायै मामहे तीति कश्च न॥

इसके बाद आचार्य यजमान से प्रणव मंत्र का सोलह बार जप करवाना चाहिये। बाद में एकाग्रचित्त होकर यजमान दाहिने हाथ में सुन्दर पुष्पमाला लेकर खड़े होकर इन श्लोकों द्वारा प्रार्थना करें-

समस्तसंपत्सुखदां महाश्रियं समस्तसौभाग्यकरीं महाश्रियम्।
समस्तकल्याणकरीं महाश्रियं भजाम्यहं ज्ञानकरीं महाश्रियम्॥ १॥
समस्तभूतान्तरसंस्थिता त्वं समस्तभूतेश्वरि विश्वरूपे।
तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु त्वपादपद्मं प्रणमाम्यहं श्रीः॥ २॥
दारिद्र्यदुःखौघतमोपहन्त्री त्वत्पादपद्मं मयि सन्निधत्स्व।
दीनार्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिञ्च मां श्रीः॥ ३॥

अम्ब प्रसीद करुणासुधयार्द्रदृष्ट्या मां त्वत्कृ-पाद्रविणगेहिमिमं कुरुष्व।
आलोकनप्रणयिहृद्गत शोकहन्त्रीत्वत्पादपद्मयुगलं प्रणयाम्यहं श्रीः ॥ ४ ॥
शान्त्यै नमोऽस्तु शरणागतरक्षणायै कान्त्यै नमोऽस्तु कमनीयगुणाश्रयायै।
शान्त्यै नमोऽस्तु दुरितक्षयकारणायै धात्र्यै नमोऽस्तु धनधान्यसमृद्धिदायै ॥ ५॥
विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यसिद्धिं कुरु मे करे श्रीः।
दयासुपुष्टिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे करे श्रीः ॥ ६ ॥
न मां त्यजेथाः श्रितकल्पवल्लिसद्भक्तिचिन्तामणि कामधेनो।
विश्वस्य मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे ॥ ७ ॥
माता-पिता त्वं गुरुसद्गतिः श्रीस्त्वमेवसञ्जीव-नहेतुभूता।
अन्यं न मन्ये जगदेकनाथे त्वमेव सर्वंमम देवि सत्यम् ॥ ८ ॥
अशेषवाग्जाड्यमलापहारिणीं नवं-नवं स्पष्टसुवा-क्प्रदायिनि।
ममैहि जिह्वाग्रसुरङ्गनर्तकी भव प्रसन्ना वदने च मे श्रीः ॥ ९ ॥
वागर्थसिद्धिं बहुलोकवश्यं वयः स्थिरत्वं ललनासुभोगम्।
पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्मजन्मानि ॥ १० ॥
समस्तविघ्नौघविनाशकारिणी समस्तविघ्नोद्धरणे विचक्षण।
अनन्तसौभाग्यसुखप्रदायिनी हिरणमये मे वदने प्रसन्ना ॥ ११ ॥

इसके पश्चात् आचार्य संग्रहित उपचारों से लक्ष्मीजी का विधिवत् पूजन यजमान से करावें। उपरान्त यथा संख्या श्रीसूक्त का पाठ आचार्य सहित सभी ब्राह्मण करें।

संकल्पः

उपर्युक्त कर्म की समाप्ति के पश्चात् निम्न संकल्प यजमान करें-

देशकालौ सङ्कीर्त्य-मम धन-पुत्र-पौत्रादि-समृध्यर्थं नानारोगदूरीकरणार्थं नवग्रहदेवताप्रसन्नार्थं च षोडश-दश-पञ्च-

शतादिसंख्याकान् स्वयं ब्राह्मणद्वारा पाठान् कारयिष्ये

पश्चात्-

ॐ गुह्याति गुह्यगोप्त्री त्वं गृहाणास्मद् कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादन् महेश्वरि॥

इस श्लोक द्वारा महालक्ष्मी का जप करके और श्रीसूक्त का पाठ करके

'**श्रीमहालक्ष्मीः भगवती प्रीतताम्**' यह कहकर जल भूमि पर छोड़ें।

ततः-उसी स्थान पर आचार्यादि को दक्षिणा देकर यजमान प्रार्थना करें-

ॐ यत्पादपद्ममृतसेवनेन मूढोऽपि सद्यः प्रकरोति काव्यम्।
साऽनेकदेवादिगणैः संपूज्या समस्तविघ्नक्षयमातनोतु॥

प्रदक्षिणा त्रयं देवि प्रयत्नेन मया कृता।
क्षम्यतां देव देवेशि पापानां क्षालनं कुरु॥
प्रयच्छ पुत्रपौत्राश्च पिष्णुवक्षःस्थलेऽनधे।
श्रियं देहि यशो देहि सर्वान्कामान्प्रयच्छ मे॥
धनं धान्यं धरां धर्म कीर्तिमायुर्यशः श्रियम्।
तुरगान् दन्तिनः पुत्रान् महालक्ष्मि प्रयच्छ मे॥
विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे तथाम्बरे।
लक्ष्मि नित्या यथासि त्वं मयि नित्या तथा भव॥
यन्मया वाञ्छितं देवि तत्सर्वं सफलं कुरु।
न बाध्यन्तां कुकर्माणि सङ्कटान्मे निवारय॥

यावच्चन्द्रश्च सूर्यश्च यावद्देवा वसुन्धरा।
तावन्मय गृहे देवि अचला सुस्थिरा भव॥
यावत्तारागणाकाशे यावदिन्द्रादयोऽमराः।
तावन्मम गृहे देवि अचला सुस्थिरा भव॥
पङ्कजं देवि सन्त्यज्य मम वेश्मनि संविश।
यथा सदारपुत्रोऽहं सुखस्यिां त्वत्प्रसादतः।
भूमौ स्खलितपादानां भूमिरेवावलम्बनम्।
त्वयि जातापराधानां त्वमेव शरणं शिवे॥
अपराधो भवत्येव सेवकस्य पदे-पदे।
कोऽपरः क्षमते लोके केवलं मातरं विना॥
साधु वाऽसाधु वा कर्म यद्यदाचरितं मया।
तत्सर्वं कृपया देवि गृहाणाराधनं मम॥
ज्ञानतोऽज्ञानतो वापि यन्मयाचरितं शिवे।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि॥

प्रार्थना के उपरान्त आचार्य को स्वर्ण, अन्न, वस्त्र तथा स्वर्णशृंगादियुत गाय देकर यजमान इस श्लोक का उच्चारण करके देवी के समक्ष अपने दाएं हाथ के जल को भूमि में छोड़ देवें-

करिष्यामि व्रतं देवि त्वद्भक्तस्त्वत्परायणः।
तदविघ्नेन मे यातु समाप्ति त्वत्प्रसादतः॥

उलूकपूजनम्

इस क्रम से आचार्य उलूक पूजन यजमान से करावे-

ॐ अग्नये कुटरूनालभते वनस्पतिभ्य्यऽ उलूका-

नग्नीषोमाभ्याञ्चाषानश्विभ्यां मयूरान्मित्रावरु-
णाभ्याङ्कपोतान्॥

ॐ वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितृणां बलायाजगरो वसूनां कपिञ्जलः कपोतऽ उलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः॥

ॐ उलूकाय नः उलूकं पूजयामि।

हस्तिपूजनम्

इस क्रम से आचार्य हस्ति पूजन यजमान से करावें-

ॐ प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्त्तिका नीलं गोः क्रिमिः समुदाय शिशुमारो हिमवते हस्तो॥

ॐ हस्तिने नमः हस्तिनं पूजयामि।

कामदेवादिऋतुपूजनम्

निम्नक्रम से आचार्य कामदेवादि ऋतु पूजन यजमान से करावें-

उलूकाग्रे कामदेवं तरुणं वर्णं रक्तवस्त्राभरण-माल्यानुलेपनं वामदक्षिणयोरतिप्रीतिभ्यां शोभितं पुष्पवाणेक्षुधर्नुर्धरं वसन्तादिसहितं ध्यायेत्-

ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा।

ॐ कामदेवाय नमः कामदेवं पूजयामि। तद्वामेरतिं गौरवर्णां सर्वालङ्कारभूषितां रक्तवस्त्रपरीधानां पद्मद्वयकरां ध्यायेत्–

ॐ इह रतिरिहरमध्वमिहधृतिरिहस्वधृतिः स्वाहा। उपसृजन्धरुणं मात्रे धरुणो मातरन्धयन्। रायस्पोष-मस्मासुदीधरत्स्वाहा॥

ॐ रत्यै नमः रतिं पूजयामि।

कामस्य दक्षिणभागे प्रीतिश्यामवर्णां सर्वाभरणभूषितां रक्त वस्त्रपरीधानां तांबूलकरां ध्यायेत्–

ॐ प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य।
प्रयाजेभिरनुयाजान्वषट्कारे-भिराहुतीः।

ॐ प्रीत्यै नमः प्रीतिं पूजयामि।

उपरान्त आचार्य कामदेव के अग्र में वसन्तादिक ऋतुओं का पूजन यजमान से करावें–

ॐ वसन्तेनऽ ऋतुना देवा वसवस्त्रिवृता स्तुताः।
रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः॥

ॐ वसन्तऋतवे नमः वसन्तऋतुं पूजयामि।

ॐ ग्रीष्मेणऽ ऋतुना देवा रुद्राः पञ्चदशे स्तुताः।
बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः॥

ॐ ग्रीष्मऋतवे नमः ग्रीष्मऋतुं पूजयामि।

ॐ वर्षाभिर्ऋतुना दित्या स्तोमे सप्तदशे स्तुताः।
वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः॥

ॐ वर्षाऋतवे नमः वर्षाऋतुं पूजयामि।

ॐ शारदेनऽ ऋतुना देवाऽ एकविर्ठ० शऽ ऋभवस्तुताः।
वैराजेन श्रिया श्रियर्ठ० हविरिन्द्रे वयो दधुः॥

ॐ शरदऋतवे नमः शरदऋतुं पूजयामि।

ॐ हेमन्तेनऽ ऋतुना देवास्त्रिणवे मरुतस्तुताः।
बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः॥

ॐ हेमन्तऋतवे नमः हेमन्तऋतुं पूजयामि।

ॐ शैशिरेणऽ ऋतुना देवास्त्रयस्त्रिर्ठ० शे मृतास्तुताः।
सत्येन रेवतीः क्षत्रर्ठ० हविरिन्द्रे वयो दधुः॥

ॐ शिशिरऋतवे नमः शिशिरऋतुं पूजयामि।

आचार्य लब्धोपचारों से पूजन करवाके पुष्पांजलि यजमान से प्रदान करावें–

ॐ वसन्ताय कपिञ्जलानालभते ग्रीष्मय कलविङ्कां-वर्षाभ्यस्तित्तिरीञ्छरदे वर्तिका हेमन्ताय ककराञ्छिशिराय विकरान्।

कामदेव के दिक्षु–विदिक्षु और देवताओं की पूजा करें–

पञ्चवर्णैः चन्दने वा अष्टदलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वर्तुलत्रयं तद्बहिर्वृत्तं चतुरस्रं कृत्वा ॐ भस्म शरीराय नमः ॐ भस्मशरीरं पूजयामि।

ॐ अनङ्गाय नमः अनङ्गं पूजयामि।

ॐ मन्मथाय नमः मन्मथं पूजयामि।

ॐ वसन्तसखाय नमः वसन्तसखं पूजयामि।

ॐ स्मराय नमः स्मरं पूजयामि।

ॐ इषुचापाय नमः इषुचापं पूजयामि।

ॐ पुष्पास्त्राय नमः पुष्पास्त्रं पूजयामि।

ॐ कन्दर्पाय नमः कन्दर्पं पूजयामि।

लब्धोपचारों से पूजन करे के इसका उच्चारण करें–

ॐ कामदेवाय विद्महे पुष्पवाणाय धीमहि। तन्नोऽनङ्गः प्रयोदयात्।

इस श्लोक का उच्चारण करके नमस्कार करें–

नमोऽस्तु पुष्पवाणाय जगदानन्दकारिणे।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय च॥

कुमारीपूजा के लिए यजमान से इस संकल्प को आचार्य करावें–

अद्य श्रीलक्ष्मीपूजनसाङ्गतासिद्धये कुमारीपूजनं करिष्ये–

तत्पश्चात् निम्न मंत्रों के द्वारा एवं श्लोकों के द्वारा कुमारी पूजा करें–

ॐ नृत्ताय सूतङ्गीताय शैलूषन्धर्माय सभाचरन्नरिष्ठायै भीमलन्नर्माय रेभर्ठ० हसाय कारिमानन्दाय स्त्रीषखम्प्रदे कुमारी पुत्रं मेधायै रथकारन्धैर्याय तक्षाणम्।

ॐ कन्याऽइव वहतुमेतवाऽ उऽ अञ्ज्यञ्जानाऽअभिचाकशीमि। यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽ अभितत्पवन्ते॥

ॐ मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम्।
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥
ॐ कुमार्यै नमः कुमारीं पूजयामि।

कुमारी पूजा के पश्चात् वटुक पूजा इस क्रम से करें सर्वप्रथम बटुक पूजा के लिए यजमान से यह संकल्प करावें-

अद्य श्रीलक्ष्मीपूजनकर्मणि साङ्गफलप्राप्तये वटुकपूजनं करिष्ये।

ॐ अनुते शुष्मन्तुरयन्तमीयतुः क्षोणी शिशुन्नमातरा।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि॥

ॐ वटुकाय नमः वटुकं पूजयामीत्यावाहना-दिराजोपचारैः संपूजयेत्।

वटुकपूजा के पश्चात् सुवासिनी पूजा इस क्रम से करें-

ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्यः आयुर्मेदाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दाः। सुखदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मेदाऽ आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मेदाः। विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्यऽ ओजो मेदा विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि।

ॐ या देवि सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै - नमस्तस्यै - नमस्तस्यै नमो नमः॥

इस प्रकार से पूजा करके-

ॐ बालायै नमः। ॐ कामेश्वर्यै नमः। ॐ गणेश्यै नमः। ॐ दुर्गायै नमः। ॐ लक्ष्म्यै नमः। ॐ सरस्वत्यै नमः। ॐ कलाभ्यो नमः।

इस प्रकार लक्ष्मी देवी के रूप का ध्यान कर वस्त्र एवं अलंकार उन्हें समर्पित कर यह प्रार्थना करें–

ॐ बन्धूकपुष्पसंकाशे त्रिपुरे भयनाशिनी।
भाग्योदयसमुत्पन्ने प्रसन्नवरदेति वै॥
जय देवि जगद्धात्रि त्रिपुरे च त्रिदैवते।
भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तु ते॥
जगत्पूज्ये जगद्वन्द्ये जगन्मोहनविधायिनि।
सर्वविघ्नहरे देवि महालक्ष्मि नमोऽस्तु ते॥

सुवासिनीपूजा के पश्चात् निधि पूजन इस क्रम से करें–

ॐ धन्वनागा धन्वनाजिञ्जयेम धन्वना तीव्राः समदो जयेम। धनुः शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम॥

ॐ रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु। ऋतस्य पथाप्रेत चन्द्रदक्षिणा विस्वः पश्य व्यन्तरिक्षं यतस्व सदस्यैः॥

ॐ स्वर्णधर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्ण शुक्रः स्वाहा स्वर्ण ज्योतिः स्वाहा स्वर्ण सूर्यः स्वाहा॥

अथवा–ॐ कुबेराय नमः इस नाम मंत्र से पूजन कर यह प्रार्थना करें–

ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥

ततः–षोडशसंख्याकान् गोधूमनिर्मितान् सधृतादिसतहितान् अपूपान् षोडशलडडूकान् षोडशऋतुफलानि नानापक्वापक्वसाकादीनि दक्षिणां च श्रीमहालक्ष्मी पूजायाः साद्गुण्यार्थमिद-माचार्याय दास्ये।

इसप्रकार उपर्युक्त संकल्प यजमान करके इस श्लोक का उच्चारण करके ब्राह्मण को दे दें–

ॐ इन्दिराप्रतिगृह्णाति इन्दिरा वै ददाति च।
इन्दिरातारकोभाभ्यामिन्दिरायै नमो नमः॥

पश्चात् उस चरणोदक को लेकर दूसरे पात्र में लेकर इस श्लोक का उच्चारण करके पिये–

ॐ गङ्गापुष्करनर्मदा च यमुनागोदावरीगोमती।
गङ्गाद्वार गया-प्रयाग-बदरी-वाराणसी सिन्धुषु॥
रेवासेतुसरस्वतीप्रभृतिषु ब्रह्माण्डभाण्डोदरे।
तीर्थस्नानसहस्त्रकोटिफलदं श्रीमूर्तिपादो दकम्॥
ॐ महालक्ष्म्यै नमः चरणोदकं पिबामि। ततः–

ॐ तां मऽ आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान्विन्देयं पुरुषानहम्॥

इस मंत्र से पूजित पुष्पमाला को सूँघ कर गले में धारण करें।

ततः–'अनेन यथाशक्तअर्चनप्रकारेण श्रीमहालक्ष्मीः प्रीयताम्'

उपर्युक्त वाक्य 'अनेन से प्रियताम्' तक पढ़कर भूमि या दूसरे पात्र जल में छोड़ें। पूजा के पश्चात् चढ़ाये हुए जल पुष्पादि को तुलसी आदि में छोड़ देवें।

यजमान को इन श्लोकों द्वारा ब्राह्मण आशीर्वाद प्रदान करें–

ॐ भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु।
रक्षन्तु त्वां सदा देवाः सम्प्रदः सन्तु सर्वदा॥
स्तुवन्तु ब्राह्मणा नित्यं दारिद्र्यं न च बाधते।
सर्वपापहरालक्ष्मीः सर्वसिद्धिप्रदायिनी॥
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीपते।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥
त्रिनयनमभिमुखनिः सृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः।
स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समस्नुते दिवीति दिवीति॥

सम्भव हो तो उस रात्रि में उत्सव पुराण कथा–कीर्तन आदि करके बन्धु–बान्धवों सहित रात्रि जागरण करें, प्रातः काल ब्राह्मण भोजनादि करवायें।

होमादिविसर्जनान्तकर्म

यजमान यथास्थान बैठकर प्राणायाम, शान्ति सूक्त का उच्चारण करके यह संकल्प करें–

देशकालौ-संकीर्त्य गोत्रः, शर्मा अस्मिन् सनवग्रहमखहवनात्मक महालक्ष्मीयागकर्मणि गणेशाम्बिकयोः, वरुणस्य, सगणपानां षोडशमातृणां, सप्तमातृणां, वास्तुपीठस्थदेवानां, मण्डपदेवतानां, सर्वतोभद्रपीठस्थदेवतानां, प्रधानस्य सपरिवारस्य मेखला-देवानामग्नेः शान्तिकलशदेवस्य, नवग्रहाणां सपरिवाराणां, योगिनीनां, क्षेत्रपाला-नामाचार्यादिऋत्विजां च पूजनं करिष्ये।

आचार्य उपरोक्त संकल्प से सम्बन्धित सभी विधि को करके यजमान से गणेश जी का ध्यान करावें-

इस श्लोक से यजमान अपनी शिखा बाधे-

ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने।
तिष्ठ देवि शिखामध्ये चामुण्डे चापराजिते॥

इस श्लोक का उच्चारण कर प्रार्थना करें-

ॐ सहस्त्राणि सहस्त्रसो बाह्वोस्तव हेतयः।
तासामीसानो भगवः पराचीना मुखा कृधि॥

इस मंत्र से आसन पर स्थापित करें-

ॐ यऽएतावन्तश्चभूयाठं॰सश्च दिशो रुद्रा वितस्थिरे।
तेषांठं॰ सहस्त्रयोजने वधन्वा नितन्मसि॥

ततः-ॐ अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु रथन्तरठं॰ साम त्रिवृत्स्तोमो वसन्तऽ ऋतुर्ब्रह्मद्रविणम्॥ ॐ पूर्वायै नमः॥

ॐ दक्षिणामारोह त्रिष्टुप्त्वावतु बृहत्साम पञ्चदशस्तोमो ग्रीष्मऽ ऋतुः क्षत्रन्द्रविणम्॥ ॐ दक्षिणायै नमः॥

ॐ प्रचीचीमारोह जगती त्वावतु वैरूपठं॰ साम सप्तदशस्तोमो वर्षाऽ ऋतुर्विड्द्रविणम्॥ ॐ पश्चिमायै नमः॥

ॐ उदीचीमारोहा-नुष्टुप्त्वावतु वैराजठं॰ सामैकविंठं॰ शस्तोमः शरद् ऋतुः फलन्द्रविणम्॥ ॐ उत्तरायै नमः॥

इन श्लोकों का उच्चारण कर दिग्बन्धन करें–

ॐ अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः।
ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया॥
उपक्रामन्तु भूतानि पिशाचा सर्वतोदिशम्।
सर्वषामविरोधेन हवनं च समारभे॥

ॐ ये भूतानामधिपतयो विशिखासः कपर्दिनः। तेषांठं० सहस्त्रयोजने वधन्वा नितन्मसि॥

इस प्रकार से दिग्बन्धन करके ग्रहों का हवन समाप्त करके उस दिन व दूसरे दिन प्रधान न्यास करें उपरान्त इन श्लोकों का उच्चारण कर ध्यान करें–

ॐ त्वं परा प्रकृतिः साक्षाद् ब्रह्मणः परमात्मनः।
त्वत्तो जातं जगत्सर्वं त्वं जगज्जननी शिवे॥
महदाद्यणुपर्यन्तं यदेतत्सचराचरम्।
त्वयैवोत्पादितं भद्रे त्वदधीनमिदं जगत्॥
त्वमाद्या सर्वविद्यानामस्माकमपि जन्मभूः।
त्वं जानासि जगत्सर्वं न त्वां जानासि कश्चन॥
त्वं काली तारिणी दुर्गा षोडशी भुवनेश्वरी।
धूमावती त्वं वगला भैरवी छिन्नमस्तका॥
त्वमन्नपूर्णा वाग्देवी त्वं देवी कमलालया।
सर्वशक्तिस्वरूपा त्वं सर्वदेवमयी तनुः॥
त्वमेव सूक्ष्मा स्थूला त्वं व्यक्ताव्यक्तस्वरूपिणी।
निराकारापि साकारा कस्त्वां वेदितुमर्हति॥

उपासकानां कार्यार्थ श्रेयसे जगतामपि।
दानवानां विनाशाय धत्से नानाविधास्तनूः॥
चतुर्भुजा त्वं द्विभुजा षड्भुजाऽष्टभुजा तथा।
तमेव विश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥

ततः-ॐ महालक्ष्म्यै नमः-अङ्गुष्ठाभ्यां नमः। ॐ विष्णुवामाङ्कसंस्थितायै नमः-तर्जनीभ्यां नमः। ॐ सौभाग्यजनन्यै नमः-मध्यमाभ्यां नमः। ॐ सुखदायै नमः-अनामिकाभ्यां नमः। सौभाग्यकर्त्र्यै नमः-कनिष्ठिकाभ्यां नमः। ॐ समस्तभूतान्तर-संस्थितायै नमः-करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासः।

इसके पश्चात् श्रीसूक्त के पूर्व न्यासों को पुनः करके इन श्लोकों से यजमान ध्यान करें-

ॐ अरुणकमलसंस्था तद्रजः पुञ्जवर्णा,
कमलधृतेष्टाभीति युग्मांबुजा च।
मणिमुकुटविचित्रालङ्कृतिः पद्ममाला भवतु।
भुवनमाता सन्ततं श्रीः श्रियै नः॥

ततः प्रधानहोमः। आवरणादिस्थापितदेवानां होमः।
सतिसं भवेलक्ष्मीसहस्त्रमन्त्रैनामर्होमः।

निम्न श्लोकों का उच्चारण कर प्रार्थना करें-

ॐ सरसिजनिलये सरोजहस्ते धवलान्तर्गतशुभगन्धमाल्यशोभे।
भगवति हरि वल्लभे मनोज्ञे त्रिभुवनभूतिकरे प्रसीद मह्यम्॥

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्॥
पद्मानने पद्मउरु पद्माक्षीपद्मसम्भवे।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम्॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्।
विष्णुप्रियसखीं देवीं नमाम्यच्युतवल्लभाम्॥

लक्ष्मी गायत्री—

महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्॥

पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व॥
आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः।
ऋषयः श्रियपुत्राश्च मयि श्रीर्देवीदेवता॥
ऋणरोगादिदारिद्र्यं पापञ्च अपमृत्यवः।
भयशोकमनस्तापा नश्यन्तु मम सर्वदा॥

अथोत्तरपूजनम्

उत्तर पूजन के लिए निम्न संकल्प यजमान करें-

ततः-कृतस्य लक्ष्मीयागकर्मणः साङ्गतासिद्धये आवाहित देवानामुत्तरपूजां करिष्ये॥

इसप्रकार संकल्प करके गणपत्यादि देवताओं की पूजा करें-

स्विष्टकृत्-कर्म

आचार्य इस वैदिक मंत्र से यजमान से अग्नि का पूजन करवायें-

ॐ अग्ग्ने नय सुपथा रायेऽ अस्म्मान् विश्श्वानि देवव्वयुनानि व्विद्वान्। युयोद्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठां ते नम ऽउक्तिं व्विधेम।

अग्नि पूजन के उपरान्त आचार्य बड़े पात्र बायें हाथ से शाकल को ग्रहण कर दाहिने हाथ से घी भर कर स्रुव को ले दाहिनेपैर की जांघ को मोड़कर ब्रह्मा से स्पर्श कर इस मन्त्र से स्विष्टकृत संज्ञक आहुति देवें-

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम॥

व्याहृतिहोमकर्म

आचार्य निम्न मन्त्रों का उच्चारण करते हुए नौ व्याहृति आदि की आहुति यजमान से घृत द्वारा प्रदान करवायें-

ॐ भूः स्वाहा-इदमग्नये न मम।

ॐ भुवः स्वाहा-इदं वायवे न मम।

ॐ स्वः स्वाहा-इदं सूर्याय न मम।

ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडो ऽअवयासिसीष्ठाः। यजिष्ठो व्वह्नितमः शोशुचानो व्विश्वाद्वेषाꣳसि प्प्रमुमुग्ध्यस्मत् स्वाहा॥ इदमग्नी वरुणाभ्यां न मम॥

ॐ स त्त्वं नो ऽअग्नेऽवमो भवोती ने दिष्ठोऽअस्या-ऽउषसो व्युष्टौ। अवयक्ष्व नो वरुणꣳ रराणोव्वीहि मृडीकꣳ सुहवो न ऽएधि स्वाहा॥ इदं मग्नीवरुणाभ्यां न मम॥

ॐ अयाश्चाग्ने ऽस्यनभिशस्तिपाश्च सत्यमित्वम-याऽअसि। अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा॥ इदमग्नये अयसे न मम॥

ॐ ये ते शतं वरुणं ये सहस्त्रं यज्ञियाः पाशाः वितता महान्तः। ते भिर्न्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम॥

ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यमꣳ श्रथाय। अथाव्वयमादित्य व्व्रते वानागसोऽअदितये स्याम स्वाहा॥ इदं वरुणायादित्यायादितये न मम॥

ॐ प्रजापतये स्वाहा-इदं प्रजापतये न मम॥

॥ इति व्याहृतिहोमकर्म॥

दशदिक्पालबलिकर्म

आचार्य इस मन्त्र का उच्चारण करें-

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे-हवे सुहवꣳ शूर मिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिनोꣳ स्वस्ति घमन्द्रवा धात्विन्द्रः॥

ततः 'ॐ शिखिने एष पायसबलिर्न मम' एवं भूतैः पूर्वोक्तनाम मन्त्रै। शिख्यादिवास्तु-मण्डलस्थदेवताभ्यः पायसबलिदानम्। ततां 'ॐ वास्तुपुरुषाय एष बलिर्न मम' इति मन्त्रेण प्रधानवास्तुपुरुषाय बलिं दद्यात्। ततः त्रिसूत्र्या मण्डपवेष्टनं जलदुग्धधारादानं च। तत्र मन्त्राः कृणुध्वपाजः। तव भ्रमासः। प्रतिस्पशो विसृज। उदग्ने तिष्ठ। ऊर्ध्वो भव। पुनन्तु मा पितरः। अग्नऽ आयूर्ठ०षि। पुनन्तु मा देयजनाः। पवित्रेण पुनीहि। यत्ते पवित्रम्। पवमानः सोऽअद्य नः। उमाभ्यां देव। वैश्वदेवी पुनती।

अथ मण्डपपूजनम्

तत्र ईशानकोणादारभ्य मध्ये
चतुरः स्तम्भान् पूजयेत्–
(१) ब्रह्म यज्ञानम्–ब्रह्मणे नमः
(सावित्र्यै, वास्तुदेवतायै,
ब्राह्मे, गङ्गायै)
ऊर्ध्वऽऊषुण ऊतये–नागमात्रे नमः

आयङ्गौः शाखाबन्धनम्
यतो यतः स्तम्भाभिमन्त्रेणम्
(ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः
(एवं सर्वत्र)
(२) इदं विष्णुः विष्णवे नमः
(लक्ष्म्यै, अदित्यै, वन्दायै,
ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः वैष्णव्यै)

ऊर्ध्वऽऊषु, आयङ्गौः, यतोयतः
(३) यमाय त्वा यमाय नमः
(पूर्वसंध्यायै, अञ्जन्यै, क्रूरायै, नियंत्र्यै
ऊर्ध्वऽ ऊषु आयङ्गौः यतो यतः
(४) नमोऽस्तु सर्पे–नागराजाय नमः
(मध्यमसन्दायै, धरायै पद्मायै,
महापद्मायै)

(५) यदक्रन्दः स्कन्दाय नमः
(पश्चिमसन्ध्यायै)

(६) वायो येते वायवे नमः
ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः (वायव्यै गायत्र्यै, मध्यमसन्धायै)
(३) नमः शम्भवाय च शम्भवे नमः ऊर्ध्वऽऊषु, आयङ्गौः यतो यतः (गौर्यै, माहेश्वर्यै, शोभनायै, भद्रायै)
(७) आप्यायस्व सोमाय नमः ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः
(सावित्र्यै, अमृतकलायै,
विजयायै, पश्चिमसंन्ध्यायै)
(४) त्रातारमिन्द्रम् इन्द्राय नमः
(इन्द्राण्यै, आनन्दायै, विभूत्यै,ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः आदित्यै)
(८) इमम्मे वरुणाय नमः
(वारुण्यै, पाशधारिण्यै, वृहत्यै)
ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः
ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः
ततो मण्डपाद् बहिः ईशानादारभ्य

द्वादशस्तम्भान् पूजयेत–

(१) आ कृष्णेन, सूर्याय, नमः

(सौर्यै, भूत्यै, सावित्र्यै, मङ्गलायै)

ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः

(२) गणानां त्वा गणपतये नमः

(सरस्वत्यै, विप्रहारिण्यै, जयायै)

ऊर्ध्वऽ ऊषु आयङ्गौः, यतो यतः

(११) बृहस्पते अति–बृहस्पतये नमः

(पौर्णमास्यै, सावित्र्यै, वास्तुदेवतायै)

(९) वसुभ्यस्त्वा अष्टवसुभ्योनमः

(विनतायै, अणिमायै,

भूत्यै, गरिमायै)

ऊर्ध्वऽऊषु, आयङ्गौः यतो यतः

(१०) सोमोधेनुर्ठ०–धनदाय नमः

(आदित्यायै, लघिमायै सिनीवाल्यै)

(१२) विश्वकर्मन्ह–विश्वकर्मणे नमः

(सिनीवाल्यै, वास्तुदेवतायै सावित्र्यै)

ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः।

ऊर्ध्वऽऊषु, आयङ्गौः, यतो यतः

अथ पूर्वादिक्रमेण तोरणपूजा

ॐ अग्निमीडे तोरणनिधानम्। 'ॐ सुदृढतोरणाय नमः' इति पञ्चोपचारैः पूजयेत्। दक्षिणे–ॐ राहवे नमः। वामे–ॐ बृहस्पतये नमः। तत्र कलशस्थापनविधिनैकं कलशं संस्थाप्य तस्मिन् कलशे। ध्रुवाय नमः–इत्यावाह्य पूजयेत। ॐ इषे त्वा–इति तोरणं निधाय ॐ सुभद्रतोरणाय नमः, पूजयेत्। दक्षिणे–ॐ सूर्याय नमः। ॐ अङ्गारकाय नमः कलशं संस्थाप्य ॐ धरायै नमः–इत्यावाह्य पूजयेत। ॐ अग्न आयाहि इति तोरणनिधानम्। ॐ सु (भीम) शर्मतोरणाय नमः। दक्षिणे–ॐ शुक्राय नमः वामे–ॐ बुधाय नमः। कलशं संस्थाप्य ॐ वाक्पतये नमः–इत्या०। ॐ शन्नो देवी० ॐ तोरणाय नमः। ॐ सुहोत्रतोरणाय नमः। दक्षिणे–ॐ सोमाय नमः। वामे–ॐ केतुशनिभ्यां नमः। कलशं संस्थाप्य तत्र ॐ विघ्नेशाय नमः इति पञ्चोपचारैः पूजयेत्।

अथ द्वारपूजा

पूर्वद्वारे–कलशद्वयं संस्थाप्य तत्र

ॐ ऐरावताय नमः–इति पूजयेत्। ऊर्ध्व–द्वारिश्रयै नमः। अधः–देहल्यै नमः। वामदक्षिणस्तम्भयोः–गणेशाय नमः। स्कन्दाय नमः। कलशद्वये–गङ्गायै नमः। यमुनायै नमः–इत्यावाह्य पूजयेत्। ऋग्वेदिनौ द्वारपालौ वृत्वा ॐ अग्निमीडे इति गन्धादिना पूजयेत्। द्वारकलशयोः–ॐ त्रातारमिन्द्रमिति इन्द्रं पूजयेत् 'ॐ आशुः शिशानः' इति पीतां पताकां पीतं ध्वजं च समुच्छ्रयेत्। इन्द्राय बलिदानं च। तत आग्नेयीं गत्वा कलशं संस्थाप्य तत्र अमृताय नमः, पुण्डरीकाय नमः–इत्यावाह्य पूजयेत। कलशे–अग्नये नमः इत्याग्निमावाह्य पूजयेत्। ॐ अग्निं दूतम्' इति रक्तां पताकां रक्तं ध्वजं च समुच्छ्रयेत्। ॐ त्वन्नोऽअग्ने–इत्यग्निं पूजयेत्। बलिदानं दक्षिणद्वारे–कलशद्वयं स्थापयित्वा तत्र वामननामकदिग्गजाय नमः इति पूजयेत्। ऊर्ध्व–द्वारश्रियै नमः। अघः–देहल्यै नमः। स्तम्भयोः–पुष्पदन्ताय नमः। कपर्दिने नमः। कलशद्वये–गोदावर्यै नमः, कृष्णाय नमः। यजुर्वेदिनौ द्वारघालौ वृत्वा 'ॐ इषे त्योर्ज्जेत्वा' इति पूजयेत्। पुनः कलशद्वये यमाय नमः इति यमं सम्पूज्यार्ध्यं दत्त्वा 'आयङ्गौ' इति कृष्णौ पताकाध्वजौ समुच्छ्रयेत्। यमाय बलिदानं च। नैर्ऋतिं गत्वा कलशं स्थापयित्वा वरुणं सम्पूज्य कुमुदाय नमः, दुर्जयाय नमः इति नीलवर्णौ पताकाध्वजौ समुच्छ्रयेत्। निर्ऋतये सघृतकृष्णब्रीह्यन्नदानं च। पश्चिमद्वारे–गत्वा कलशद्वयं स्थापयित्वा तत्र 'अञ्जनाख्यदिग्गजाय नमः–इति पूजयेत्। ऊर्ध्व–द्वारिश्रयै नमः। अधः–देहल्यै नमः। स्तम्भ्योः–नन्दने नमः। चण्डाय नमः। कलशद्वयै–रेवायै नमः। ताप्यै नमः।' सामवेदिनौ द्वारपालौ वृत्वा 'ॐ अग्न आयाहि' इति पूजयेत्। द्वारकलशयोः–वरुणाय नमः–इति वरुणं सम्पूज्यार्ध्यं दत्त्वा 'ॐ इमम्मे' इति श्वेतां पताकां श्वेतं

ध्वजं च समुच्छ्रयेत्। वरुणाय नवनीतौदनबलिदानं च। वायुकोणे गत्वा कलशं संस्थाप्य वरुणं पूजयित्वा पुष्पदन्ताय नमः। सिद्धार्थाय नमः–इति पुष्पदन्तसिद्धार्थौ वायवे नमः इति वायुं च सम्पूज्य 'ॐ वायो येते' इति धूम्रां पताकां धूम्रं ध्वजं च समुच्छ्रयेत्। 'ॐ तववायबृहस्पते' इति वायुं सम्पूज्य यवौदनबलिं दद्यात्। उत्तरद्वारि गत्वा कलशद्वयं संस्थाप्य वरुणं पूजयित्वा सार्वभौमनामकदिग्जाय नमः–इति पूजयेत्। ऊर्ध्व–द्वारश्रियै नमः। अधः–देहल्यै नमः। वामदक्षिणस्तम्भ्योः–महाकालाय नमः भृङ्गिणे नमः। द्वारकलशयोः–वाण्यै नमः। वेण्यै नमः। अथर्ववेदिनौ द्वारपालौ वृत्वा ॐ शन्नो देवी० इति पूजयेत्। पुनः द्वारकलशयोः–सोमाय नमः–इति सोमं सम्पूज्य 'ॐ आप्यायस्व' इत्यर्घ दद्यात्। 'ॐ वयर्ठ० सोम' इति हरितां पताकां हरितं ध्वजं च समुच्छ्रयेत् सोमाय प्रैयङ्गवबलिं दद्याच्च। ईशानकोणे गत्वा पूर्ववत्कलशं स्थापयित्वा वरुणं सम्पूज्य सुप्रतीकाय नमः। मङ्गलाय नमः–इति सुप्रतोकमङ्गलौ पूजयेत्। कलशे–ईशानाय नमः इति ईशानं सम्पूज्य 'ॐ तमीशानम्' श्वेतां पताकां ध्वजं च समुच्छ्रयेत्। 'ॐ आयङ्गौः' इत्यनन्तं सम्पूज्य माषभक्तबलिं दद्यात्। पश्चिमनैर्ऋत्ययोर्मध्ये–ब्रह्मणे नम इति ब्रह्माणमावाह्य 'ॐ ब्रह्म यज्ञानम् इति रक्तां पताकां ध्वजं च समुच्छ्रयेत्।' अनेनैव मन्त्रेण ब्रह्माणं सम्पूज्य माषभक्तबलिं दद्यात्। ततो मण्डपमध्ये–पञ्चवर्ण महाध्वजम् 'ॐ इन्द्रस्य वृष्णो' इति मन्त्रेण रोपयेत्। 'ॐ ब्रह्मयज्ञनाम्' महाध्वजाय नम इति पूजयेच्च।

अथ प्रधानवेद्यां सर्वतोभद्रदेवतानामावाहनं पूजन च

ब्रह्मयज्ञानम्	ब्रह्मणे नमः	यदक्रन्द्रः	स्कन्दाय
वयर्ठ० सोम	सोमाय	आशुःशिणानः	नन्दीश्वराय
तमीशानम्	ईशानाय	यत्ते गात्रा	शूलाय
त्रातारमिन्द्रम्	इन्द्राय	?वरुद्र मदीमही	महाकालाय

त्वन्नो अग्ने अग्नये अदितिर्द्यौः दक्षादिसप्तगणेभ्यः
यमायत्वाङ्गि यमाय अम्बेऽअम्बिके दुर्गायै
असुन्वन्तमयज निर्ऋतये इदं विष्णुः विष्णवे
तत्त्वा यामि वरुणाय पितृभ्यः स्वधायिभ्यः स्वधायै
आ नो नियुद्भिः वायवे परं मृत्यो मृत्युरोगेभ्यः
सुगावो देवाः अष्टवसुभ्यः गणानां त्वा गणपतये
रुद्राः सर्ठ० सृज्य- एकादशरुद्रेभ्यः शन्नो देवीः अद्भ्यः
यज्ञो देवानाम् द्वादशादित्येभ्यः मरुतो यस्य मरुद्भ्यः
यावाङ्कशा अश्विभ्यां स्योना पृथिवि पृथिव्यै
ओमाश्चर्ष- सपैतृकविश्वेभ्यो देवेभ्यः पञ्चनद्यः गङ्गादिनदीभ्यः
अभित्यन्देवर्ठ० सप्तयक्षेभ्यः इमम्मे सप्तसागरेभ्यः
नमोऽस्तु सर्पे भूतनागेभ्यः
ऋताषाडऋ० गन्धर्वाप्सरोभ्यः परित्वा मेरवे

अतोऽग्रे नाममन्त्रेणैव स्थापनमुपलभ्यते— ॐ गदायै नमः। ॐ त्रिशूलाय। ॐ वज्राय। ॐ शक्तये। ॐ दण्डाय। ॐ खड्गाय। ॐ पाशाय। ॐ अंकुशाय। ॐ गौतमाय। ॐ भरद्वाजाय। ॐ विश्वामित्राय। ॐ कश्यपाय। ॐ जमदग्नये। ॐ वसिष्ठाय। ॐ अत्रये। ॐ अरुन्धत्यै। ॐ ऐन्द्रयै। ॐ कौमार्यै। ॐ ब्राह्म्यै। ॐ वाराह्यै। ॐ चामुण्डायै। ॐ वैष्णव्यै। ॐ माहेश्वर्यै। ॐ वैनायक्यै। एता देवताः षोडशोपचारैः सम्पूज्य मध्ये कलशस्थापनविधिना कलशं संस्थाप्य तदुपरि स्थाप्यदेव प्रतिमामग्न्युत्तारणप्राणप्रतिष्ठापूर्वकं संस्थाप्य षोडशोपचारैः सम्पूजयेत्। ततो ब्रह्मादिदेवेभ्यः 'ॐ ब्रह्मणे नमः' पायसबलिं समर्पयामि। एवं भूतैर्नाममन्त्रैः पायसबलिं दद्यात्।

लिंगतोभद्रे विशेष:-

ॐ असिताङ्गभैरवाय नम: ॐ उन्मत्तभैरवाय नम:
ॐ रुरुभैरवाय नम: ॐ कपालभैरवाय नम:
ॐ चण्डभैरवाय नम: ॐ भीषणभैरवाय नम:
ॐ क्रोधभैरवाय नम: ॐ संहारभैरवाय नम:

एतत् अतिरिक्तानां देवानां रुद्रकल्पद्रुमादिषु निबन्धेषु न स्थापनमिति निर्विवादम्।

अथाग्निस्थापनम्

तत्रादौ पञ्चभूसंस्कारान् कुर्यात्। तद्यथा त्रिभि: कुशै प्राक्संस्थमुदक्संस्थ वा भूमिं त्रि: परिसमुह्य गोमदयोदकाभ्यां प्राक्सस्थमुदक्संस्थं वा भूमिं त्रिरुपलिप्य, स्रुवेण प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य, अनामिकाङगुष्ठेन प्रथमरेखात: पांसूनुद्घृत्य वामहस्ते घृत्वा तथैवव द्वितीयरेखात: पांसूनुद्घृत्य तानपि वामहस्ते कृत्वा तथैव तृतीयरेखात: समुद्धृत्य वामहस्ते कृत्वा तत्सर्वं दक्षिणहस्तेन ईशान्यां प्रक्षिप्य, उदकेन नीचेन हस्तेनाभ्युक्ष्य तैजसेन पात्रयुग्मेन सम्पुटीकृतं प्रदीप्तं बह्वङ्गारमग्निं स्वाभिमुखं मध्ये वाग्यत:-'ॐ अग्निं दूतम्' इति मन्त्रेण स्थापयेत्। तदुपरि तद्रक्षार्थं किञ्चित्काष्ठं निदध्यात्। मेखलासु-

इदं विष्णु: विष्णवे नम:
ब्रह्म यज्ञानम् ब्रह्मणे नम:
इमा रुद्राय रुद्राय नम:
योन्याम्-अम्बे अम्बिके गौर्यै नम:
नाभौ-नाभिर्मे नाभ्यधिष्ठातृदेवतायै नम:
कण्ठे-नीलग्रीवा: शितिकण्ठा

इत्यावाह्य यथोपचारै: सम्पूजयेत। 'ॐ चत्वारिशृङ्गा' इत्यग्निं पञ्चौपचारै: पूजयेत्।

अथ ग्रहाणामावाहनं पूजनं च

ऐशान्यां वस्त्राच्छादिते पीठे नवग्रहमण्डलं विलिख्य सूर्यादिननवग्रहान् अधिदेवता–प्रत्यधिदेवता–पञ्चलोकपाल–वास्तोष्पति–क्षेत्रपाल–दशदिक्पालसहितानावाहयेत् तद्यथा–

आ कृष्णेन	सूर्याय नमः	अदित्यै रास्ना	इन्द्राण्यै
इमन्देवा	चन्द्रमसे	प्रजापतेनत्व	प्रजापतये
अग्निमूर्द्धा	भौमाय	नमोऽस्तु	सर्पेभ्यः
उदबुध्यस्वाग्ने	बुधाय	ब्रह्मयज्ञानम्	ब्रह्मणे
बृहस्पतेऽअति	बृहस्पतये	लोकपालानां स्थापनं ग्रहाणामुत्तरे–	
अन्नात्परिस्रुतः	शुक्राय	गणानां त्वा	गणपतये
शन्नो देवीः	शनैश्चराय	अम्बेऽ अम्बिके	अम्बिकायै
कयानश्चित्र	राहवे	वायोयेते	वायवे
केतुं कृण्वन	केतवे	घृतं घृतपावा	आकाशाय
ततोऽधिदेवतास्थापनं		ग्रहदक्षिणापार्श्वे	
यावाङ्कशा		अश्विभ्यां	
त्र्यम्बकं यजामहे ईश्वराय		वास्तोष्पते	वास्तोष्पतये
श्रीश्च ते	उमायै	नहिस्पश	क्षेत्रा धिपतये
यदक्रन्द्रः	स्कन्दाय		
विष्णो रराटमसि	विष्णवे		
मण्डलस्य ब्राह्ये	इन्द्रादिदश दिक्पा-		
आ ब्रह्मन्	ब्रह्मणे	नामावाहनम्-	
स योषा इन्द्र	इन्द्राय	त्रातारमिन्द्र	इन्द्राय
यमायत्वाङ्गि	यमाय	त्वन्नो अग्ने	अग्नये
कार्षिरसि	कालाय	यमायत्वाङ्गि	यमाय
चित्रावसो	चित्रगुप्ताय	असुन्वन्त	निर्ऋतये

प्रत्यधिदेवतास्थापनं ग्रहवामपार्श्वे–

तत्त्वा यामि	वरुणाय	अग्निन्दूतम्	अग्नये
आ नो नियुद्भिः	वायवे	आपो हि	अद्भ्यः
वयर्ठ० सोम	सोमाय	स्योना पृथिवि	पृथिव्यै
तमीशानम्	ईशानाय	इदं विष्णुः	विष्णवे
अस्मे रुद्रा	ब्रह्मणे	इन्द्र आसाने	इन्द्रायस्योना
पृथिवि	अनन्ताय		

मनोजूतिरिति प्रतिष्ठाप्य षोडशोपचारैः संपूजयेत्। ततो ग्रहवेदीशाने कलशस्थापनविधिना रुद्रकलशं संस्थाप्य तत्र 'ॐ असंख्याता' इति मन्त्रेण असंख्यरुद्रानावाह्य पूजयेत्।

खण्डदीक्षितकृतपद्धती शेषादीनामप्यावाहनं तच्च सति संभवे एव कार्यरुद्रकल्पद्रु मे तु नोक्तम्—ॐ शेषाय नमः रवे पूर्वे १ ॐ वासुकये नमः सोमस्याग्रे २ ॐ कर्कोटकाय नमः बुधोत्तरे ३ ॐ पद्माय नमः बृहस्पत्यग्रे ४ ॐ महापद्माय नमः शुक्रोत्तरे ५ ॐ शङ्खपालाय नमः शनिपश्चिमे ६ ॐ कालाय नमः राहुपुरतः ७ ॐ कुलीशाय नमः केतपुरतः ८ बहिः पूर्वे ॐ अश्विन्यादिसप्तनक्षत्रेभ्यो नमः ९ तत्रैव ॐ विष्कुम्भादिसप्तयोगेभ्यो नमः १० तत्रैव—ॐ ववबालवकरणाभ्यां नमः ११ तत्रैव—ॐ सप्तद्वीपेभ्यो नमः १२ तत्रैव ॐ ऋग्वेदाय नमः १३ बहिर्दक्षिणे—ॐ पुष्यादिसप्तनक्षत्रेभ्यो नमः १४ दक्षिणे एव ॐ धृत्यादिसप्तयोगेभ्यो नमः १५ तत्रैव ॐ कौलवतैतलकरणाभ्यां नमः १६ तत्रैव ॐ सप्तसागरेभ्यो नमः १७ तत्रैव—ॐ यजुर्वेदाय नमः १८ पश्चिमे—ॐ स्वात्यादिसप्तनक्षत्रेभ्यो नमः १९ तत्रैव—ॐ वज्रादिसप्तयोगेभ्यो नमः २० तत्रैव—ॐ गरवणिजकरणाभ्यां २१ तत्रैव—ॐ सप्तपातालेभ्यो नमः २२ तत्रैव—ॐ सामवेदाय नमः २३ अथोत्तरे—ॐ अभिजिदादि-सप्तनक्षत्रेभ्यो नमः २४ ॐ साध्यदिषड्योगेभ्यो नमः २५ ॐ विशिष्टकरणाय नमः २६ ॐ भूरादिसप्तलोकेभ्यो नमः २७ ॐ

अथर्ववेदाय नमः २८ अथ वायव्याम्–ॐ ध्रुवाय नमः २९ ॐ सप्तऋषिभ्यो नमः ३०।

अथ यथावकाशम्–ॐ गङ्गादिनदीभ्यो नमः ३१ ॐ सप्तकुलाचलेभ्यो नमः ३२ ॐ अष्टवसुभ्यो नमः ३३ एकादशरुद्रेभ्यो नमः ३४ ॐ द्वादशादित्येभ्यो नमः ३५ ॐ एकोनप–ञ्चाशन्मरुद्भ्यो नमः ३६ ॐ षोडशमातृभ्यो नमः ३७ ॐ षड्ऋतुभ्यो नमः ३८ ॐ द्वादशमासेभ्यो नमः ३९ ॐ द्वयनाभ्यां नमः ४० ॐ पञ्चदशतिथिभ्यो नमः ४१ ॐ षष्टिसंवत्सरेभ्यो नमः ४२ ॐ सुपर्णेभ्यो नमः ४३ ॐ नागेभ्यो नमः ४४ ॐ सर्पेभ्यो नमः ४५ ॐ यक्षेभ्यो नमः ४६ ॐ गन्धर्वेभ्यो नमः ४७ ॐ विद्याधरेभ्यो नमः ४८ ॐ अप्सरेभ्यो नमः ४९ ॐ अक्षोभ्यो नमः ५० ॐ मनुष्येभ्यो नमः ५१ इति संपूज्य प्रार्थयेत्–यत्कृतं पूजनं देव भक्तिश्रद्धाविवर्जितम्। परिगृह्णन्तु तत्सर्वं सूर्याद्याग्रहनायकाः १ ''आदित्यदिग्रहाः सर्वे नानावर्णाः पृथिग्विधाः। सुप्रसन्नाः प्रयच्छन्तु सौभाग्यं मम सर्वदा'' इति।

अथ योगिनीपूजनम्

आग्नेय्यां पीठे रक्तवस्त्राच्छादिते पूर्वभागे त्रीणि त्र्यस्राणि विलिख्य तेषु कलशत्रयं विधिना संस्थाप्य तदुपरि सौवर्णीस्तिस्त्रः प्रतिमाः कृताग्न्युत्तारणाः संस्थाप्य महाकालीमहालक्ष्मी महासरस्वतीरावाह्य षोडशोपचारैः संपूजयेत्। तदग्रे कोष्ठेषु वक्ष्यमाणा देवीरावाहयेत्–

तमीशानम् गजाननायै नमः अग्ने ब्रह्म स्वदंष्ट्रायै
आ ब्रह्मन् सिंहमुख्यै भग प्रणेतः वानराननायै
महाँ इन्द्रः गृधास्यायै सुपर्णोऽसि ग ऋक्षाक्ष्यै
सद्यो जातः काकतुण्डिकायै पितृभ्यः स्वधा केकराक्ष्यै
आदित्यं उष्ट्रग्रीवायै याते रुद्र शिवातनूर वहतुण्डायै
स्वर्णधर्मः हयग्रीवायै वरुणः प्राविता सुराप्रियायै

सत्यश्च मे वाराह्यै　　हर्ठ्ंस: शुचि　　कपालहस्तायै

भायैदार्वाहा शरभाननायै　　सुसन्दृशन्त्वा　　रक्ताक्ष्यै

जिह्वा मे उलूकिकायै　　प्रतिपदसि　　शुक्यै

हिङ्कराय स्वाहा　　शिवारावायै देवीरापो अश्येन्य

(शिवारावाम्)　　हविष्मतीरिमा　　कपोतिकायै

अग्निश्च मे धर्म मयूरायै　　श्रीश्च ते　　पाशहस्तायै

पूषन्तव विकटाननायै　　भुवो यज्ञस्य　　दण्डहस्तायै

वेद्या वेदि: अष्टवक्त्रायै　　कदाचनस्त　　प्रचण्डायै

अयमग्नि: सहस्त्रिण:　　कोटराक्ष्यै　　भद्रं कर्णेभि:

चण्डविक्रमाय

इम्मे कुब्जायै　　इषे त्वोर्जेत्वा　　शिशुघ्न्यै

यमाय त्वा मखाय　　विकटलोचनायै देवीद्यावापृ

पापहन्त्र्यै

यमेन दत्तं शुष्कोदर्यै　　विश्वानि देव　　काल्यै

मित्रस्य चर्ष ललजिह्वाम्　　असुन्वन्तमय　　रुधिरपायिन्यै

(ललजिह्वाम्)　　अग्निश्च म आ　　वसोधयायै

बह्वीनां पिता गर्भमक्षायै　　विष्णो रराटमसि　　तापिन्यै

नमस्ते रुद्र शवहस्तायै　　ब्रह्मणमद्य　　शोषणीदृष्ट्यै

ऋतञ्च मे आन्त्रमालिन्यै　　आ नो भद्रा:　　कोटर्यै

ते आचर स्थूलकेश्यै　　एका च मे स्थूलनासिकायै

वेद्या वेदि: बृहत्कुक्ष्यै　　ब्रह्माणि मे　　विद्युत्प्रभायै

पावकान: सर्पात्यायै　　असङ्ख्याता　　बलाकास्यै

अस्कन्नमद्य प्रेतवाहिन्यै　　अहिरिव　　मार्जायै

तीव्रान्वो दन्तशूककरायै　　तिस्त्रस्त्रेधा　　कटपूतनायै

महीद्यौ:　　क्रौञ्च्यै

उपयामगृहीतोसि सावि　　मृगशीर्षायै

सरस्वती योन्या　　अट्टाट्टहासायै

आप्यायस्व वृषानन यै इदं विष्णुः कामाक्ष्यै
काषिरसि व्यात्तास्यायै कृष्णऽऊर्मि मृगाक्ष्यै
त्र्यम्बकं यजामहे धूमनिश्वासायै मृगो न भीमः मृगलोचनायै
अम्बेऽअम्बिके व्योमैकचरणोर्ध्वदृशे
इत्यावाह्य षोडशोपचारैः संपूजयेत्।

वायव्यां श्वेवस्त्राच्छादिते पीठे चतुरस्त्रं विलिख्य तिर्यङ्मान्यां पार्श्वमान्यां च सूत्रद्वन्द्वं समान्तरालं दद्यात्। एवं समानि नव कोष्ठानि सम्पद्यन्ते। मध्ये कोष्ठे अष्टदलं विलिख्य कलशं संस्थाप्य पूर्णपात्रे कृताग्न्युत्तारणं सौवर्णं क्षेत्रपालं। 'ॐ नमोऽस्तु सर्पेभ्यः' इत्यावाह्य स्थापयेत्। पूर्वादिकोष्ठेषु षट्सु षट्दलानि सम्पाद्य, उत्तरेशानयोः कोष्ठयोस्तु सप्तदलानि कुर्यात्-

पूर्वकोष्ठेषट्सु दलेषु- स न इन्द्राय वरुणाय
इमौ ते पक्षा अजराय नमः बाहू मे वटुकाय
(अजरम्) मुञ्चन्तु मा विमुक्ताय
प्रथमा वाम् व्यापकाय कुर्वन्नेवेह लिप्तकाय
इन्द्रस्य वज्रः इन्द्रचौराय सन्नः सिन्धु नीललोकाय
एवेदिन्द्रम् इन्द्रमूर्तये नमो गणेभ्यः एकदंष्ट्राय
उक्षा समुद्रः उक्ष्णे (उक्षाणम्) दक्षिणषट्के-
यद्देवा देव कूष्माण्डाय अर्मेभ्यो हस्ति एरावताय
आग्नेयषट्सु दलेषु- ओषधीः प्रति ओषधीध्नाय
त्र्यम्बकं यजामहे बन्धनाय वनस्पते वीड्व सुधापाय
देवसवितः दिव्यकराय सुपर्ण वस्ते वैनाय (वैनम)
सीसेन तन्त्रम् कम्बलाय अग्ने अच्छा पवनाय
आशुः शिशानो भीषणाय भद्रं कर्णेभिः ढुण्ढकरणाय
नैर्ऋत्यषट्के- उत्तरादिकोष्ठे सप्तसु दलेषु-

इमर्ठं साहस्रम्-गवयाय (गवयम्) अपां फेनेन स्थविराय

कुम्भो वनिष्ठुः घण्टाय वातं प्राणेना दन्तुराय

आक्रन्दयबल व्यालाय इदर्ठं० हविः धनदाय

इन्द्रा याहि अंशवे खड्गो वैश्व नागकर्णाय

चन्द्रमा अप्स्व चन्द्रवारणाय मृगो न भीमः महाबलाय

(चन्द्रवारणम्) इन्दुर्दक्षः फेत्काराय

गणानात्वा घटाटोपाय जीमूतस्येव वीरकाय

ईशानादिसप्तसु दलेषु क्रमेण-

पश्चिमे षट्सु दलेषु- तीव्रान्धोषान् सिंहाय

उग्रं लोहि जटिलाय अग्निन्दूतम् मृगाय

पवित्रेण पुनीहि क्रतवे आदित्यास्त्वा यक्षाय

आजिघ्र घण्टेश्वराय द्यौस्ते पृथि मेघवाहनाय

वायोशुक्रः धिकटाय सबर्हिरड्क्ता तीक्ष्णाय

दैव्या होतारा मणिमानाय पवमानः सोऽअद्य अमलाय

त्रीणि त आहुः गणबन्धाय अभ्यर्षत शुक्राय

वायव्यादिकोष्ठे षट्सु दलेषु क्रमेण-

इत्यजरादिक्षेत्रपालानावाह्य मनो

प्रतिश्रुत्काया मुण्डाय

जूतिरिति प्रतिष्ठाप्य षोडशोपचारैः

शुद्धबालः सर्व बर्बूकराय सम्पूजयेत्।

अथ कुशकण्डिकादिप्रयोगः

अग्नेर्दक्षिणतो ब्रह्मासनम्। तत्र ब्रह्मोपवेशनम्। अग्नेरुत्तरतः प्रागग्रैः कुशैः प्रणीतासंस्कारार्थ-मेकमासनम्, प्रणीताप्रणयनार्थं च द्वितीयमासनं कल्पयित्वा, प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य दर्भैराच्छाद्य ब्रह्मणो मुखमवलोक्य प्रथमासने निधाय द्वितीयासने

निदध्यात्। ततो-ऽग्न्यायतनस्य समन्नाद्-द्वादशांगुलं स्थलंत्यक्त्वा प्रागग्रैरुदगग्रैश्च त्रिभिस्त्रिश्चतुर्भिर्वा कुशैरग्नेः परिस्तरणम्।

तद्यथा-आग्नेयादीशानान्तम्। ब्रह्मणोऽग्निपर्यन्तम् नैर्ऋत्याद्वा-यव्यान्तम्। अग्नितः प्रणीतापर्यन्तम्। इतरथावृत्तिः। ततः पात्रासादनार्थ कुशानास्तीर्य तत्रः अर्थवन्ति वस्तूनि अग्नेः पश्चिमतः प्राक्संस्थानि प्राग्विलानि उदग्राणि, उत्तरश्चेत् उदक्संस्थानि उदग्विलानि प्रागग्राणि कार्यक्रमेणासादयेत्। पवित्रच्छेदनानि त्रीणि कुशवरुणानि, द्वे पवित्रे साग्रे अनन्तर्गर्भे, प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, सम्मार्जनकुशास्त्रयः पञ्च वा, उपयमनकुशाः सप्त नव वा, समिधस्तिस्त्रः, स्रुवः, आज्यम्, पूर्णपात्रम्, कर्मोपयोगिनी दक्षिणा एतान्यासादयेत्। अन्येषां चोपकल्पनीयानां द्रव्याणामासादनम्। द्वौ कुशौ वामहस्ते कृत्वा तत्र कुशत्रयं निधाय कुशद्वयं कुशत्रयस्योपरितः प्रदक्षिणीकृत्य दक्षिणहस्तेन गृहीत्वा कुशत्रयं च वामेन गृहीत्वा छिन्द्यात् कुशत्रयं त्येजेत् एवं प्रच्छिद्य प्रादेशमात्रे पवित्रे कुर्यात्। तत्र ग्रन्थिं कुर्यादविश्लेषाय। प्रोक्षणीपात्रं प्रणीतासमीपे निधाय तत्र सपवित्रेण करेण प्रणीतोदमासिच्य हस्तद्वयस्यानामि-माङ्गुष्ठाभ्यां धृतपवित्राभ्यामप उत्पूय पवित्रे प्रोक्षणीषु निधाय तत्पात्रं वामस्ते कृत्वा दक्षिणहस्ते नोदिङ्गनम्। प्रणीतोदकेन प्रोक्षणम्। पवित्राभ्यां प्रोक्षण्युदकेन आज्यस्थाल्याः प्रोक्षणम्। सम्मार्जनकुशानां प्रोक्षणम्। उपयमनकुशानां प्रो०। तिसृणां समिधां प्रो०। स्रुवस्य प्रो०। पूर्णपात्रस्य प्रो०। दक्षिणायाः प्रो०। उपकल्पनीयानां द्रव्याणां प्रोक्षणम्। ततः सपवित्रं प्रोक्षणीपात्रम् अग्निप्रणीतयोर्मध्येस्थापयेत्। आज्यस्थाल्यामाज्यनिर्वापः। चरुस्थाल्यां प्रणीतोदकासेवपूर्व-कंतण्डुलप्रक्षेपः। अग्नौ दक्षिणत आज्याधिश्रयणम्। अर्धश्रिते चरौ ज्वलदुल्मुकेनोभयोः पर्यग्निकरणम्। उल्मुकं वह्नौ प्रक्षिप्य इतरथावृतिं कुर्यात्। दक्षिणहस्तेन अधोबिलं स्रुवं प्राञ्चं प्रतप्य सव्ये पाणौ उत्तानं कृत्वा दक्षिणेन सम्मार्जनकुशानाममग्रैर्मूलतो-ऽग्रपर्यन्तं प्राञ्चं सम्मृज्य

कुशमूलैरधस्ताद्भागे स्रुवपुष्करस्य अग्रमारभ्य मूलपर्यन्तं प्रत्यञ्चं सम्मृज्य सम्मार्जनकुशान अग्नौ प्रक्षिपेत्। ततः प्रणीतोदकेन स्रुवमभ्युक्ष्य पुनः प्रतप्य आत्मनो दक्षिणतो निदध्यात्। आज्यमुत्तार्य उत्तरतः स्थापयित्वा अग्नेः पश्चाद् आनयेत्। चरोरुद्वासनम्। अग्नेरुत्तरत एवाज्य प्रदक्षिणी कृत्य आज्यस्योत्तरतश्चरु स्थापयेत्। अनामिकाङ्गुष्ठाभ्यां पवित्राभ्यामाज्य मुत्पूय, अवेक्ष्य, अपद्रव्यनिरंसनं कृत्वा प्रोक्षणीश्च पूर्ववत् उत्पूय तासु धृत्वा उपयमनकुशानादाय वामकरे कृत्वा तिस्रो घृताक्ताः प्रागग्राः समिधी मूलमध्ययोर्मध्यभागेन धृत्वा आदध्यात्। ततः प्रोक्षण्युदकेन सपवित्रेण दक्षिणचुलुकगृहीतेन ईशानाद्युत्तरपर्यन्तं संप्रोक्ष्य इतरथावृतिं च कृत्वा पवित्रे प्रणीतासु निदध्यात्। ततोऽमुकनामाग्ने सुप्रतिष्ठितो भव-इति प्रतिष्ठाप्य 'ॐ अग्नि प्रज्वलितं वन्दे' इत्यादि श्लोकैर्ध्यायेत्। ततः, ॐ चत्वारि शृङ्गा, इति मन्त्रेणाग्नि संपूज्य आधाराज्यभागौ हुत्वा त्यागं कृत्वा सूर्यादिग्रहाणाम-धिवताप्रत्यधिदेवता-पञ्चलोकपाल-दशदिक्पालदेवतानां च समित्तिलचर्वाज्य-द्रव्यैष्टोत्तरशतमष्टाविंशतिमष्टौ वा जुहुयात्। ततः चतुःषष्टियोगिनीनां क्षेत्रपालानां च ब्रह्मादिमण्डलदेवतानां च तत्तन्मन्त्रैराज्यहोमः। अग्निपूजनम्। स्विष्टकृद्धोमः। ततो भूरादिनवाहुतयः। इन्द्रादिदशदिक्पालेभ्यः सूर्यादिनवग्रहेभ्यश्च बलिदानम्। क्षेत्रपालबलिदानम्। ततः 'ॐ पूर्णाहुत्यै नमः' इति संपूज्य पूर्णाहुतिं जुहुयात्। तत्र मन्त्रः-ॐ समुद्रादूर्भिः वयन्नाम। चत्वारि शृङ्गा। त्रिधा हितम्। एता अर्षन्ति। सम्यक् स्रवन्ति। सिन्धोरिव अभिप्रवन्त। कन्या इव। अभ्यर्षत्। धामन्ते। पुनस्त्वा। सप्त ते। मूर्द्धानन्दिवः। पूर्णादर्वि। ततो वसोर्द्धारां जुहुयात्। तत्र मन्त्राः-सप्त ते। शुक्रज्योतिश्च। ईदृङ्चाण्न्यादृ। ऋतश्च सत्यश्च। ऋतजिच्च। ईदृक्षा। स एता। स्वतवाँश्च। इन्द्रन्दैवीः। इमर्ठ० स्तन। घृतम्मिमिक्षे वसोः पवित्रम्। वाजश्चेत्यारभ्य वेद् स्वाहा। ॐ अग्ने

नय-इत्याग्निं प्रदक्षिणीकृत्य पश्चिमदिशि उपविश्य प्रार्थयेत्–ॐजितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन। नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज १ नमो हिरण्यगर्भाय प्रधानाध्यक्षरुपिणे। ॐ नमो वासुदेवाय शुद्धज्ञानस्वरुपिणे २ देवानां दानवानां च सामान्यमधिदैवत। सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ३ एकस्त्वमसि लोकस्य स्त्रष्टा संहारकस्तथा। अध्यक्षश्चानुमन्ता च गुणमाया समाकृतः ४ संसारसागरं घोरमनन्तक्लेशभाजनम्। त्वामेवशरणं प्राप्य निस्तरन्ति मनीषिणः ५ न ते रूपं न चाकारो नायुधानि न चास्पदम्। तथामि पुरुषाकारो भक्तानां त्वं प्रकाशसे ६ नैवकिञ्चित्परोक्षं ते प्रत्यक्षोऽपि न कस्य चित्। नैव किञ्चिदसाध्यं ते न च साध्योऽसि कस्य चित् ७ नैव किञ्चिदसिद्धं ते न च सिद्धोऽसि पावकः। कार्याणां कारणं पूर्व वचसां वाक्यमुतमम् ८ योगिनां परमासिद्धः परमं ते परं विदु। अहं भीतोऽस्मि देवेश संसारेऽस्मिन् भयप्रद ९ त्राहि मां पुण्डरीकाक्ष न जाने परमं पदम्। कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत १० शरीरे जगतौ वापि वद्धते मे महद्भयम्। त्वत्पादकमलादन्यत् मम जन्मान्तेरेष्वपि ११ विज्ञानं यदिदं प्राप्तं यदिदं स्थानमर्चितम्। जन्मान्तरेऽपि मे देव माभूदस्य परिग्रहः १२ दुर्गता वपि जातस्य त्वद्गतो मे मनोरथः। यदि नाशं न विन्देय तावदस्मि कृती सदा १३ अकालकलुषं चित्तं मम ते पादयोः स्थितम्। कामये विष्णुपादौ तु सर्वजन्मसु केवलम् १४ इति स्तवनं कुर्यात्। ततः स्रुवेण भस्मानीय त्र्यायुषञ्जमदग्नेः इति ललाटे। 'कश्यपस्य त्र्यायुषम्' इति ग्रीवायाम्। 'यद्देवेषु त्र्यायुषम्' दक्षिणांसे। 'तन्नो अस्तु त्र्यायुषम्' इति हृदि। संस्रवप्राशनम्। आचमनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्रप्रतिपत्तिः। ब्रह्मणे पूर्णापात्रदानम्। अग्ने पश्चिमतः प्रणीताविमोक। 'आपः शिवा' इत्युपयमनकुशानामग्नौ प्रक्षेपः। ततः आचार्यः 'कृतस्य सग्रहमखामुकयागस्य कर्मणो यजमानाय श्रेयोदानं करिष्ये' इति संकल्प्य यजमानहस्ते 'शिवा आप सन्तु'

इति जलम्। 'सौमनस्यमस्तु' इति पुष्पम्। 'अक्षतं चारिष्टं चास्तु' इत्यक्षतान्। आचार्यः जलाक्षतपूगीफलमादाय भवन्नियोगेन मया अस्मिन् सग्रहमखामुकयागे कर्मणि यत्कृतम् आचार्यत्वं तथा एभिर्ब्रह्मणैः सह यत्कृतं ब्रह्मत्वं गाणपत्याद्युत्पन्नं श्रेयस्तदमुना साक्षतेन सजलेन पूगीफलेन तुभ्यमहं संप्रददे। तदुत्पन्नेन श्रेयसा त्व श्रयोवान् भव। ततो यजमान आचार्यादीन् ब्राह्मणान् संपूज्य तेभ्यो दक्षिणां दद्यातु। ततो गन्धाद्युपचारैः प्रधानादिदेवानामुत्तरपूजां कुर्यात्। तत आचार्यादयो ब्राह्मणाः प्रधानादिकलशोदकेन दूर्वाकुशाम्र-पल्लवैः सपरिवारं यजमानमभिषिञ्चेयुः। तत्र मन्त्रः—द्यौः शान्तिः। शिरो मे। जिह्वा मे। बाहू मे। पृष्ठीमे। नाभिमे। प्रतिक्षत्रे। देवस्य त्वा। विश्वानि देव। शिष्ठाचारादत्रावभृथस्नानमिति केचित्। ब्राह्मणभोजनसङ्कल्पः। भूयसीदानम्। आवाहितदेवानां विसर्जनम्। तत्र मन्त्राः—उत्तिष्ठ ब्रह्मणस्पते। यज्ञयज्ञङ्गच्छ। यान्तु देवागणाः। गच्छ गच्छ सुरश्रेष्ठ। चतुर्भिश्च चतुर्भिश्च। अन्यथा शरणं नास्ति। आवाहनं न जानामि। जपच्छिद्रम्। प्रामादात्कुर्वताम्। यस्य स्मृत्या। ॐ विष्णवे नमो विष्णवे नमो विष्णवे नमः।

तिलकाशीर्वादः—

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते।
धान्यं धनं पशु बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥

●

महत्वपूर्ण यज्ञों के स्वाहाकार

विष्णुयागस्वाहाकारमन्त्राः

ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्।
स भूमिर्ठं० सर्व्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
पुरुषऽ एवेदर्ठं० सर्व्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः।
पादोऽस्य व्विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥
त्रिपादूर्ध्वऽउदैत्पुरुरुषः पादोऽस्येहाभवत्पुनः।
ततो व्विष्वङ् व्यक्रामत्साशनानशनेऽ अभि ॥ ४ ॥
ततो व्विराडजायत व्विराजोऽ अधि पूरुषः।
स जातोऽ अन्त्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥
तस्माद्यज्ञात्सर्व्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे व्वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥
तस्माद्यज्ञात्सर्व्वहुतऽ ऋचः सामानि जज्ञिरे।
छन्दार्ठं०सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
तस्मादश्वाऽ अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः ॥ ८ ॥

तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥ ९ ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत्किंबाहू किमूरू पादाऽ उच्येते ॥ १० ॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यार्ठ० शूद्रोऽ अजायत ॥ ११ ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽ अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥
नाभ्याऽ आसीदन्तरिक्षर्ठ० शीर्ष्णो द्यौः समवर्त्तत।
पद्भ्यां भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ२ऽ अकल्पयन् ॥ १३ ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
व्वसन्तोऽस्यासीदाज्यं ग्रीष्मऽ इध्मः शरद्धविः ॥ १४ ॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वानाऽ अबध्नन्पुरुषं पशुम् ॥ १५ ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः ॥ १६ ॥

(शुक्ल यजुर्वेद ३१/१-१६)

विश्वशान्तियज्ञस्वाहाकारमन्त्राः

ॐ ऋचं व्वाचं प्र पद्ये मनो यजुः प्र पद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्र पद्ये। व्वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्म्मे तद्दधातु। शन्नो भवतु भुवनस्य यस्पतिः ॥ २ ॥

भूर्भुवः स्वः तत्सवितुर्व्वरेण्यं भर्ग्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥ ३ ॥

कया नश्चित्रऽ आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ ४ ॥

कस्त्वा सत्यो मदानां मर्ठ० हिष्ठो मत्सदन्धसः। दृढ़ा चिदारुजे व्वसु ॥ ५ ॥

अभी षु णः सखीनामविता जरितृणाम्। शतं भवास्यूतिभिः ॥ ६ ॥

कया त्वं नऽ ऊत्याभि प्र मन्दसे व्वृषन्। कया स्तोतृभ्य ऽआ भर ॥ ७ ॥

इन्द्रो व्विश्वस्य राजति। शं नोऽ अस्तु द्विपदे शं चतुष्पदे ॥ ८ ॥

शं नो मित्रः शं व्वरुणः शं नो भवत्वर्यमा। शं नऽ इन्द्रो बृहस्पतिः शं नो विष्णुरुरूक्रमः ॥ ९ ॥

शं नो व्वातः पवतार्ठ० शं नस्तपतु सूर्यः । शं नः कनिक्रदद्देवः पर्जन्यो ऽ अभि वर्षतु ॥१० ॥

अहानि शं भवन्तु नः शर्ठ० रात्रीः प्रति धीयताम् । शं नऽ इन्द्राग्नी भवतामवोभिः शं नऽ इन्द्रावरुणा रातहव्या।

शं नऽ इन्द्रापूषणा व्वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥११॥

शं नो देवीरभिष्टयऽ आपो भवन्तु पीतये । शं योरभि स्त्रवन्तु नः ॥१२ ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म स प्रथाः ॥१३ ॥

आपो हिष्ठा मयोभुवस्तानऽ ऊर्जे दधातन । महे रणाय चक्षसे ॥१४ ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥१५ ॥

तस्माऽ अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥१६ ॥

द्यौः शान्तिरन्तरिक्षर्ठ० शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः व्वनस्पतयः शान्तिर्व्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व्वर्ठ० शान्तिः शान्तिरे व शान्तिः सा मा शान्तिरेधि ॥१७ ॥

दृते दृर्ठ० ह मा मित्रस्य मा चक्षुषा सर्व्वाणि भूतानि समीक्षन्ताम् ।

मित्रस्याहं चक्षुषा सर्व्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥

दृते दृर्ठ०ह मा । ज्योके सन्दृशि जीव्यासं ज्योक्के सन्दृशि जीव्यासम् ॥ १९ ॥

नमस्ते हरसे शोचिषे नमस्तेऽ अस्त्वर्चिषे । अन्याँस्तेऽ अस्मत्तपन्तु हेतयः पावकोऽ अस्मभ्यर्ठ० शिवो भव ॥ २० ॥

नमस्तेऽ अस्तु विद्युते नमस्ते स्तनयित्नवे । नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥ २१ ॥

यतोयतः समीहसे ततो नोऽ अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ २२ ॥

सुमित्रिया नऽ आपऽ ओषधयः सन्तु दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २३ ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतर्ठ० शृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ २४ ॥ [शुक्लयजुर्वेद ३६।१-२४]

रुद्रयागस्वाहाकारमंत्राः

ॐ गणनांत्वा० धम् स्वाहा।

ॐ अम्बे अम्बिके० स्वाहा । इति हुत्वा–

ॐ यञ्जाग्रतो० (६ मन्त्राः) मस्तु स्वाहा।

ॐ सहस्त्रशीर्षा० (१६ मन्त्राः) स्वाहा।

ॐ अद्भ्यः सम्भृतः० (६ मन्त्राः) स्वाहा।

ॐ आशुः शिशानो० (१२ मन्त्राः) स्वाहा।

ॐ बिब्भ्राड् बृहत्पिवतु० (१७ मन्त्राः) स्वाहा।

ॐ भूः ॐ भुवः ॐ स्वः ॐ नमस्ते रुद्र मन्यवऽउतो तऽ इषवे नमः। बाहुब्भ्यामुत ते नमः स्वाहा ॥ १ ॥

ॐ या ते रुद्र शिवा तनूरघोरापापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि स्वाहा ॥ २ ॥

ॐ यामिषुङ्गिरिशन्त हस्ते व्विभर्ष्ष्यस्तवे शिवाङ्गिरित्र ताङ्कुरु मा हिर्ठ०सीः पुरुषञ्जगत् स्वाहा ॥ ३ ॥

ॐ शिवेन व्वचसा त्त्वा गिरिशाच्छा व्वदामसि। यथा नः सर्व्वमिञ्जगदयक्ष्मर्ठ० सुमनाऽ असत् स्वाहा ॥ ४ ॥

ॐ अद्धचवोचदधिवक्ता प्प्रथमो दैव्व्यो भिषक। अहींश्च सर्व्वाञ्चम्भयनसर्व्वाश्च्च यातुधान्योधराचीः परा सुव स्वाहा ॥ ५ ॥

ॐ असौ यस्ताम्म्रोऽ अरुणऽ उत बब्भ्रुः सुमङ्गलः। ये चनर्ठ० रुद्द्रा अभितो दिक्षु श्रिताः सहस्त्रशोवैषार्ठ० हेडऽ ईमहे स्वाहा ॥ ६ ॥

ॐ असौ योऽवसर्प्पति नीलग्ग्रीवो व्विलोहितः। उतैनङ्गोपाऽ अदृश्श्रन्नदृश्श्रन्नुदहार्य्यः स दृष्ट्टो मृडयाति नः स्वाहा ॥ ७ ॥

ॐ नमोऽस्तु नीलग्ग्रीवाय सहस्त्राक्क्षाय मीढुषे। अथो येऽ अस्य सत्वानोहन्तेब्भ्योकरन्नमः स्वाहा ॥ ८ ॥

ॐ प्र मुञ्च धन्वनस्त्वमुभयोरात्कर्न्योज्ज्याम्। याश्च्च ते हस्तऽइषवः परा ता भगवो व्वप स्वाहा ॥ ६ ॥

ॐ व्विज्ज्यन्धनुः कपर्द्दिनो व्विशल्ल्यो बाणवाँ२ऽ उत। अनेशन्नस्य याऽ इषवऽ आभुरस्य निषङ्गधिः स्वाहा ॥ १० ॥

ॐ या ते हेतिर्म्मीढुष्ट्टम हस्ते बभूव ते धनुः। तयास्मान्विश्श्वतस्त्वमयक्ष्मया परिभुज स्वाहा ॥ ११ ॥

ॐ परि ते धन्वना हेतिरस्मान्वृणक्तु व्विश्श्वतः। अथो यऽ इषुधिस्तवारेऽ अस्म्मन्निधेहि तम् स्वाहा ॥ १२ ॥

ॐ अवतत्त्य धनुष्ट्वर्ठ० सहस्त्राक्ष शतेषुधे। निशीय शल्ल्यानाम्मुखा शिवो नः सुमना भव स्वाहा ॥ १३ ॥

ॐ नमस्तेऽ आयुधायानातताय धृष्ष्णवे। उमाब्भ्यामुत ते नमो बाहुब्भ्यान्तव धन्वने स्वाहा ॥ १४ ॥

ॐ मानो महान्तमुत मा नोऽ अर्ब्भकम्मा नऽ उक्षन्तमुत मा नऽ उक्षितम्। मानो व्वधीः पितरम्मोत मातरम्मानः प्प्रियास्तन्वोरुद्द्ररीरिषः स्वाहा ॥ १५ ॥

ॐ मा नस्तोकेतनये मानऽ आयुषि मा नो गोषु मा नो अश्श्वेषु रीरिषः। मानोव्वीरानूरुद्द्र भामिनोव्वधीर्हविष्मन्तः सदमित्त्वाहवामहे स्वाहा ॥ १६ ॥

ॐ नमो हिरण्यबाहवे सेनान्न्ये दिशाञ्च पतये नमः स्वाहा ॥ १७ ॥

ॐ नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः पशूनाम्पतये नमः स्वाहा ॥ १८ ॥

ॐ नमो शष्प्पिञ्जराय त्त्विषीमते पथीनाम्पतये नमः स्वाहा ॥ १९ ॥

ॐ नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः स्वाहा ॥ २० ॥

ॐ नमो बब्भ्लुशाय व्व्याधिनेन्नानाम्पतये नमः स्वाहा ॥ २१ ॥

ॐ नमो भवस्य हेत्त्यै जगताम्पतये नमः स्वाहा ॥ २२ ॥

ॐ नमो रुद्द्रायातताविने क्षेत्राणाम्पतये नमः स्वाहा ॥ २३ ॥

ॐ नमो सूतायाहन्त्यै व्वनानाम्पतये नमः स्वाहा ॥ २४ ॥

ॐ नमो रोहिताय स्त्थपतये व्वृक्षाणाम्पतये नमः स्वाहा ॥ २५ ॥

ॐ नमो भुवन्तये व्वारिवस्कृतायोपधीनाम्पतये नमः स्वाहा ॥ २६ ॥

ॐ नमो मन्त्रिणे व्वाणिजाय कक्षाणाम्पतये नमः स्वाहा ॥ २७ ॥

ॐ नमऽ उच्चैर्ग्घोषायाक्क्रन्दयते पत्तीनाम्पतये नमः स्वाहा ॥ २८ ॥

ॐ नमो कृत्स्नायतया धावते सत्त्वनाम्पतये नमः स्वाहा ॥ २९ ॥

ॐ नमः सहमानाय निव्व्याधिनऽ आव्व्याधिनीनाम्पतये नमः स्वाहा ॥ ३० ॥

ॐ नमो निषङ्गिणे ककुभाय स्त्तेनानाम्पतये नमः स्वाहा ॥ ३१ ॥

ॐ नमो निचेरवे परिचरायारण्ण्यानाम्पतये नमः स्वाहा ॥ ३२ ॥

ॐ नमो व्वञ्चते परिवञ्चते स्तायूनाम्पतये नमः स्वाहा ॥ ३३ ॥

ॐ नमो निषङ्गिणोऽइषुधिमने तस्क्कराणाम्पतये नमः स्वाहा ॥ ३४ ॥

ॐ नमो सृकायिब्भ्यो जिघाꣳ सद्ब्भ्यो मुष्ष्णताम्पतये नमः स्वाहा ॥ ३५ ॥

ॐ नमो सिमद्ब्भ्योनक्त्तञ्चरद्द्भ्यव्विकृन्तानाम्पतये नमः स्वाहा ॥ ३६ ॥

ॐ नमऽ उष्ष्णीर्षिणे गिरिचराय कुलुञ्चानाम्पतये नमः स्वाहा ॥ ३७ ॥

ॐ नमऽ इषुमद्ब्भ्यो धन्वायिब्भ्यश्श्च वो नमः स्वाहा ॥ ३८ ॥

ॐ नमऽ आतन्वानेब्भ्यः प्प्रतिदधानेब्भ्यश्च्च वो नमः स्वाहा ॥ ३९ ॥

ॐ नमऽ आयच्छद्ब्भ्योस्यद्ब्भ्यश्च्च वो नमः स्वाहा ॥ ४० ॥

ॐ नमो व्विसृजद्ब्भ्यो व्विद्ध्यद्ब्भ्यश्च वो नमः स्वाहा ॥ ४१ ॥

ॐ नमः स्वपद्ब्भ्य जाग्ग्रद्ब्भ्यश्च्च वो नमः स्वाहा ॥ ४२ ॥

ॐ नमः शयानेब्भ्यऽ आसीनेब्भ्यश्च्च वो नमः स्वाहा ॥ ४३ ॥

ॐ नमस्तिष्ठ्ठद्ब्भ्यो धावद्ध्यश्च वो नमः स्वाहा ॥ ४४ ॥

ॐ नमः सभाब्भ्यः सभापतिब्भ्यश्च्च वो नमः स्वाहा ॥ ४५ ॥

ॐ नमोश्श्वेब्भ्योऽ श्श्वपतिब्भ्यश्च्च वो नमः स्वाहा ॥ ४६ ॥

ॐ नमऽ आव्व्याधिनीब्भ्यो व्विविद्ध्यन्तीब्भ्यश्च्च वो नमः स्वाहा ॥ ४७ ॥

ॐ नमऽ उगणाब्भ्यस्तृꣳ हतीब्भ्यश्च्च वो नमः स्वाहा ॥ ४८ ॥

ॐ नमो गणेभ्भ्यो गणपतिभ्भ्यश्च वो नमः स्वाहा ॥ ४६ ॥

ॐ नमो व्व्रातभ्भ्यो व्व्रातपतिभ्भ्यश्च वो नमः स्वाहा ॥ ५० ॥

ॐ नमो गृत्सभ्भ्यो गृत्सपतिभ्भ्यश्च वो नमः स्वाहा ॥ ५१ ॥

ॐ नमो व्विश्रूपेभ्भ्यो व्विश्श्वरूपेभ्भ्यश्च वो नमः स्वाहा ॥ ५२ ॥

ॐ नमः सेनाभ्भ्य सेनानिभ्भ्यश्च वो नमः स्वाहा ॥ ५३ ॥

ॐ नमो रथिभ्भ्योऽ अरथेभ्भ्यश्च्च वो नमः स्वाहा ॥ ५४ ॥

ॐ नमः क्षतृभ्भ्यः सडग्रहीतभ्भ्यश्श्च वो नमः स्वाहा ॥ ५५ ॥

ॐ नमो महद्भ्भ्योऽ अर्ब्भकेभ्भ्यश्च्च वो नमः स्वाहा ॥ ५६ ॥

ॐ नमस्तक्षभ्भ्यो रथकारेभ्भ्यश्च वो नमः स्वाहा ॥ ५७ ॥

ॐ नमः कुलालेभ्भ्य कर्म्मारेभ्भ्यश्च वो नमः स्वाहा ॥ ५८ ॥

ॐ नमो निपादेभ्भ्य पुञ्जिष्ट्ठेभ्भ्यश्च वो नमः स्वाहा॥ ५६ ॥

ॐ नमः श्श्वनिभ्भ्यो मृगयुभ्भ्यश्च वो नमः स्वाहा ॥ ६० ॥

ॐ नमः श्श्वभ्भ्यः श्श्वपतिभ्भ्यश्च वो नमः स्वाहा ॥ ६१ ॥

ॐ नमो भवाय च रुद्द्राय च स्वाहा ॥ ६२ ॥

ॐ नमः शर्व्वाय च पशुपतये च स्वाहा ॥ ६३ ॥

ॐ नमो नीलग्ग्रीवाय च शितिकण्ठाय च स्वाहा ॥ ६४ ॥

ॐ नमः कपर्द्दिने च व्व्युप्तकेशाय च स्वाहा ॥ ६५ ॥

ॐ नमः सहस्त्राक्क्षाय च शतधन्न्वने च स्वाहा ॥ ६६ ॥

ॐ नमो गिरिशयाय च शिपिविष्ट्टाय च स्वाहा ॥ ६७ ॥

ॐ नमो नमोदुष्ट्टमाय चेषुमते च स्वाहा ॥ ६८ ॥

ॐ नमो ह्रस्वाय च व्वामनाय च स्वाहा ॥ ६९ ॥

ॐ नमो बृहते च व्वर्षीयसे च स्वाहा ॥ ७० ॥

ॐ नमो व्वृद्धाय च सवृधे च स्वाहा ॥ ७१ ॥

ॐ नमोऽग्राय च प्प्रथमाय च स्वाहा ॥ ७२ ॥

ॐ नमोऽ आशवे चाजिराय च स्वाहा ॥ ७३ ॥

ॐ नमः शीग्घ्रचाय च शीब्भ्याय च स्वाहा ॥ ७४ ॥

ॐ नमः ऊर्म्म्याय चावस्वन्न्याय च स्वाहा ॥ ७५ ॥

ॐ नमो नादेयाय च द्द्वीप्प्याय च स्वाहा ॥ ७६ ॥

ॐ नमो ज्ज्येष्ट्ठाय च कनिष्ट्ठाय च स्वाहा ॥ ७७ ॥

ॐ नमः पूर्व्वजाय च परजाय च स्वाहा ॥ ७८ ॥

ॐ नमो मद्ध्यमाय च पगल्भाय च स्वाहा ॥ ७९ ॥

ॐ नमो जघन्न्याय च बुद्ध्न्याय च स्वाहा ॥ ८० ॥

ॐ नमः सोब्भ्याय च प्प्रतिसर्य्याय च स्वाहा ॥ ८१ ॥

ॐ नमो याम्म्याय च क्षेम्म्याय च स्वाहा ॥ ८२ ॥

ॐ नमः श्श्लोक्क्याय चावसान्न्याय च स्वाहा ॥ ८३ ॥

ॐ नमऽ उर्व्वर्य्याय च खल्लाय च स्वाहा ॥ ८४ ॥

ॐ नमो व्वन्न्याय च कक्क्ष्याय च स्वाहा ॥ ८५ ॥

ॐ नमः श्श्रवाय च प्प्रतिश्श्रवाय च स्वाहा ॥ ८६ ॥

ॐ नमऽ आशुषेणाय चाशुरथाय च स्वाहा ॥ ८७ ॥

ॐ नमः शूराय चावभेदिने च स्वाहा ॥ ८८ ॥

ॐ नमो बिल्विमने च कवचिने च स्वाहा ॥ ८९ ॥

ॐ नमो व्वर्म्मिणे च व्वरूथिने च स्वाहा ॥ ९० ॥

ॐ नमः श्श्रुताय च श्श्रुतसेनाय च स्वाहा ॥ ९१ ॥

ॐ नमो दुन्दुब्भ्याय चाहनन्न्याय च स्वाहा ॥ ९२ ॥

ॐ नमो धृष्णवे च प्प्रमृशाय च स्वाहा ॥ ९३ ॥

ॐ नमो निषङ्गिणे चेषुधिमते च स्वाहा ॥ ९४ ॥

ॐ नमस्तीक्क्ष्णेषवे चायुधिने च स्वाहा ॥ ९५ ॥

ॐ नमः स्वायुधाय च सुधन्वने च स्वाहा ॥ ९६ ॥

ॐ नमः सुत्याय च पत्थ्याय च स्वाहा ॥ ९७ ॥

ॐ नमः काट्ट्याय च नीप्प्याय च स्वाहा ॥ ९८ ॥

ॐ नमः कुल्लाय च सरस्याय च स्वाहा ॥ ९९ ॥

ॐ नमो नादेयाय च व्वैशन्ताय च स्वाहा ॥ १०० ॥

ॐ नमः कूप्प्याय चावट्ट्याय च स्वाहा ॥ १०१ ॥

ॐ नमो व्वीद्ध्याय चातप्प्याय च स्वाहा ॥ १०२ ॥

ॐ नमो मेग्घ्याय च व्विद्युत्त्याय च स्वाहा ॥ १०३ ॥

ॐ नमो व्वर्ष्याय चावर्ष्याय च स्वाहा ॥ १०४ ॥

ॐ नमो व्वात्त्याय च रेष्म्याय च स्वाहा ॥ १०५ ॥

ॐ नमो व्वास्तव्याय च व्वास्तुपाय च स्वाहा ॥ १०६ ॥

ॐ नमः सोमाय च रुद्द्राय च स्वाहा ॥ १०७ ॥

ॐ नमस्ताम्म्राय चारुणाय च स्वाहा ॥ १०८ ॥

ॐ नमः शङ्गवे च पशुपतये च स्वाहा ॥ १०६ ॥

ॐ नमऽ उग्ग्राय च भीमाय च स्वाहा ॥ ११० ॥

ॐ नमोऽग्ग्रेवधाय च दूरेवधाय च स्वाहा ॥ १११ ॥

ॐ नमो हन्त्रे च हनीयसे च स्वाहा ॥ ११२ ॥

ॐ नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः स्वाहा ॥ ११३ ॥

ॐ नमस्त्ताराय स्वाहा ॥ ११४ ॥

ॐ नमः शम्भवाय च मयोभवाय च स्वाहा ॥ ११५ ॥

ॐ नमः शङ्कराय च मयस्क्कराय च स्वाहा ॥ ११६ ॥

ॐ नमः शिवाय च शिवतराय च स्वाहा ॥ ११७ ॥

ॐ नमः पार्य्याय चा वार्य्याय च स्वाहा ॥ ११८ ॥

ॐ नमः प्प्रतरणाय चोत्तरणाय च स्वाहा ॥ ११९ ॥

ॐ नमः मस्त्तीर्त्थ्याय च कूल्ल्याय च स्वाहा ॥ १२० ॥

ॐ नमः शष्प्प्याय च फेन्न्याय च स्वाहा ॥ १२१ ॥

ॐ नमः सिकत्त्थाय च प्प्रवाह्याय च स्वाहा ॥ १२२ ॥

ॐ नमः किर्ठ० शिलाय च क्षयणाय च स्वाहा ॥ १२३ ॥

ॐ नमः कपर्द्दिने च पुलस्तये च स्वाहा ॥ १२४ ॥

ॐ नमऽ इरिण्ण्याय च प्प्रपत्थ्याय च स्वाहा ॥ १२५ ॥

ॐ नमो व्व्रज्जाय च गोष्ट्ठ्याय च स्वाहा ॥ १२६ ॥

ॐ नमस्तल्प्याय च गेह्याय च स्वाहा ॥ १२७ ॥

ॐ नमो हृदयाय च निवेष्प्याय च स्वाहा ॥ १२८ ॥

ॐ नमः काटठ्य च गह्वरेष्ठठाय स्वाहा ॥ १२९ ॥

ॐ नमः शुष्क्क्याय च हरित्त्याय च स्वाहा ॥ १३० ॥

ॐ नमः पाठं॰ सव्व्याय च रजस्याय च स्वाहा ॥ १३१ ॥

ॐ नमो लोप्प्याय चोलप्प्याय च स्वाहा ॥ १३२ ॥

ॐ नमऽ ऊर्व्वाय च सूर्व्याय च स्वाहा ॥ १३३ ॥

ॐ नमः पर्णाय च पर्णशदाय च स्वाहा ॥ १३४ ॥

ॐ नमऽ उद्गुरमाणाय चाभिघ्नते च स्वाहा ॥ १३५ ॥

ॐ नमऽ आखिदते च प्प्रखिदते च स्वाहा ॥ १३६ ॥

ॐ नमऽ इषुकृद्भ्यो धनुष्कृदभ्यश्च वो नमः स्वाहा ॥ १३७ ॥

ॐ नमो वः किरिकेभ्यो देवानाठं॰ हृदयेभ्यः स्वाहा ॥ १३८ ॥

ॐ नमो व्विचिन्वत्केभ्यो देवानाठं॰ हृदयेभ्यः स्वाहा ॥ १३९ ॥

ॐ नमो व्विक्षिणत्केभ्यो देवानाठं॰ हृदयेभ्यः स्वाहा ॥ १४० ॥

ॐ नमऽ आनिर्हतेभ्यो देवानाठं॰ हृदयेभ्यः स्वाहा ॥ १४१ ॥

ॐ द्रापेऽ अन्धपस्प्पते दरिद्द्र नीललोहित आसाम्प्रजानामेषान्पशूनाम्मा भेर्म्मा रोङ्मो च नः किञ्चनाममत् स्वाहा ॥ १४२ ॥

ॐ इमा रुद्द्रायतवसे कपर्द्दिने क्षयद्वीरायप्प्रभरीमहेमतीः यथाशमसद् द्विपदेचतुष्पदे व्विश्श्वम्पुष्ट्टङ्ग्रामेऽ अस्म्मिन्ननातुरम् स्वाहा ॥ १४३ ॥

ॐ या ते रुद्रद् शिवा तनूः शिवा व्विस्श्वाहा भेषजी शिवा रुतस्य भेषजी तया नो मृड जीवसे स्वाहा ॥ १४४ ॥

ॐ परि नो रुद्द्रस्य हेतिर्व्वृणक्त्तु परि त्वेषस्य दुर्म्मतिरघायोः। अव स्त्थिरा मघवद्ब्भ्यस्त्तनुष्ष्व मीडद्व्वस्तोकाय तनयाय मृड स्वाहा ॥ १४५ ॥

ॐ मीढुष्ट्टम शिवतम शिवो नः सुमना भव परमे व्वृक्षऽ आयुधन्निधाय कृत्तिं व्वसानऽ आचर पिनाकम्बिब्भ्रदागहि स्वाहा ॥ १४६ ॥

ॐ व्विकिरिद्द्र व्विलोहित नमस्तेऽ अस्तु भगवः। यास्त्ते सहस्त्रꣳ हेतयोन्न्यमस्म्मन्निवपन्तु ताः स्वाहा ॥ १४७ ॥

ॐ सहस्त्राणि सहस्त्रशो बतह्वोस्त्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि स्वाहा ॥ १४८ ॥

ॐ असङ्ख्याता सहस्त्राणि ये रुद्द्राऽ अधि भूम्म्यायम्।
तेषाꣳ सहस्त्रयोजनेव धन्न्वानि तन्मसि स्वाहा ॥ १४९ ॥

ॐ अस्मिन्न्महत्यण्णवेऽन्तरिक्षे भवाऽ अधि।
तेषाꣳ सहस्त्रयोजनेव धन्न्वानि तन्मसि स्वाहा ॥ १५० ॥

ॐ नीलग्ग्रीवाः शितिकण्ठाः दिवꣳ रुद्द्राऽ उपश्श्रिताः।
तेषाꣳ सहस्त्रयोजनेव धन्न्वानि तन्मसि स्वाहा ॥ १५१ ॥

ॐ नीलग्ग्रीवाः शितिकण्ठाः शर्व्वाऽ अधःक्षमाचराः।

तेषार्ठ० सहस्त्रयोजनेव धन्वानि तन्मसि स्वाहा ॥ १५२ ॥
ॐ ये व्वृक्षेषु शष्प्पिञ्जरा नीलग्ग्रीवा व्विलोहिताः ।
तेषार्ठ० सहस्त्रयोजनेव धन्वानि तन्मसि स्वाहा ॥ १५३ ॥
ॐ ये भूतानामधिपतयो व्विशिखासः कपर्द्दिनः ।
तेषार्ठ० सहस्त्रयोजनेव धन्वानि तन्मसि स्वाहा ॥ १५४ ॥
ॐ ये पथाम्पथिरक्षयऽ ऐलवृदाऽ आयुर्य्युधः ।
तेषार्ठ० सहस्त्रयोजनेव धन्वानि तन्मसि स्वाहा ॥ १५५ ॥
ॐ ये तीर्त्थानि प्प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषार्ठ० सहस्त्रयोजनेव धन्वानि तन्मसि स्वाहा ॥ १५६ ॥
ॐ येन्नेष व्विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।
तेषार्ठ० सहस्त्रयोजनेव धन्वानि तन्मसि स्वाहा ॥ १५७ ॥
ॐ यऽ एतावन्तश्च्च भूयार्ठ०सश्च दिशो रुद्द्रा व्वितस्त्थिरे ।
तेषार्ठ० सहस्त्रयोजनेव धन्वानि तन्मसि स्वाहा ॥ १५८ ॥

ॐ नमोस्तु रुद्द्रेब्भ्यो ये दिवि येषां व्वर्षमिषवः ।
तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदद्ध्वाः ।
तेब्भ्यो नमोऽ अस्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो
यश्च्चनो षिटद्वेष्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा ॥ १५९ ॥

ॐ नमोस्तु रुद्द्रेब्भ्यो येन्तरिक्षे येषां व्वातऽइषवः ।
तेब्भ्योदश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदद्ध्वाः ।

तेभ्ब्यो नमोऽ अस्तु ते नवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च्च नो द्वेष्टिट तमेषाञ्जम्भे दध्म्यः स्वाहा ॥ १६० ॥

ॐ नमोस्तु रुद्द्रेब्भ्यो ये पृथिव्व्यां य्येषामन्नमिषवः। तेभ्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोद्ध्वाः। तेभ्भ्यो नमोऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च्च नो द्द्वेष्ट्टि तमेषाञ्जम्भे दष्टिटयः स्वाहा ॥ १६१ ॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ। ॐ व्वयर्ठ० सी० (८ मन्त्राः) (पाठमात्रम्)

ॐ उग्रश्च (७ मन्त्राः) स्वाहा (पाठमात्रम्)

ॐ व्वाजश्च० (४ मन्त्राः) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ सत्यञ्च० (४ मन्त्राः) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ ऊर्क् च० (४ मन्त्राः) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ अश्मा च० (३ मन्त्राः) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ अग्निश्च ऽ इन्द्रश्च० (३ मन्त्राः) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ अर्ठ० शुश्च० (३ मन्त्राः) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ अग्निश्च मे धर्मश्च० (२ मन्त्रो) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ एका च० (१ मन्त्रः) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ चतस्त्रश्च० (१ मन्त्रः) कल्पन्ताम् स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ त्र्यावश्च० (२ मन्त्रौ) कल्पन्ताम् स्वाहा।

ॐ यञ्जाग्रता० (६ मन्त्राः) मस्तु स्वाहा।

ॐ सहस्त्रशीर्षा० (१६ मन्त्राः) स्वाहा।

ॐ अद्भ्यः सम्भृत० (६ मन्त्राः) स्वाहा।

ॐ आशुः शिशान० (१२ मन्त्राः) स स्वाहा।

ॐ बिभ्राड् बृहत् पिबतु० (१७ मन्त्राः) स्वाहा।

ॐ नमस्ते० (१६१ आहुतयः)।

ॐ व्वाजाय स्वाहा० ॥ १ ॥ आयुर्य्यज्ञेनकल्पताम्।

ॐ ऋचं वाचं० स्वाहा।

ॐ यन्मे छिद्रं० स्वाहा।

ॐ भूर्भुवः स्वः० यात् स्वाहा।

ॐ कया नश्चित्र० स्वाहा।

ॐ कस्त्वा सत्यो० स्वाहा।

ॐ अभी षु णः० स्वाहा।
ॐ कया त्वन्न० आभर स्वाहा।
ॐ इन्द्रो विश्वस्य० स्वाहा।
ॐ शं नो मित्रः० स्वाहा।
ॐ शन्नो व्वातः० स्वाहा।
ॐ अहानि शं० शयोः स्वाहा।
ॐ शन्नो देवी० न्तु नः स्वाहा।
ॐ स्योना पृथिवि० प्रथाः स्वाहा।
ॐ आपो हि ष्ठा० स्वाहा।
ॐ यो वः शिव० स्वाहा।
ॐ द्यौः शान्ति० स्वाहा।
ॐ दृते दृठं० ह मा० स्वाहा।
ॐ दृते दृठं० ह मा० स्वाहा।
ॐ नमस्ते हरसे० शोचिषे स्वाहा।
ॐ नमस्ते ऽअस्तु० व्विद्युते स्वाहा।
ॐ यतोयतः० समीहसे० स्वाहा।
ॐ सुमित्रिया नः ऽआयः० स्वाहा।
ॐ तच्चक्षुदर्देवाहितम् स्वाहा।
ॐ सद्योजातं० (५ मन्त्राः) (पाठमात्रम्)।

इसके पश्चात् षडङ्गन्यास सविधि करें।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

गणेशयाग स्वाहाकारमन्त्राः

ॐ आ तू नऽ इन्द्र व्वृत्रहन्नस्म्माकमर्द्धमा गहि। महान्महीभिरूतिभिः स्वाहा ॥ १ ॥

त्वमिन्द्र प्प्रतूर्तिष्ष्वभि व्विश्श्वाऽ असि स्पृधः। अशस्तिहा जनिता व्विश्वतूरसि त्वन्तूर्य्य तरुष्ष्यतः स्वाहा ॥ २ ॥

अनु ते शुष्ष्मन्तुरयन्तमीयतुः क्षोणी शिशुन्न मातरा। व्विश्श्वास्ते स्पृधः श्नथयन्त मन्न्यवे व्वृत्रं यदिन्द्र तूर्व्वसि स्वाहा ॥ ३ ॥

यज्ञो देवानां प्रत्त्येति सुम्म्नमादित्यासो भवता मृडयन्तः। आ वोऽर्व्वाची सुमतिर्व्ववृत्त्यादर्ठ० होश्श्चिद्या व्वरिवोवित्तरासत् स्वाहा ॥ ४ ॥

अदब्धेभिः सवितः पायुभिष्ट्वर्ठ० शिवेभिरद्य परि पाहि नो गयम्। हिरण्यजिह्वः सुविताय नव्यसे रक्षामाकिर्न्नोऽ अघशर्ठ० सऽ ईशत स्वाहा ॥ ५ ॥

प्रवीरया शुचयो दद्रिरे वामद्ध्वर्युभिर्म्मधुमन्तः सुतासः। व्वह व्वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय स्वाहा ॥ ६ ॥

गावऽ उपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्ण्णा हिरण्यया स्वाहा ॥ ७ ॥

काव्ययोराजानेषु क्क्रत्वा दक्षस्य दुरोणे। रिशादसा सधस्त्थऽ आ स्वाहा ॥ ८ ॥

[शुक्लयजुर्वेद ३३ ६५ ७२]

सूर्ययागस्वाहाकारमन्त्राः

ॐ व्विब्भ्राड् बृहत्पिबतु सोम्म्यं मद्ध्वायुर्द्दधद्यज्ञ-पतावविह्रुतम्। व्वातजूतो योऽ अभिरक्षति त्मना प्प्रजाः पुपोष पुरुधा व्विराजति ॥ १ ॥

उदु त्त्यं जातवेदसं देवं व्वहन्ति केतवः। दृशे व्विश्वाय सूर्य्यम् ॥ २ ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ२ऽ अनु। त्वं व्वरुण पश्यसि ॥ ३ ॥

दैव्व्यावद्ध्वर्य्यू ऽआ गतर्ठ० रथेन सूर्य्यत्वचा॥ मद्ध्वा यज्ञर्ठ० समञ्जाथे॥ तं प्रत्नथाऽयं व्वेनश्चित्रं देवानाम् ॥ ४ ॥

तं प्रत्नथा पूर्व्वथा व्विश्वथेमथा ज्ज्येष्ठतातिं बर्हिषदर्ठ० स्वर्व्विदम्॥ प्रतीचीनं व्वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु व्वर्द्धसे ॥ ५ ॥

अयं व्वेनश्चोदयत्त्पृश्निगर्ब्भा ज्ज्योतिर्ज्जरायू रजसो व्विमाने॥ इममपार्ठ० सङ्गमे सूर्यस्य शिशुं न व्विप्प्रा मति भी रिहन्ति ॥ ६ ॥

चित्रं देवानामुदगादनीकं चक्षुर्म्मित्रस्य व्वरुण-स्याग्नेः।आप्रा द्यावापृथिवी ऽअन्तरिक्षꣳ सूर्य्यऽ आत्त्मा जगतस्तस्थुषश्च ॥ ७ ॥

आ न ऽइडाभिर्व्विदथे सुशस्ति व्विश्वानरः सविता देव ऽएतु।अपियथा युवानो मत्सथा नो व्विश्वं जगदभिषित्वे मनीषा ॥ ८ ॥

यदद्य कच्च व्वृत्रहन्नुदगाऽ अभि सूर्य्य। सर्व्वं तदिन्द्र ते व्वशे ॥ ९ ॥

तरणिर्व्विश्वदर्शतो ज्योतिष्कृदसि सूर्य्य। व्विश्वमा भासि रोचनम् ॥ १० ॥

तत्सूर्यस्य देवत्वं तन्नमहित्वं मद्ध्या कर्त्तोर्व्विततꣳ सञ्जभार। यदेदयुक्त हरितः सधस्थादाद्रात्री व्वासस्तनुते सिमस्मै ॥ ११ ॥

तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्यो रूपं कृणुते द्योरुपस्त्थे। अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥ १२ ॥

बण्महाँ२ ऽअसि सूर्य्य बडादित्य महाँ२ऽ असि। महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ२ऽ असि ॥ १३॥

बट् सूर्य्य श्रवसा महाँ२ऽ असि सत्रा देव महाँ२ऽ असि। मन्हा देवानामसुर्य्यः पुरोहितो व्विभुज्ज्योतिर-दाब्भ्यम् ॥ १४ ॥

श्रायन्तऽ इव सूर्य्यं व्विश्वेदिन्द्रस्य भक्षत। व्वसूनि जाते जनमानऽ ओजसा प्प्रति भागं न दीधिम ॥ १५ ॥

अद्या देवा ऽउदिता सूर्य्यस्य निरꣳहसः पिपृता निरवद्यात्। तन्नो मित्रो व्वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽ उत द्यौः ॥ १६ ॥

आ कृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ १७ ॥ [शुक्ल यजुर्वेद-३३/३०-४३]

विशेष–सूर्यग्रहदेव को प्रसन्न करने के लिए सूर्ययज्ञ में इन्हीं मंत्रों के द्वारा अग्नि में आहुति प्रदान की जाती है।

नवग्रहयागस्वाहाकारमन्त्राः

ॐ आ कृष्णेन रजसा व्वर्त्तमानो निवेशयन्न मृतञ्चमर्त्त्यंच। हिरण्ययेन सविता रथे ना देवो याति भुवनानि पश्यन् स्वाहा॥ १॥

ॐ इमं देवाऽअसपत्नꣳ सुवद्ध्वम्महतेक्षत्राय महतेज्यैष्ठाच्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमो ऽस्माकं ब्राह्मणानाꣳ राजा स्वाहा॥ २ ॥

ॐ अग्निर्मूद्धा दिवः ककुत्पतिः पृथिव्याऽअयम्। अपाꣳरेताꣳसि जिन्वति स्वाहा॥ ३ ॥

ॐ उद्बुध्यास्वाग्ने प्रतिजागृहि त्वमिष्टापूर्तेसर्ठ० सृजेथामयं च। अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत स्वाहा॥ ४ ॥

ॐ बृहस्पते ऽअति यदर्यो ऽअर्हाद्द्युमद्विभाति क्क्रतुमज्जनेषु। यद्दीदयच्छवस ऽऋृतप्प्रजात तदस्मासु द्रविणं धेहि चित्त्रम् स्वाहा॥ ५ ॥

ॐ अन्नात्परिस्त्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्त्रं पयः सोमं प्रजापतिः। ऋतेन सत्त्यमिन्द्रियं व्विपानर्ठ० शुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा॥ ६ ॥

ॐ शं नो देवीरभिष्टय ऽआपो भवन्तु पीतये। शं योरभिस्त्रवन्तु नः स्वाहा॥ ७ ॥

ॐ कया नश्चित्र ऽआभुवदूती सदावृधः सखा। कया शचिष्ठ्या व्वृता स्वाहा॥ ८ ॥

ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्याऽअपेशसे। समुषद्भिरजायथाः स्वाहा॥ ६ ॥

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् स्वाहा॥ १ ॥

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं म ऽइषाण सर्वलोकं म ऽइषाण स्वाहा॥ २ ॥

ॐ यदक्रन्दः प्रथमं जायमान ऽ उद्यन्त्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू ऽउपस्तुत्त्यं महि जातं ते ऽअर्वन् स्वाहा॥ ३ ॥

ॐ विष्णो रराटमसि व्विष्णोः श्नप्त्रे स्थो व्विष्णोः स्यूरसि व्विष्णोर्ध्रुवोऽसि। वैष्णवमसि व्विष्णवे त्त्वा स्वाहा॥ ४ ॥

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो व्वेन ऽआवः। स बुद्ध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः स्वाहा॥ ५ ॥

ॐ सजोषा ऽइन्द्र सगणो मरुद्भिः सोमं पिव वृत्रहा शूर व्विद्वान्। जहि शत्रूँ१ रप मृधो नुदस्वाथाभयं कृणुहि व्विश्वतो नः स्वाहा॥ ६ ॥

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्म्माय स्वाहा धर्मः पित्रे स्वाहा॥ ७ ॥

ॐ कार्षिरसि समुद्रस्य त्वाक्षित्या ऽउन्नयामि। समापो ऽअद्भिरग्मत समोषधीभिरोषधीः स्वाहा॥ ८ ॥

ॐ चित्रावसो स्वस्ति ते पारमशीय स्वाहा॥ ९ ॥

ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ२ ऽआसादयादिह ॥ १ ॥

ॐ आपो हिष्ठा मयोभुवस्तान ऽऊर्ज्जे दधातन। महेरणाय चक्षसे स्वाहा॥ २ ॥

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म्म सप्रथाः स्वाहा॥ ३ ॥

ॐ इदं व्विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳसुरे स्वाहा ॥ ४ ॥

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः स्वाहा॥ ५ ॥

ॐ आदित्यै रास्नासीन्द्राण्या ऽउष्णीषः। पूषासि धर्माय दीष्व स्वाहा॥ ६ ॥

ॐ प्रजापते न त्वदेतान्यन्यो व्विश्वा रूपाणि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो ऽअस्तु व्वयꣳ स्याम पतयो रयीणाम् स्वाहा॥ ७ ॥

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये ऽअन्तरिक्षे ये दिवि तेभ्यो नमः स्वाहा॥ ८ ॥

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो व्वेन ऽआवः। स बुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः स्वाहा॥ ९ ॥

लक्ष्मीयागस्वाहाकारमन्त्राः

हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह ॥ १ ॥

तां म आवह जातवेदो लक्ष्मी मनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रीयं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥ ३ ॥

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥ ४ ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीं शरणं प्रपद्ये अलक्ष्मीमे नश्यतां त्वां वृणोमि॥ ५॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्त्व वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु या अन्तरा याश्च बाह्याऽअलक्ष्मीः ॥६

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्ति मृद्धिं ददातु मे॥ ७ ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ ८ ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ ९॥

मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ १० ॥
कर्दमेन प्रजाभूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ ११ ॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले॥ १२ ॥
आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह॥ १३ ॥
आर्द्रां यष्करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो मऽआवह॥ १४॥
तां म ऽआवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्
यः शुचिः प्रयतोभूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् स्वाहा॥ १६॥

प्रजापतियागस्वाहाकारमन्त्राः

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव। यत्कामास्ते जुहूमस्तन्नोऽ अस्तु वयठं० स्याम पतयो रयीणाम् ॥ १ ॥

ब्रह्म जज्ञानं प्रथम पुरस्ताद्वि सीमतः सुरुचो व्वेन ऽआवः। स बुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिय सतश्च व्विवः ॥ २ ॥

ब्रह्म क्षत्रं पवते तेज ऽइन्द्रियर्ठ० सुरया सोमः सुत ऽआसुतो मदाय। शुक्रेण देव देवताः पिपृग्धि रसेनान्नं यज्ञमानाय धेहि ॥ ३ ॥

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमर्ठ० सरः। इन्द्रः पृथिव्यै व्वर्षीयान् गोस्तु मात्रा न विद्यते ॥ ४ ॥

ब्रह्माणि मे मतयः शर्ठ० सुतासः शुष्म ऽयर्ति प्रभृतो मे ऽअद्रिः। आ शासते प्रति हर्यन्त्युक्थेमा हरी ब्वहस्ता नो ऽअच्छ ॥ ५ ॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व। व्विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम व्विदथे सुवीराः। य ऽइमा व्विश्वा व्विश्वकर्मा यो नः पितान्नपते-ऽन्नस्य नो देहि ॥ ६ ॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी ऽअनेहसा। पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो ऽअघशर्ठ० स ऽईशत ॥ ७ ॥

ब्रह्मण ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो व्वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय व्वीरहणं पाप्मने ल्कोवमाक्रयाया ऽअयोगू कामाय पुँश्चलूमतिक्रुष्टाय मागधम् ॥ ८ ॥

ॐ ब्राह्मणमद्य व्विदेयं पितृमन्तं पैतृमत्यमृषि-मार्षेयर्ठ० सुधातुदक्षिणम्। अस्मद्राता देवत्रा गच्छ प्रदातारमाविशत ॥ ९ ॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निर्ठ० स्वे योनावभारुखा। तां व्विश्वैर्दैवैर्ऋतुभिः संविदानं प्रजापतिर्व्विश्वकर्म्मा व्विमुञ्चतु ॥ १० ॥

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर ऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्व्वोढानड्वानाशुः सप्तिः पुरन्धिर्य्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतां निकामे निकामे नः पर्ज्जन्यो वर्षतु फलवत्यो न ऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ ११ ॥

'महत्वपूर्ण यज्ञों के न्यास'

विष्णुयागमंत्र न्यास विधिः

पुरुषसूक्तन्यासः

विनियोगः-सहस्रशीर्षेत्यादिषोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः आद्यानां पञ्चदशानामनुष्टुप्छन्दः यज्ञेन यज्ञमित्यस्य त्रिष्टुप्छन्दः जगद्बीजं नारायणपुरुषो देवता, न्यासे हवने च विनियोगः।

१. ॐ सहस्रशीर्षा० वामकरे।

२. ॐ पुरुष ऽएव० दक्षिणकरे।

३. ॐ एतावानस्य० वामपादे।
४. ॐ त्रिपादूर्ध्व० दक्षिणपादे।
५. ॐ ततो विराडजायत० वामजानौ।
६. ॐ तस्माद्यज्ञात् सर्वहुत:० दक्षिणजानौ।
७. ॐ तस्माद्यज्ञात् सर्वहुतऽऋच:० वामकट्याम्।
८. ॐ तस्मादश्वा० दक्षिणकट्याम।
९. ॐ तं यज्ञं बर्हिषि० नाभौ।
१०. ॐ यत्पुरुषं व्यदधु:० हृदये।
११. ॐ ब्राह्मणोऽस्य० वामबाहौ
१२. ॐ चन्द्रमा मनस:० दक्षिणबाहौ।
१३. ॐ नाभ्या ऽआसीदन्त० कण्ठे।
१४. ॐ यत्पुरुषेण हविषा० मुखे।
१५. ॐ सप्तास्यासन्० अक्ष्णो:।
१६. ॐ यज्ञेन यज्ञम् मूर्ध्नि।

पुन:–

१. ब्राह्मणोऽस्य० हृदयाय नम:।
२. चन्द्रमा मनस:० शिरसे स्वाहा।
३. नाभ्या ऽआसीदन्त० कवचाय हुम्।
४. यत्पुरुषेण हविषा० नेत्रत्रयाय वौषट्।
५. सप्तास्यासन्० शिखायै वषट्।
६. यज्ञेन यज्ञम्० अस्त्राय फट्।

ध्यानम्–

ध्येयः सदा सवितृमण्डलमध्यवर्ती।
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥१॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ २ ॥

॥ इति पुरुषसूक्तन्यासः॥

रुद्रयागमंत्र न्यास विधिः

रुद्रसूक्तन्यासः

विनियोगः-नमस्त इति षोडशर्चस्य परमेष्ठी ऋषिः, नमस्त इत्यस्य गायत्रीछन्दः, यात इति त्रयाणामनुष्टुप्छन्दः, अध्यवोचदिति त्रयाणां पङ्क्तिश्छन्द, नमोऽस्तु नीलग्रीवायेति सप्तानामनुष्टुप्छन्दः, मा नो महान्तमिति द्वयोः कुत्स ऋषिर्जगतीछन्दः, सर्वेषामेको रुद्रो देवता, न्यासे हवने च विनियोगः।

१. ॐ नमस्ते०	वामकरे।
२. ॐ याते रुद्र शिवा०	दक्षिणकरे।
३. ॐ यामिषु गिरिशन्त०	वामपादे।
४. ॐ शिवेन वचसा०	दक्षिणपादे।
५. ॐ अध्यवोचदधिवक्ता०	वामजांनौ।
६. ॐ असौ यस्ताम्रः०	दक्षिणजानौ।
७. ॐ असौ योऽवसर्पति०	वामकट्याम्।
८. ॐ नमोऽस्तु नीलग्रीवाय०	दक्षिणकट्याम।
९. ॐ प्रमुञ्च०	नाभौ।
१०. ॐ विज्यन्धनु०	हृदये।
११. ॐ या ते हेतिः०	वामबाहौ।
१२. ॐ परि ते धन्वनः०	दक्षिणबाहौ।
१३. ॐ अवतत्त्यधनुष्ट्वम्०	कण्ठे।

१४. ॐ नमस्ते ऽआयुधाय०	मुखे।
१५. ॐ मा नो महान्तम्०	नेत्रयोः।
१६. ॐ मा नस्तोके०	मूर्ध्नि।

पुनः–

१. या ते हेतिः०	हृदयाय नमः।
२. परि ते धन्वनः०	शिरसे स्वाहा।
३. अवतत्त्य धनुष्ट्वम्०	शिखायै वषट्।
४. नमस्ते ऽआयुधाय०	कवचाय हुम्।
५. मा नो महान्तम्०	नेत्राभ्यां वौषट्।
६. मा नस्तोके०	अस्त्राय फट्।

ध्यानम्– **ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतं स**
